BENARES SANSKRIT SERIES;

A

COLLECTION OF SANSKRIT WORKS

EDITED BY THE

PANDITS OF THE BENARES SANSKRIT COLLEGE,

UNDER THE SUPERINTENDENCE OF

G. THIBAUT, PH. D., C. I. E. &c. &c.

No. 151.

न्यायलीलावती ।

न्यायाचार्यश्रीवल्लभविरचिता ।

वाराणसीस्थराजकीयसंस्कृतपाठशालीयपुस्तकालयाध्यक्षेण

पण्डितविन्ध्येश्वरीप्रसादद्विवेदिना

संस्कृता ।

NYÁYA LÍLÁVATÍ,

A TREATISE ON VAIS'ESHIKA PHILOSOPHY,

BY

NYÁYÁCHÁRYA VALLABHA,

EDITED BY

PANDITA VINDHYEŚVARÍ PRASÁD DVIVEDI,

LIBRARIAN, GOVT. SANSKRIT COLLEGE, BENARES.

Fasciculus I.

BENARES:

PUBLISHED BY BRAJ BHUSHAN* DAS & Co.,

C. K. 40/5 Thatheri Bazar, Near the Chauk.

Printed at the Amar Press, Jageshar Press, Benares Printing Press and cover printed by GAURI SHANKAR LAL, at Chandraprabha Press.

1910.

* Formerly the publisher's name was put down in the abstract form "BRAJ B. DAS & Co.," but now the full name is given *i. e.* "BRAJ BHUSHAN DAS & Co.," so the customers are requested not to take it as another firm altogether.

विज्ञापनम् ।

बनारससंस्कृतसीरीज़् अर्थात् वाराणसीसंस्कृतपुस्तकमाला ।

इयं पुस्तकमाला खण्डशो मुद्रिता भवति । अस्यां संस्कृतभाषानिबद्धा बहवः प्राचीना दुर्लभा उत्तमोत्तमा ग्रन्था मुद्रिता भवन्ति । तांश्च ग्रन्थान् काशिकराजकीयसंस्कृतपाठशालीयपण्डिता अन्येऽपिविद्वांसः शोधयन्ति । ये च पुस्तकमालारम्भखण्डाद् ग्राहकास्तैः प्रत्येकखण्डस्य मूल्यम् ।।) अष्टौ आनका देयाः । ये चान्ये ग्राहकाः मध्यस्थानि कानिचित् खण्डानि ग्रन्थमेकं वा गृह्णन्ति ते निम्नलिखितमूल्येन प्राप्स्यन्ति । यैर्महाशयगणैश्चेदत्र बहूनि पुस्तकानि संग्राह्याणि तैर्यथोचितसुलभमूल्येन तानि प्राप्यन्ते । विशेषवृत्तानि पत्रव्यवहारतो ज्ञेयानि ॥

तत्र मुद्रिता ग्रन्थाः ।

	रु०	आ०
सिद्धान्ततत्त्वविवेकः खण्डानि ५	५	०
अर्थसङ्ग्रहः अंग्रेजीभाषानुवादसहितः	१	०
तन्त्रवार्त्तिकम् खण्डानि १३	१३	०
तन्त्रवार्त्तिकावशेषः टुप्टीका खण्डानि ४	४	०
कात्यायनमहर्षिप्रणीतशुक्लयजुःप्रातिशाख्यम् सभाष्यं ख० ६	६	०
सांख्यकारिका चन्द्रिकाटीका–गौडपादभाष्यसहिता	१	०
वाक्यपदीयम् खण्डानि ६ (प्रथमभागे प्रथमद्वितीयकाण्डे पुण्यराजटीकासहिते खण्डानि ३ । द्वितीयभागे तृतीयकाण्डम् हेलाराजटीकासहितं खण्डानि ३)	६	०
रसगङ्गाधरः सटीकः खण्डानि ९	३	०
परिभाषावृत्तिः खण्डे २	२	०
वैशेषिकदर्शनं किरणावलीटीकासंवलितप्रशस्तपादप्रणीतभाष्यसहितम् खण्डे २	२	०
पाणिन्यादिशिक्षासङ्ग्रहः खण्डानि ५	५	०
नैष्कर्म्यसिद्धिः सटीका खण्डानि ४	३	०
महर्षिकात्यायनप्रणीतं शुक्लयजुस्सर्वानुक्रमसूत्रं सभाष्यम्	३	०
ऋग्वेदीयशौनकप्रातिशाख्यं सभाष्यं खण्डानि ४	४	०
बृहद्वैयाकरणभूषणम् पदार्थदीपिकासहितं खण्डानि ४	४	०
विवरणोपन्यासः सटीकवाक्यसुधासहितः खण्डे २	२	०

तत्त्वदीपनम् (पञ्चपादिकाविवरणस्य व्याख्यानम्) खं० ८	८	०
वेदान्तदीपः । श्रीभगवद्रामानुजाचार्यविरचितः । खण्डानि ३	३	०
पातञ्जलदर्शनं श्रीरामानन्दयतिकृतमणिप्रभाऽख्यवृत्तिसहि०	१	०
व्याकरणमिताक्षरा । श्रीमदन्नभट्टप्रणीता खण्डानि १०	१०	०
रसमञ्जरी । व्यङ्ग्यार्थकौमुद्या प्रकाशेन च सहिता ख० ३	३	०
भेदाधिकारः व्याख्यासहितः श्रीमदप्पयदीक्षितकृतोपक्रम-पराक्रमसहितः खण्डे २	२	०
बोधसारो नरहरिकृतः तच्छिष्यदिवाकरकृतटीकया सहि०	१०	०
ब्रह्मसूत्रदीपिका । श्रीमच्छङ्करानन्दभगवद्विरचिता खण्डे २	२	०
दैवज्ञकामधेनुः । प्राचीनज्यौतिषग्रन्थः खण्डानि ३	३	०
श्रीमदणुभाष्यम् । श्रीवल्लभाचार्यविरचितम् । श्रीपुरुषोत्तजीमहा-राजविरचितभाष्यप्रकाशाख्यव्याख्यासमेतं खण्डानि १५	१५	०
तत्त्वशेखरः । तथा तत्त्वत्रयचुलुकसंग्रहः ।	१	०
श्रीभाष्यवार्त्तिकम् । श्रीमद्रामानुजाचार्यविशिष्टाद्वैतसिद्धान्तप्र-तिपादनपरम् । यतीन्द्रमतदीपिका च । खण्डे २	२	०
गूढार्थदीपिका । श्रीमद्भागवतदशमस्कन्धस्थरासपञ्चाध्याय्याः निवृत्तिपरा व्याख्या । भ्रमरगीतव्याख्या च । खण्डानि ४	४	०
आश्वलायनसूत्रप्रयोगदीपिका । मञ्चनाचार्यभट्टविरचिता	२	०
काव्यालङ्कारसूत्राणि । आचार्यवामनविरचितवृत्तिसमेतानि कामधेनुसमाख्यव्याख्यासहितानि खण्डे २	२	०
श्रुत्यन्तसुरद्रुमः । श्रीपुरुषोत्तमप्रसादविरचितः खण्डानि ३	३	०
चतुर्विंशतिमतसंग्रहव्याख्या । श्रीभट्टोजिदीक्षितसंकलिता	२	०
श्रीविद्वन्मण्डनम् । श्रीविट्ठलनाथदीक्षितविरचितम् । गोस्वामिश्री-पुरुषोत्तमजीविरचितसुवर्णसूत्राख्यव्याख्यासहितं खण्डे २	२	०
सांख्यायनगृह्यसङ्ग्रहः । पण्डितवरवासुदेवविरचितः ।	१	०
महासिद्धान्तः । आर्यभटाचार्येण विरचितः । म० श्रीसुधाकर-द्विवेदिकृतटीकासहितः । खण्डानि ३	३	०
न्यायलीलावती । न्यायाचार्यश्रीवल्लभविरचिता । खण्डं १	१	०

व्रजभूषण दास और कम्पनी

नं० ५० ठठेरी बाज़ार, चौक के समीप

बनारस सिटी ।

न्यायलीलावती।

श्रीवल्लभाचार्यविरचिता।

श्रीगणेशाय नमः।

नाथः सृजत्यवति यो जगदेकपुत्र-
प्रीत्या ततः परमनिर्वृतिमादधाति[१]।
तस्मै नमः सहजदीर्घकृपानुबन्ध-
लब्धत्रितत्त्वतनवे पुरुषोत्तमाय ॥ १ ॥

द्रव्यं नाकुलमुज्ज्वलो गुणगणः कर्माधिकं श्लाघ्यते[२]
जातिर्विप्लुतिमागता न च पुनः श्लाघ्या विशेषस्थितिः।
सम्बन्धः सहजो गुणादिभिरियं[३] यत्रास्तु सत्प्रीतये
सान्वीक्षानयवेश्मकर्मकुशला श्रीन्यायलीलावती ॥ २ ॥

षडेव पदार्था इति नियमव्यवच्छेद्यं प्रतीतं न वा अप्रतीतं चेत् कथं निषेधः प्रतीतं चेत् सप्तैव पदार्थाः पदार्थेषु सप्तत्वं नास्तीति चेत् न आन्तर्गणिकभेदेन सत्त्वात् षड्लक्षणयोगितया नास्तीति चेत् न षड्लक्षणयोगिष्वेव सप्तत्वप्रसक्तेरकृतत्वेन प्रतिषेधे ऽविवादात् एतदतिरिक्ते नास्तीति चेत् न प्रतीत्यप्रतीतिभ्यां व्याघातात् भावानां षड्लक्षणायोगो नास्तीति[४] चेत् न षण्णां तत्त्वादेव सर्वेषामिति चेत् न षड्लक्षणयोग्यभिप्रायेण सर्वशब्दप्रयोगे तत्त्वादेव अतिरिक्ताभिप्राये[५] व्याघातात् सामान्याकारे ऽसिद्धत्वात्। अपि च प्रत्येकलक्षणाभिप्राये परित्यागस्य सम्भवात्[६] समुदितानामप्येकत्रासत्त्वे ऽयोगनिषेधानुपपत्तेः अन्यतमाभिधाने तु सर्वेषा-

---

(१) प्रातनोति-पा॰ २ पु॰। (२) श्लाघते-पा॰ २ पु॰।
(३) अयं-पा॰ २ पु॰।
(४) भावानां षड्लक्षणपरित्यागी नास्तीति नियमार्थं पा॰ २ पु॰।
(५) च इत्यधिकम् २ पु॰। (६) सत्त्वात्-पा॰ २ पु॰।

मेव विपक्षे ऽभावदर्शनेन व्याघातात्। अभावश्च वक्तव्यो निःश्रेयसोपयोगित्वात् भावप्रपञ्चवत् कारणाभावेन कार्याभावस्य सर्वमतसिद्धत्वादुपयोगित्वसिद्धेः न चेदेवं भावोऽपि कश्चिन्नाभिधातव्यः (१) पञ्चैवाभिधातव्याः पारतन्त्र्यादिति चेत् न समवायादेरप्यनभिधानप्रसङ्गात् । तमश्च भावान्तरं निषेधत्वेनानवभासमानत्वात् बाधकाभावेन चारोपानुपपत्तेः आलोकाभावे चाक्षुषत्वं नास्तीति बाधकमिति चेत् न तस्यालोकाभावव्यञ्जनीयत्वात् अन्यथा आरोपानुपपत्तेः भावत्वे यदि द्रव्यान्तरं नवैवेति व्याघातः अद्रव्यान्तरत्वं सर्ववादिनिषिद्धम् । अथ गुणान्तरं चतुर्विंशतित्वव्याघात इति मेयान्तरमेव तमः । अत्रैवं संग्रहश्लोकः ।

नाभावोऽभाववैधर्म्यान्नारोपो बाधहानितः ।
द्रव्यादिषट्कवैधर्म्याज्ज्ञेयं मेयान्तरं तमः ॥

क्षणावच्छेदकश्चोपाधिः क्षणिक इति षट्पदार्थविधर्मैत्यतोऽपि नियमासिद्धिः ॥

शक्तिश्च मीमांसकानाम् । अत्रैव संग्रहश्लोकः ।

न द्रव्यं गुणवृत्तित्वात् गुणकर्मबहिर्गता ।
सामान्यादिषु सत्त्वेन सिद्धा भावान्तरं हि सा ॥

अत एव ज्ञाततापि वैशिष्ट्यं च कथमन्यथा भावाभावयोर्वैशिष्ट्यावगमः यथा वैशिष्ट्ये तथा स्वरूपेणैवेति चेत् न समवायापलापप्रसङ्गात् अधिकस्तत्र प्रवाहो हीयते न प्रतीयमान इति चेत् न(२) अभावे ऽपि तुल्यत्वात् बाधोऽत्रास्तीति चेत् न तदनभिधानात् ततो भावाभावयोरपि तत्स्वीकारो दुर्वार एव दण्डी पुरुष इति प्रतीतेः। शब्दमात्रमिदमिति चेत् न इहायमित्यादावपि (३) तथात्वप्रसङ्गात् । आधाराधेयभावश्च मेयान्तरं संयोगसमवायावेव सप्तमीप्रथमाभ्यामभिलप्यमानसम्बन्धिनौ तद्व्यवहारहेतू इति

(१) इति इत्यधिकं २ पु० । (२) न इति नास्ति २ पु० ।
(३) इत्यादेरपि-पा० २ पु० ।

चेत् न इहायमितिप्रतीतिवैचित्र्यात् । शब्दमात्रमिदमिति चेत् न (१) सम्बन्धापलापप्रसङ्गात् । सादृश्यं तु गुणवृत्तित्वात् न द्रव्यगुणकर्मात्मकं नापि सामान्यात्मकम्(२) । तद्धि व्यक्ति(३)दर्शनमात्रवेद्यं वा प्रतियोगिग्रहणवेद्यं वा । नाद्यः प्रतियोगिनोऽनवभासे सादृश्यबुद्धेरभावात् अस्त्येव च बुद्धिर्न व्यपदेशभासिनीति(४) चेत् न ब्राह्मणत्वादेरपि निर्विकल्पकबुद्धिवेद्यत्वापत्तेः नेतरः अवयवसामान्यानां प्रागेव ज्ञानात् सामान्यस्य च सामान्यान्तरे ऽभावात् सादृश्यव्यवहारानुपपत्तौ(५) मेयान्तरत्वादिति । मैवम् ।

भावत्वाधिष्ठिताः सर्वाः प्रत्येकं व्यक्तयो मताः ।
द्रव्यादिषट्कविच्छेदमेलकेन विवर्जिताः ॥

भावत्वाधिष्ठानैकैकव्यक्तिमात्रे(६) षड्लक्षणानां मिलितोऽयोगो व्यवच्छिद्यते न तु मिलितानामयोगः अयोगश्चान्यत्रावगतोऽत्र समारोप्य निषिध्यते भूतले चैत्रवत् ततश्च षड्लक्षणवदेव भावजातीयं प्रमेयं वाच्यमेवेतिवदयोगव्यवच्छेदस्य पदार्थान्तरे भावत्वं नास्तीति अन्ययोगव्यवच्छेदस्य वा विभागार्थत्वात् अभावस्य च(७) समानतन्त्रसिद्धस्याप्रतिषिद्धस्य न्यायदर्शने मानसेन्द्रियतासिद्धिवदत्राप्यविरोधात् अभ्युपगमसिद्धान्तसिद्धत्वात् नीलं रूपमिति प्रतीतिश्च तमोविषयवती यद्यपसारितबाधका तदा रूपमेव तमो न द्रव्यादिवैधर्म्यम् । अथ सम्भवद्बाधा तदारोप एव स्वप्नावभातनीलिमवत् अथ रूपाश्रयत्वबुद्धिस्तमसि तदा बाधाबाधाभ्यां न पदार्थान्तरत्वम्(८) क्षणावच्छेदकश्चोपाधिर-

(१) शब्दमात्रे तु पा० २ पु० । शब्दमात्रत्वे तु इति प्रकाशमाधुरीसम्मतः पाठः ।
(२) नापि सामान्यं-पा० २ पु० । (३) तद्व्यक्ति-पा० २ पु० ।
(४) भासिनीति-पा० २ पु० । (५) व्यवहाराभावापत्तौ-पा० २ पु० ।
(६) भावत्वाधिष्ठितैकैकव्यक्तिमात्रे-पा० २ पु० ।
(७) च इति नास्ति २ पुस्तके ।
(८) तद्बाधबाधाभ्यां न पदार्थान्तरत्वम्-पा० १ पु० । परन्तु मूलोक्त

न्त्यः शब्द एव स चोपान्त्यशब्दनाश्यः न च तस्यैवोत्पादनाशहेतु-
त्वे युगपद्विनाशोत्पादप्रसङ्गः। अन्त्यशब्दसहकृतस्यैव तस्य नाशहे-
तुत्वात् । एतेन प्रध्वंसाहेतुकत्वमपास्तम्[1] । अत्र च टीका यथा-
ऽन्त्य उपान्त्येनेति कार्यकारणाविरोधिव्याख्यानावसर इत्येके ।
तन्न एवं सति ज्ञानादिषु द्वित्रिक्षणावस्थायित्वविरोधे व्यवहारो
न स्यात् देशान्तरोदीरितान्त्यशब्दोपाधिकोऽसाविति चेत् न
उपाधेरनिश्चये ऽत्र निश्चयेन व्यवहारानुपपत्तेः । अवष्टब्धदेश-
विभागाभावोपहितसूर्यपरिस्पन्द[2] इत्यन्ये । स्पन्दस्य स्वरू-
पाभेदे ऽपि[3] विभागाभावविभागपूर्वसंयोगनाशोत्तरदेशसंयोगा-
त्मकोपाधिचतुष्कान्यतमः[4] क्षणव्यवहारहेतुरित्यपरे । तथा च
टीका निमेषस्य चतुर्थो भागः क्षण इति तन्न अत्राभावस्वरूपं वो-
पाधिः कर्मस्वरूपं वा तयोः सम्बन्धो वा नाद्यौ तयोरनेककाल-
व्यापित्वात् न तृतीयः तस्यानेककालव्यापित्वे क्षणव्यवहारवि-
रोधात् एकक्षणावस्थायित्वे क्षणिकतापत्तेः । स्वसमानाधिकरणौ
सूर्यसंयोगविभागावित्यन्ये । तन्न एतद्रूपद्वयं वोपाधिः अनयोस्तु
समवायो वा तेषां[5] मेलको वा । नाद्यौ तेषामनेककालव्यापित्वात्
न तृतीयः तस्यैव क्षणिकत्वस्वीकारात् सत्यम् किं पुनः क्षणसिद्धौ
प्रमाणम्[6] क्षणवेदनम् । किं क्षणवेदनम् अस्तमितपूर्वापरभाववस्तु-
वेदनं वा क्रियावेदनं वा तत्कार्यप्रागभाववेदनं वा तदुभयसंसर्ग-
वेदनं वा । नाद्यन्तावसिद्धेः नापरौ तयोः स्थिरत्वात् नानाक्षणव-
र्तिनो घटादय इति प्रत्यक्षादेव क्षणनिरीक्षणमस्तीति चेत् न क्र-
मिकसंयोगविभागाद्युपाधिसम्बन्धत एव तत्प्रतीतेः अनुमानाद-

एव प्रकाशकृत्सम्मत: पाठः ।

(१) प्रध्वंसहेतुत्वमपास्तम् इति पाठ: प्रथमपुस्तके चिन्तनीय: ध्वंसाहेतुकत्वमित्यस्य अन्त्यशब्दध्वंसस्याहेतुकत्वमित्यर्थ इति माथुरी ।

(२) कार्यपरिष्पन्द-पा॰ १ पु॰ । (३) अपि इति नास्ति २ पु॰ ।

(४) संयोगात्मकोपाधिरूपभागचतुष्कान्यतम:-पा॰ २ पु॰ ।

(५) एषाम्-पा॰ २ पु॰ । (६) सत्यं किं क्षणसिद्धौ मानम्-पा॰ २ पु॰ ।

स्तीति चेत् न लिङ्गाभावात् । क्षणप्रयोगात् तदनुमानमिति चेत्
न निरूपिते वस्तुनि क्षणशब्दप्रयोगस्तस्माच्च तदनुमानमितीत-
रेतराश्रयात्[1] न च प्रत्यक्षानुमानयोरभावे मानान्तरावकाशः
ततो मानाभावान्नास्त्येव क्षणिकः क्षण इति[2] । किं तदा तद्व्य-
पदेशबीजं[3] ज्ञानविशेषः कस्तस्य विशेषः विषयः[4] कर्मरूपं
तज्जन्यविभागप्रागभावादिरूपाश्चोपाधयः केवले ऽपि[5] तद्दुर्य-
पाधावुपाधिमति च तद्व्यवहारप्रसङ्गः विशिष्टमिति चेत् किं वै-
शिष्ट्यं ज्ञानविशेषः तस्य चान्यदाऽभावान्न तद्व्यवहारः तदभा-
वश्च तज्जनकसामग्रीविरहात् ।

रवेः स्पन्दः क्षणस्तस्य नानाक्षणविशिष्टता ।
क्रमिनानाविधोपाधिसम्बन्धः परिकीर्तितः[6] ॥
असम्बद्धेषु तत्त्वेषु ज्ञानं सम्बन्धवत् पुनः ।
स्वभावनियमेनैव तत्सम्बन्धफलार्पकम् ॥
अतिप्रसङ्गदोषस्य निराकरणकारणम् ।
वैशिष्ट्यमिति निर्व्यूढं[7] तदेवात्र व्यवस्थितम् ॥

स्वविषयेणोपाधिना तद्वता वा[8] सहकृतं ज्ञानं क्षण इति वि-
शिष्टव्यवहारसमर्पकम् । यदा तु तदुभयसहकारिसम्पन्नं न भवति
तदा केवलव्यवहारं करोति न विशिष्टव्यवहारमिति ।

[9]शक्तिरपि न पदार्थान्तरं मानाभावात् अर्थापत्तिरत्र
मानमिति चेत् न अन्यथैवोपपत्तेः मणिमन्त्रादिना दाहप्रतिपक्षभू-
तस्य क्षेत्रज्ञसमवायिनोऽदृष्टभेदस्योत्पादनात् अग्न्यन्तरेणापि त-
स्य[10] पुरुषस्य दाहो न स्यादिति चेत् न प्रतिनियताग्निसाध्य-
दाहप्रतिपक्षभूतस्यैवादृष्टस्योत्पादनात् औषधलिप्तकाष्ठादिषु कथ-

(१) इतरेतराश्रयता-पा॰ २ पु॰ । (२) इति नास्ति १ पु॰ ।

(३) किं तावद्व्यपदेशबीजम्-पा॰१पु॰। (४) कस्तस्य विषय:-पा॰१पु॰ ।

(५) केवले-पा॰ २ पु॰ । (६) परिकीर्त्यते-पा॰ २ पु॰ ।

(७) निर्व्यूढ-पा॰ २ पु॰ । (८) तत्स्वभावा-पा॰ १ पु॰ ।

(९) न चेत्यधिकं क्वचित् (१०) तर्हि तस्य-पा॰ २ पु॰ ।

मदाह इति चेत्[१] तत्राप्यौषधलेपकारिपुरुषसंमवेतादृष्टस्यैव[२] दाहप्रतिपक्षभूतस्योत्पादनात् प्रतिपक्षसन्निधानोत्पादकादृष्टविशेषस्य वा दाहप्रातिकूल्यम् अदृष्टविशेषार्जित[३] करतलानलसंयोगभेदस्य वा दाहप्रतिपक्षत्वं स च विशेषो दाहादाहाभ्यामेव कल्पयिष्यते विवादास्पदं स्वरूपमात्रसम्बन्धातीन्द्रियसापेक्षं जनकत्वादात्मवदिति चेत् न अत एव संस्कारादृष्टसापेक्षत्वप्रसङ्गात् तत्रात्मत्वमुपाधिरिति चेत् तुल्यम् प्रकृतेऽपि शक्तेरपि शक्त्यन्तरापेक्षायामनवस्थितेः अनपेक्षत्वे तयैव व्यभिचारात् जननशक्तियोग्यत्वं[४] जनकत्वमिति चेत् नासिद्धेः तस्माद्विवादाध्यासितं न निजरूपसम्बन्धातीन्द्रिय[५]सापेक्षं प्रमाणेन तथानुपलभ्यमानत्वात् यत् प्रमाणेन यथा नोपलभ्यते न तत् तथाभूतं यथा नीलं न पीतरूपम् नापि ज्ञातता निराकरिष्यमाणत्वात् नापि वैशिष्ट्यं घटाभावभूतलयोस्तदननुभवात् इह भूतले घटो नास्तीति व्यपदेशमात्रम् असति सम्बन्धे अत्र घटाभावो नान्यत्रेति[६] व्यपदेशे किं नियामकम् एतद्भूतलसम्बन्धेन प्रतियोगिना ऽभावनिरूपणम् दण्डी पुरुष इत्यत्र गुरुत्वप्रतिबन्धकत्वं पुरुषस्य दण्डाधारत्वं प्रतीयते व्यपदेशमात्रं वा विपरीतस्तु न व्यपदेशोऽनभिधाननिरस्तत्वात् तद्धि तस्य ।

विशेषणं विशेष्यं च तत्सम्बन्धफलार्पकम् ।
ज्ञानरूपं स्वसामर्थ्याद्वैशिष्ट्यमिति कीर्त्तितम् ॥

आधारत्वं च गुरुत्वप्रतिबन्धकत्वं क्वचित् समवायिकारणत्वम् अभिव्यञ्जकत्वं वेत्यूहनीयम्[७] । अन्यथा तस्योभयवृत्तित्वेनोभयत्रापि सप्तमी स्यात् एकवृत्तित्वे तु सम्बन्धत्वव्याकोपः ।

(१) नेत्यधिकम् २ पु॰ । (२) समवेतादृष्टस्य दाह-पा॰ २ पु॰ ।
(३) अदृष्टविशेषोपार्जित-पा॰ २ पु॰ ।
(४) जनकशक्तियोगित्वं-पा॰ १ पु॰ ।
(५) निजरूपमात्रसम्बन्धातीन्द्रिय-पा॰ १ पु॰ ।
(६) नात्रेति-पा॰ २ पु॰ । (७) वेत्यूह्यम्-पा॰ २ पु॰ ।

नापि सादृश्यं तद्धि सामान्यादेरनेकवृत्तित्वं तच्चैकव्यक्तिग्रहणसमये ऽगृहीतमपि प्रतियोगिग्रहे ऽवगम्यत इति षडेव[१] पदार्था इति। विचारासहत्वाच्च तथाहि तत् स्पर्शवन्न वा नेतिपक्षे ऽप्येकवृत्ति न वा आद्ये द्रव्यत्वं द्वितीये गुणकर्मविशेषान्यतमत्वं शेषे संयोगसामान्यसमवायान्यतमत्वं[२] गुणवृत्तित्वादि[३] गुणादित्वे न स्यादिति चेत् न गुणवृत्तित्वादि गुणादित्वे न स्यादिति किमिदं प्रसङ्गमात्रम् अथ गुणवृत्तित्वादेः स्वीकृतपदार्थातिरेकसाधनं नाद्यः स्वतन्त्रतर्कस्यादूषकत्वात् नेतरः उक्तरूपचतुष्टयबहिर्भावस्य[४] षट्पदार्थातिरेकित्वस्य विरोधादशक्यसाधनत्वात् । नन्वेवमपि न्यूनता तथाहि क्षित्यादिकं द्रव्यत्वात् गुणवत्त्वाद्वा भिद्यते नाद्यः तदसिद्धेः अनुगतमतेः सन्दिग्धत्वात् स्वातन्त्र्यधीरिय[५]मिति चेत् । न शब्दे ऽपि तत्सत्त्वात् समवेतत्वेनैव चावयविनामवसायात् नापि गुणवत्त्वात् संख्यादिसाधारण्यात् रूपादिषु गुणत्वस्यैकस्यासिद्धेः भिन्नरूपस्य भागासिद्धेः आदित्वस्य प्रतिक्षेपात् अन्यतमत्वस्य भागासिद्धेः समवायिकारणत्वेनैकत्वे असमवायिकारणत्वेन गुणकर्मणोरप्येकत्वे षडेवेति नियमानुपपत्तेः कार्याश्रयत्वं यज्जातिपुरस्कारात् तद् द्रव्यत्वं भेदकमिति चेत् । न तद्विनाऽपि[६] तदुपपत्तेः अकार्यजात्याश्रयत्ववत् कारणत्वमसति बाधके सामान्य एव पर्यवस्यतीति चेत् । न स्पर्शसमवायिकारणतया क्षित्यादिषु प्रतिनियतसामान्यापत्तेः नापि गुणत्वं तस्योपदेशं विना अप्रतीतेः उपदेशश्च गुणशब्दसङ्केतो न चासौ व्यक्तिषु शक्यो व्यभिचारात् नाप्युपलक्षणान्तरेण कर्मव्यावृत्तेरशक्यत्वात् । तदन्यत्वस्यानपेक्षितव्यावृत्तिहेतुत्वेन[७]

(१) इति सिद्धं षडेव-पा॰ २ पु॰ ।
(२) संयोगसामान्यसमवायविभागान्यतमत्वम्-पा॰ २ पु॰ ।
(३) गुणकर्मवृत्तित्वादि-पा॰ १ पु॰ । (४) बहिर्भूतस्य-पा॰ १ पु॰ ।
(५) स्वातन्त्र्यधीर्विषयमिति दीधितिकृत्सम्मतः पाठः ।
(६) तां विनापि-पा॰ २ पु॰ । (७) रूपत्वेन-पा॰ २ पु॰ ।

रसान्यत्ववदनादेयत्वात् । त्रयाणामेकीभावेन षडेव पदार्था इति चेत् । न कालाकाशादीनां संयोगविभागजनकत्वेन कर्मवत् सत्तेतरजातिसिद्धेः पृथिव्यादौ[1] स्पर्शसमवायिकारणतानिर्वाहकजातिस्वीकारे जातिसङ्करप्रसङ्गो बाधकः न च कर्मत्वमसिद्धं चलतीत्यनुगताकारवेदनवेद्यत्वात्[2] न चानुगतबुद्धिगम्यजातिश्च[3] तदपायादत्र व्यावर्तते गृहीतसमयस्य रत्नतत्त्ववद्भावात् प्रतारणैवैषेति चेत् न बहुशास्त्रे ऽपि प्रतारणोपपत्तेः तदार्षमिति चेत् तुल्यम् न चेदेवमेकव्यक्तेर्जनकत्वे व्यक्त्यन्तरे तद्बुद्धिविरहापत्तिः भावे वा सर्वव्यक्तिषु प्रसङ्गः कतिपयव्यक्तिनिष्ठत्वं च[4] यदि जातिमन्तरेण तदा नियतानामेव व्यक्तीनां समानाकारविकल्पजननसामर्थ्यादेव तज्जातीयता[5]व्यवहारो ऽस्त्विति जात्यपन्हवप्रसङ्गात्[6] गुणत्वं च रूपादयो रूपत्वाद्यतिरिक्तसत्तावान्तरजातिमन्तः सामान्यवत्त्वात् कर्मवत् । उपदेशश्च यत्र सामान्यत्वं [7] संयोगविभागात्मककार्यद्वयाभावस्तद्गुणत्वव्यञ्जकमित्यसाधारणव्यञ्जकत्वविषयो[8] ऽतो नास्त्यन्योन्याश्रयः यत्र विशुद्धसन्ततिजत्वं तत्र ब्राह्मणत्वमितिवत् अर्थत्वमपि स्यादिति चेत् न तस्य सत्तासम्बन्धित्वपर्यायत्वात् अन्यथा बुद्धित्वज्ञानत्वादिनानासामान्यापत्तेः । न चात्र व्यभिचारशङ्का[9]निरुपाधित्वात् इति न न्यूनं षडेव पदार्था इति ॥

पृथिवी तावत् पृथिवीत्वजातियोगान्न भिद्यते तत्र मानाभावात् पृथिवीत्यनुगतव्यवहारादिति चेत् । न घृतादौ तदभावात् । तदपि निपुणेनोपमन्यत[10] इति चेत् । न जलादावपि तुल्यत्वात्

(१) जातिमत्त्वासिद्धेः । पृथिव्यादौ तु-पा० २ पु० ।
(२) वेदनावेद्यत्वात्-पा० २ पु० । (३) गम्या जातिः-पा० २ पु० ।
(४) निष्ठत्वं तु-पा० २ पु० । (५) तज्जातीय पा० २ पु० ।
(६) प्रसङ्गः-पा० २ पु० । (७) वत्त्वे-पा० १ पु० ।
(८) व्यञ्जकाविषयः-पा० २ पु० । (९) व्यतिरेकशङ्का-पा० २ पु० ।
(१०) तत्रापि निपुणेनोपलभ्यते-पा० २ पु० ।

सन्देहे ऽपि भागासिद्धत्वात् । गन्धवत्त्वात्तदनुमानमिति चेत् । न तस्य वाय्वादिसाधारणत्वात् वाय्वादावौपाधिकी मन्धप्रतीतिरिति चेत् । न चम्पककर्पूरभागानामनागमनात् आगमने वा[1] चम्पकदलानां सच्छिद्रत्वप्रसङ्गः[2] कर्पूरे च भवनोदरमधिवासयति माषकादित्रुटिप्रसङ्गात् । न चापर[3]परमाणुप्रवेशात् तुल्यायव्ययत्वमिति वाच्यम् । एकमाषस्याक्षयताप्रसङ्गात् । नापि[4] पाकजः स्पर्शः पाकजत्वासिद्धेः पार्थिवविशेषगुणत्वात्[5] तत्सिद्धिरिति चेत् । न व्यावर्त्यजलरूपसंख्यादीनामपाकजत्वाप्रतीतौ विशेषणवैयर्थ्यात् । अवैलक्षण्यात् तत्प्रतीतौ त्वत्रापि[6] तद्विपर्ययावसायाद्बाधः । विशेषगुणत्वं चैकद्रव्यवृत्तित्वं कतिपयद्रव्यवृत्तित्वं वा । नाद्यः स्पर्शस्यानेकद्रव्यवृत्तित्वात् पाकजत्वविशेषणान्नैव[7]मिति चेत् । न तस्यैवासिद्धेः द्वितीये तु वेगेनैव व्यभिचारात् । ततः पृथिवीमात्रभेदग्राहकप्रमाणाभावात् पृथिवी नेतरेभ्यो भिद्यत इति । मैवम् । अस्ति तावद्गन्धं प्रति गन्धवतां समवायिकारणत्वम् न चैतन्नानाव्यक्तिनिष्ठं सति भावमात्रस्याहेतुत्वात्मकत्वात्[8] सावधारणस्य च व्यभिचारात् तास्वसिद्धेः ततस्तत्प्रयोजकजातियोगित्वमास्थेयं तदेव च पृथिवीत्वम् । न च गन्धवत्त्वमेवातिप्रसङ्गीति वाच्यम् । अनिलादौ चम्पकगन्धि कर्पूरगन्धीत्युपाधिसम्भेदेनैव[9] कुङ्कुमारुणा तरुणीतिवत् तत्प्रतीतेः । न चैवमव्ययतापत्तिरिति वाच्यम् अङ्कुरदशामारभ्य यथान्वहमदृष्टाकृष्टैर्भागैरुपचयाद्विविधशाखाभिराकाशदेशव्यापकत्वं तरोर्न च च्छेदे सति तथेहापीत्यतो विशेषात् अत एव न चम्पकादौ सच्छिद्रत्वापत्तिरिति । वायोर्गन्धवत्त्वे उद्भूतस्पर्शस्य चाक्षुषतापत्तेः रूपवत्त्वं प्रयोजकमिति चेत् न गुणादावभावात् न च स्पर्शो ऽप्यपाकज

(१) वाकारो नास्ति २ पु० । (२) प्रसङ्गाच्च-पा० २ पु० ।
(३) न चापरापर-पा० २ पु० । (४) न च-पा० २ पु० ।
(५) विशेषगुणवत्त्वात्-पा० ३ पु० । (६) अत्रापीति नास्ति १ पु० ।
(७) विशेषान्नैवम्-पा० २ पु० । (८) हेतुत्वार्थकत्वात्-पा० २ पु० ।
(९) उपाधिभेदसम्भेदेन-पा० २ पु० ।

एव मुखाशकादौ सतततपनकरसम्भेदे स्पर्शभेदस्य प्रतीतेः अन्यत्र च तीव्रसुकुमारादिभेदेन[1]विशेषप्रतीतेः । यत्र तु न प्रतीयते विशेषस्तत्रापि पार्थिवस्पर्शत्वेनैव[2] रूपादिवदनुमानं न चैवं तोयादौ प्रसङ्गः तज्जातीये क्वचिदपि विशेषाप्रतीतेः तस्मादेभिरेव लक्षणैः पृथिवीतरेभ्यो भिद्यत इति सर्वं रमणीयम् । सा चेयमवयवजन्या न त्वणुसंहतिमात्रं स्थूलप्रत्ययस्य परमाणावनुपपत्तौ तदतिरिक्तवस्त्वालम्बनत्वात् तथाहि अणवो नापरोक्षबुद्धिविषयाः परमसूक्ष्मत्वात् एकाणुवत् विशिष्टोत्पादादैन्द्रियकत्वमिति चेत् न तदनभिधानात् तथाहि किं चक्षुरादिभिः सहोत्पादो विशिष्टोत्पादः उत तद्दर्शनजनकतयोत्पादः अथ दर्शनविषययोग्यतयोत्पादः नाद्यो चक्षुरादिवदणूनां प्रतिभासविरोधात् दृश्यता तु महत्त्वं वा अवयवित्वं वा अणूनां न सम्भवति स्वरूपभेदस्तु अदृश्यरूपसन्ततौ यदि नयनादिसाहित्येनोत्पद्यते अदृश्येन्द्रियादिसन्ततौ दृश्येन्द्रिय[3]-क्षणप्रसवप्रसङ्गः केषाञ्चिदेवादृश्यानां दृश्यजननशक्तिनियमात् दृश्यजनकत्वं न सर्वसाधारणमिति[4] चेत् न अणुरूपस्य दर्शनविषयत्वविरोधे स्वरूपविशेषस्यानुपाधित्वात् धूमस्वभावभेदस्येव दहनजन्यत्वे । तथा च पारमर्षसूत्रम् । नातीन्द्रियत्वादणूनामिति । स्थूलावभासानुपपत्तेः । ननु किं पूर्वापरादिदेशमवष्टभ्य दृश्यानामेव परमाणूनां सत्त्वं स्थौल्यमेकस्यैव वा तावद्देशव्यापित्वं तत्राद्यं तावत् परमाणुषु सम्भवत्येव द्वितीयस्य तु नास्त्येवावभासो यस्यानुपपत्तिरिति चेत् न एकः स्थूल इत्यनुभवात् एक इति विकल्पमात्रमिति चेत् न अणूनां यथानुभवं निश्चयविषयत्वे ऽनेकतानिश्चयप्रसङ्गात् अयथानुभवं तु निश्चयविषयत्वे सर्वत्र प्रत्यक्षोपप्लवप्रसङ्गात् दीपशिखासन्ततावेकत्वनिश्चयवत् स्यादिति चेत् । न

(१) अन्यत्रापि च तीव्रसुकुमारादिभावेन-पा० २ पु० ।
(२) स्पर्शेनैव-पा० २ पु० । (३) अदृश्ये न्द्रिय-पा० २ पु० ।
(४) न दृश्यजनकत्वं सर्वेषामिति-पा० २ पु० ।

तत्र विरुद्धधर्मसंसर्गादत्र तु तद्विरहात् अत्राप्यावृतानावृतत्वविरुद्धधर्मसंसर्ग इति चेत् न अर्द्धावरणे ऽप्यवयविनोऽनावृतैकरूपत्वात् अनावृतैकस्वभावत्वे ऽर्द्धावृते प्राग्वत् स्थौल्योपलम्भप्रसङ्ग इति चेत् न विचारासहत्वात् स्थौल्यमवयविरूपं वा तद्धर्मरूपं वा तत्राद्यं प्रतीयत एव द्वितीयं तु तत्परिमाणं वा परिमाणसामान्यविशेषो वेति अभिव्यञ्जकभूयोवयवेन्द्रियसन्निकर्षमोषान्न प्रतीयते न त्ववयविन आवरणात् । अवयविरूपावभासे[1] ऽनावरणदशावदर्द्धावरणे ऽपि द्विहस्तत्रिहस्तत्वादिकं प्रतीयेतेति चेत् न द्विहस्ताद्यवच्छेद्यपरिमाणसमवायो वा तथाविधावयवसमवायो वा अवयविनो द्विहस्तत्रिहस्तत्वादिकं धर्मभूतं न धर्मिमात्ररूपं धर्मिप्रतीतावपि च धर्माणामप्रतीतिर्व्यञ्जकाभावादुपपत्स्यते । अस्तु तर्हि सकम्पत्वनिष्कम्पत्वमिति चेत् न भागभागिनोर्भिन्नसामग्र्यधीनकम्पकत्वेन भागानां कम्पित्वे ऽपि भागिनो निष्कम्पैकस्वभावत्वात् चलाचलयोर्युतसिद्धिप्राप्तिरिति चेत् न भेदो वा युतसिद्धिरसम्बन्धो वा नाद्य इष्टत्वात् न द्वितीयः चलाचलत्वे अपि नित्यसम्बन्धबलेनासम्बन्धविरोधात् अनित्यसम्बन्ध एव युतसिद्धिरिति चेत् न चलाचलत्वस्य तेन प्रतिबन्धाभावात् । अत्र हि तेन व्यभिचारानुपलम्भो वा प्रतिबन्धनिश्चयहेतुः व्यभिचारे बाधकं वा नाद्यः भौमत्वस्य लौहपाठ्यत्वेनैव व्यक्त्यन्तरे व्यभिचारानुपलम्भे ऽपि तच्छङ्कया नियमहेतुत्वाभावात्[2] । नेतरः तदसिद्धेः अन्यथा चलाचलयोर्वस्त्रोदकवन्न भागभागिनोः कल्पनागोचरत्वमपि स्यात् आक्रान्तदेशविभागे ऽपरदेशभागावष्टम्भः कम्पो भागिनि प्रत्यक्षसिद्धः पाणौ भागान्तरे तु नैवमितिचेत् न आक्रान्तदेशभेदेनैव केनचिदसंयोगे ऽपि केनचित् संयोगोपपत्तेः । अस्तु तर्हि महारजनसंयोगासंयोगौ विरोध इति चेत् न विकल्पानुपपत्तेः किमु यस्य संयोग-

(१) स्वरूपावभासे-पा० २ पु० ।
(२) नियमनिश्चयहेतुत्वाभावात् पा० २ पु० ।

समवायित्वं तस्याभावसमवायित्वं विरुध्यते अथ यस्य संयोगजनकत्वं तस्य तदभावजनकत्वमुतैकस्य संयोगतदभावावच्छेदकत्वमुभयावच्छेद्यत्वं वा नाद्यावसिद्धेः न तृतीयः महारजनस्यैकस्योभयावच्छेदकत्वात् न तुरीयः ज्ञानस्यैवोभयावच्छेद्यत्वात् किञ्चिदेव केनचिन्निरूप्यते स्वरूपनियमादिति चेत् तुल्यं भावाभावावेकेनैव निरूप्येते सर्वेषामेव भावाभावानामेकदेशनिरूप्यत्वं भवेदिति चेत् न भावाभाववैचित्र्यादिति मूकीभव । पृथिवी ॥

शुक्लमेव रूपमपामिति न सङ्गच्छते नीलिमादेरप्युपलम्भात् औपाधिकं तच्चन्द्रमसीव शैत्यमिति चेत् न बाधकाभावात् अन्यथा धर्मधर्मिव्यवहारविरहापत्तेः वियति विक्षिप्तानामेव कालिन्दीजलानां धवलिमप्रतीतिर्बाधिकेति चेत् न तत्रापि तेजस एव धवलिम्न उपाधिभावसम्भवात् नीलिमापि तर्हि प्रतीयेत घटादाविव तेजोमध्यवर्तिनीति चेत् न पित्ताभिभूततेजसः श्वैत्यवत् नीलिम्नोऽप्यप्रतीतेरुपपत्तेः स्फटिकादिवद्वा नापि मधुर एव रसो नियामकाभावात् तिक्तादिविलक्षणवेदनमेव माधुर्यवेदनमिति चेत् न मधुरादिविलक्षण[1]वेदनमेव हि तिक्तादिवेदनमित्यपि तुल्यत्वात् क्वचिदुल्वणतापि स्यादिति चेत् तुल्यं मधुरतायामपि षड्विपरीतवेदने ऽरसत्वमेव स्यादिति चेत् न अनुष्णाशीतस्पर्शवत् सप्तमेनाप्युपपत्तेः जम्बीरकरवीररसादावम्लतिक्तवेदनाच्च स्वाश्रयप्रत्यासत्त्या तदुपलम्भ इति चेत् न आप्यत्वे बाधकाभावात् अन्यत्र तद्विरहेणैवापामुपलम्भादिति चेत् । न पृथिव्या अपि मधुरताया आप्यत्वापत्तेः अन्यत्र तद्विरहेणैव क्षितेरुपलम्भात् स्नेहवत् नापि शीत एव स्पर्शः मध्यन्दिने जलस्योष्णस्योपलम्भात् तैजसं तदौष्ण्यमिति चेत् न रूपाध्यक्षताव्याप्यत्वात् स्पर्शप्रत्यक्षतायाः । वारिस्थतेजोरूपं प्रत्यक्षमिति चेत् न तिमिरे उष्णोदकचाक्षुषतापत्तेः तदा क्वचित् स्वभावतोऽप्युष्णतोपलभ्येतेति चेत् न कनकादिद्रवत्ववन्नैमित्तिकत्व-

(१) विपरीत-पा॰ २ पु॰ ।

नाप्युपपत्तेः रूपस्य तेजःसंयोगाजन्यत्वे कथं स्पर्शस्येति[1] चेत् न रूपस्य तादृशत्वे द्रवत्वे ऽपि तुल्यत्वात् नापि स्वाभाविकं द्रवत्वं करकादावभावात् अस्त्येव तत्रापि परं तत् प्रतिबद्धमिति चेत् न घृतादावपि तुल्यत्वात् तैले ऽपि सत्त्वाच्च तत्राप्यमेव द्रवत्वमिति चेत् न तत्राप्सम्बन्धे तैलस्य दहनप्रतिकूलतापत्तेः उपष्टम्भकमाहात्म्यान्नैवमिति चेत् न तप्ततपनीयद्रवत्वे ऽपि पार्थिवतापत्तेः उक्तयुक्तेरेवाग्निसंयोगाविनाश्यतापत्तेः यद् यद्विरुद्धं तत् कथं तदनुकूलं स्यादिति चेत् तुल्यम् नापि स्नेहोऽपामेव घृते ऽपि दर्शनात् आप्यस्य भागस्य स इति चेत् न द्रवत्वस्यापि तथात्वप्रसङ्गात् क्षितिपयसोरभेदे गन्धाद्यनुपलम्भो बाधक इति चेत् न नियतावान्तरजातिवृतित्वेनाप्युपपत्तेः अभेदः कथमिति चेत् भेदप्रतिपादकमानाभावादिति मूकीभव । जलमेव तन्न पृथिवीति चेत् न घृतमेव तन्न पृथिवीत्यत्रापि तुल्यत्वात् । मैवम् । शुक्लमेव रूपमभास्वरमपां लक्षणमिति न च तेजसा नीलिमाभिभवः घटादावभावात् न च स्वाच्छ्ययोगात् स्फटिकवदिति वाच्यम् । इन्द्रनीलादावभावात् । रसोऽपि मधुर एव कषायद्रव्येण जलमाधुर्यस्योपलम्भात् तथाहि स्नातकस्य हरीतकीरसस्वादानन्तरं वाराणसीपरिसरे कमण्डलुपरिस्खलदमलजाह्नवीजलाविरलबहलधारा[2]सु मधुराकारा मनीषोन्मिषति न च कषायद्रव्यस्यैव तत् । रसान्तराणामप्युपलम्भापत्तेः । न च जलेनैव तत्र माधुर्यमुत्पाद्यते पृथिवीरसस्याकारणगुणपूर्वकस्य पाकजत्वनियमात् न च हरीतकीमाधुर्यस्य प्रकर्ष एवाम्भसा व्यज्यते तदीयकषायादिरसानां जलानभिव्यङ्ग्यत्वदर्शनात् ततो घृतस्य कुङ्कुमगन्धाभिव्यञ्जकतावदस्यापि जलरसाभिव्यञ्जकत्वं[3] यदि वा शरदि विमलजलदव्यूहाविरलविगलदमलजलभारधारासारसञ्चारि[4]नभस्तलनिहितविमलभाजनसम्भृतमपगत-

(१) स्पर्शस्य तथेति-पा॰ २ पु॰ । (२) जलविमलधारा-पा॰ २ पु॰ ।
(३) जलमाधुर्यव्यञ्जकत्वं-पा॰ २ पु॰ । (४) धारासञ्चारि-पा॰ २ पु॰ ।

विविधोपाधिव्याधिसम्भेदममृतद्रवप्रतिमं सम्प्रतिसानन्दकर[1]म्भोऽनुभूयते किं वा जलरसस्य मधुरतावैलक्षण्यं किमनुभूयमानजातिविरहः उत शर्करादिमाधुर्यवैजात्यं अथ तेनैकजातीयताविरहः उत मधुरशब्दावाच्यत्वम्। नाद्योऽनुभवबाधितत्वात् नेतरोऽविवादात् न तृतीयः उत्कटसादृश्याननुभवे ऽपि मधुरतामात्रस्यान्नादिसाधारणस्यानुभवात् अन्यथा मेरुसर्षपयोरपि सत्ताविलयापत्तेः न तुरीयो व्यवहारबाधितत्वात् न च पृथिव्यां मधुरता आप्या शुष्यत्सु शर्करादिषु माधुर्यापकर्षस्यानुपलम्भात् शुष्यति पुनर्द्रव्ये स्नेहापकर्षात् नाप्युष्ण एव स्पर्श औपाधिकत्वात् मेदस्विस्वेदार्पकतेजसीव रूपानवभासे ऽपि स्पर्शप्रतीतेरविरोधित्वात् आप्यद्रवत्वस्यापाकजत्वव्याप्यत्वान्न कनकद्रवत्ववन्नैमित्तिकत्वं न च घृतद्रवत्ववन्दीग्रहः तस्याप्यत्वे पाकापेक्षाविरोधात् तैले चाप्यभागस्य स्नेहप्रकर्षवत्त्वेन दहनानुकूलत्वात् आप्यमेव द्रवत्वं घृतद्रवत्वस्य पाकजत्वेन पार्थिवत्वात् एवं च स्नेहोऽपामेव घृतस्नेहः पार्थिवः भौमानलेन्धनत्वादिति चेत् न प्रकर्षविशेषादेव स्नेहस्य दहनानुकूलतोपपत्तेः। आपः ॥

शुक्लमेव भास्वरं च रूपं तेजस इत्यसङ्गतमग्नेररुणादिरूपोपलब्धेः[2] कनकरूपस्य चाभास्वरत्वाच्च संयोगिपार्थिवाभिभूतत्वेन तत्राभास्वरत्वमिति चेत् न पार्थिवरूपस्य तेजोरूपानभिभावकत्वात् अन्यथा घटादावपि तत्प्रसङ्गे[3] रूपप्रत्यक्षत्वविरोधात् अनुद्भूतं तदिति चेत् न अग्रहणप्रसङ्गात्। रूपं न गृह्यत एवेति चेत् न रूपस्पर्शयोस्तैजसयोरग्रहे कनकद्रव्यस्याप्रत्यक्षतापत्तेः अभास्वरमिति चेत् सिद्धं नः समीहितम् नाप्युष्ण एव स्पर्शः पद्मरागादितेजसामनुष्णाशीतत्वात् पार्थिवस्पर्शौपाधिकी सा प्रतीतिरिति चेत् न

(१) प्रतिममप्रतिमानन्दजनकम्-पा० २ पु०।

(२) अरुणकपिशतोपलब्धेः-पा० २ पु०।

(३) तथाभावप्रसङ्गे-पा० २ पु०।

रूपानवभासे तदनवभासात् अन्यथा वायौ स्पर्शविलयात् औष्ण्यमेवैतदुद्भूतमिति चेत् न अनुष्णाशीतमात्रविलयात्। मैवम्। अग्नेररुणादिरूपप्रतीतेरौपाधिकत्वात् कनकरूपं च पार्थिवरूपाभिभूतमेव हीनत्वात् तेजोंऽशहीनतायाः कार्यैकगम्यत्वात् प्रभास्पर्शस्त्वतीन्द्रियः अनुमानादुष्ण एव तेजस्त्वादनुमीयते[1]।

ननु सुवर्णं कथं तैजसमत्यन्ताग्निसंयोगे ऽनुच्छिद्यमानद्रवत्वाधिकरणत्वादिति चेत् न सन्दिग्धानैकान्तिकत्वात्[2] किमिदमेव द्रवत्वाधिकरणं द्रवत्वाधारद्रव्यान्तरसंयुक्तं वेति। अनुभवसिद्धं द्रवत्वाधारत्वमिति चेत् सिद्धं तदा पार्थिवत्वं पीतिमगुरुत्वाधारस्यापि तथात्वात् तदौपाधिकत्वेन शङ्कितमिति चेत् तुल्यं द्रवत्वे ऽपि मैवम्।

पीतिमा च गुरुत्वं च दाहे यत्र च रक्तता।
तस्य लोकप्रसिद्धस्य स्वर्णत्वं केन वार्यते ॥
अनुच्छिन्नद्रवत्वं तु वस्तु यत्त्विह भासते।
सुवर्णव्यवहारोऽयं तत्र शास्त्रे प्रवर्तते ॥
वस्तुभेदे प्रसिद्धे ऽपि शब्दसाम्यं प्रवर्तते।
रसः स्वभावमधुरो ध्वनिश्च मधुरो यथा ॥
भूसंसर्गवशाच्चास्य रूपं नैव प्रतीयते।
स्फटिकस्य जवायोगाद् यथारूपं न भासते ॥

न वात्यन्तानलसंयोगे ऽनुच्छिद्यमानत्वात् गुरुत्वमप्यभौमं स्यात् अत्यन्ताग्निसंयोगेन नष्टगुरुत्वस्यैव पुनरुत्पादात्[3] काठिन्यवत् न च द्रवत्वमत्यन्तमुच्छिद्यते अत्यन्तानलसंयोगे ऽपि प्रत्यक्षसिद्धत्वात् गुरुत्वाश्रयस्य भौमत्वे दाहः स्यादिति चेत् न दाहो यदि भस्मता तदा वज्रेण व्यभिचारः रूपान्तरोत्पत्तिश्चेत् भवत्येव न प्रतीयते च तदा तेजोरूपेणाभिभूतत्वात् प्राकृतरूपापत्तिस्त्व-

(१) अवगम्यते-पा० २ पु०। (२) सन्दिग्धासिद्धत्वात्-पा० २ पु०।

(३) उत्पत्त्यविरोधात्-पा० २ पु०।

ग्निसंयोगनाशादौषधादासादितदाहस्येव देहस्य । तेजः ॥

ननु वायुसत्त्वे किं प्रमाणम् अध्यक्षमनुमानं वा नाद्यः अरूपिद्रव्यत्वात् नेतरो लिङ्गाभावात् स्पर्शादिचतुष्कं लिङ्गमिति चेत् न स्पर्शस्य धराश्रयत्वेनाप्युपपत्तेः रूपाभावान्नैवमिति चेत् न उष्णशीतस्पर्शयोरपि वायवीयत्वप्रसङ्गात्[1] तयोरनुद्भूतरूपत्वादग्रहणमिति चेत् तुल्यमनुष्णाशीते ऽपि शब्दोऽपि चोद्भूतस्पर्शवद्वेगवद्द्रव्याभिघातज[2] एव स्यात् गन्धरूपयोरग्रहणान्नैवमिति चेत् न अनुद्भूतत्वेनापि तयोरुपपत्तेः अप्रतिघातान्नैव पार्थिवमिति चेत् न धूमवदुपपत्तेः अप्रतीयमानरसवत्त्वान्नैवमिति चेत् न अनुद्भूतत्वेन जले द्रवत्वाप्रतीतिवदुपपद्यते[3] गुरुत्वाभावान्नैवमिति चेत् न तदसिद्धेः अपातात् तत्सिद्धिरिति चेत् न वेगेनैव काण्डादिवदपातसम्भवात् तस्य सदागतित्वेन वेगत्यागासम्भवात्[4] अन्यथा वायूपनीतजलानलपृथिवीनामपि प्रतीतिवैलक्षण्यात् द्रव्यान्तरताप्रसङ्गात् कल्पनालाघवाद्धर्ममात्रमुपकल्प्यते न तु धर्मीति चेत् तुल्यं वायावपि धृतिरपि तत्संयोगादेवोपपत्स्यते ब्रह्माण्ड इव वा पारमेश्वरयत्नादेव स्यात् कम्पोऽप्येतेन व्याख्यातः। वह्नेस्तेजोविशेषस्योर्ध्वगमननियमवत् भुवोऽपि तिर्यग्गतिरुपपत्स्यते अत एव च मेघादिप्रेरणं व्याख्यातम्। जाठरानलवच्च पार्थिवः कश्चिदन्तःशरीरसञ्चारी प्राणः स्यादिति न वायुसिद्धिः। मैवम्। त्वगिन्द्रियस्य गन्धाग्राहकत्वेन रसनवदपार्थिवत्वात् रूपरसाग्राहकत्वेनैवातैजसानाप्यत्वात्[5] शब्दाग्राहकत्वेनानाभसत्वात् बहिरिन्द्रियत्वेन मनोव्यतिरेकित्वात् अत एव ग्राह्यजातीयविशेषगुणवत्त्वेन स्पर्शवत्त्वाद् द्रव्यान्तरप्रकृतिकत्वेन वायुसिद्धिः न च गन्धाग्राहकमपि अदृष्टविशेषसाहित्यात् पार्थिवमिति वाच्यं सर्वेन्द्रियाणामपलापप्रसङ्गात् स चायं स्पर्शाश्रयः सिद्ध इति स एवान्यत्र कल्प्यते लाघवात् पृथिवीत्वे तु

(१) वायवीयत्वापत्तेः-पा० २ पु०।
(२) पृथिवीद्रव्याभिघातज-पा० २ पु०। (३) उपपत्तेः-पा० २ पु०।
(४) त्यागाभावात्-पा० २ पु०। (५) अतैजसाप्यत्वात्-पा० २ पु०।

रूपानुद्भवादिकल्पनागौरवमेव । व्यजनानिलश्च ग्राह्यजातीयासाधारणगुणोद्भवापेक्षः स्पर्शव्यञ्जकः सावयवेन्द्रियव्यवस्थापकगुणेषु एकस्यैव व्यञ्जकत्वात् आलोकवत् न चेदेवं मेदस्विनां स्वेदिनामन्धकारे समस्तवस्त्ववभासापत्तिः अनुद्भूतस्पर्शानिलस्य तु शैत्याभिव्यञ्जकतापत्तिः स च स्पर्शो वायवीयः स्पर्शासाधारणव्यञ्जकत्वात् त्वक्स्पर्शवदिति वा अपार्थिवत्वसिद्धिः रूपरहितत्वाद्वा । एवं सति शीतोष्णत्वे अपि वायौ स्यातामिति चेत् न तस्यानुद्भूतरूपत्वात् । न चात्राप्यनुद्भवः पार्थिवरूपस्पर्शयोः समानयोगक्षेमत्वात् अन्यथोद्भूतरूपानुद्भूतस्पर्शस्यापि पार्थिवस्य सत्त्वापत्तेः। न चाभिभवो मन्दालोक उपलम्भापत्तेः अगन्धवत्त्वाच्च। अनुद्भूतत्वात् तदसिद्धिरिति न वाच्यम् स्पर्शोद्भवव्याप्तत्वा[1]द्गन्धोद्भवस्य । कश्चिदेव स्पर्शस्तथा न सर्व इति चेत् न दृश्यादृश्योपाधिव्युदासे व्यतिरेकशङ्कानवकाशात् । अनभिव्यक्तत्वात् कुङ्कुमगन्धवत् पूर्वं नावभासते चम्पकादिगन्धसम्भेदे त्ववभासत इति चेत् न व्यञ्जकातिरिक्त[2]गन्धानवभासात् चन्दनगन्धि सलिलमितिवदौपाधिकत्वेनैव प्रतीतेश्च। न चायं ज्वलनवदुद्गमनशीलो वात्यादौ शुकशुकादिनादविसदृशमेघसङ्घट्टजातीयवाताघातशब्दानुमाने ऽवश्योन्नेयपरस्पराहतेरेवोद्गमनोपपत्तौ स्वभावकल्पनाया अनवकाशात् ॥ वायुः ॥

ननु बहिरिन्द्रियाणीतरेभ्यो भिद्यन्ते इन्द्रियत्वान्मनोवत् मनसोऽपि भिद्यन्ते अनात्मगुणग्राहकेन्द्रियत्वात् । घ्राणं पार्थिवं स्यादिति चेत् न महतः पार्थिवस्य गन्धरूपरसस्पर्शेष्वन्यतमोद्भूतत्वेन व्याप्तत्वात् तादृशस्य च प्रत्यक्षबाधितत्वात् अन्यथा वायावपि पार्थिवस्पर्शस्यैव प्रतीतिप्रसङ्गात्। गन्धस्यैव व्यञ्जकत्वात् तत्त्वमिति चेत् न नवशरावादौ जले ऽपि तद्दर्शनात्। जलं गन्धोत्पादकमिति चेत् न कणभक्षमते आश्रयनाशं विना तदनुपपत्तेः। त-

(१) स्पर्शोद्भवो व्याप्तो येनेत्यर्थः। (२) व्यञ्जकगन्धातिरिक्त-पा० २ पु०।

न्नष्टमिति चेत् न तन्नाशहेतोर्घनद्रव्याभिघातस्याभावात्। स्पर्श-
स्यापि जलं व्यञ्जकमिति चेत् न अनुष्णाशीतस्पर्शस्य पूर्वम-
प्युपलम्भात् शीतस्पर्शस्य च भुवामसम्भवात् अन्यस्याननुभवा-
त्। चक्षुरपि न तैजसं तस्य कोशादिव्यापिनो रूपस्पर्शयो[१]र-
न्यतरोद्भवनियमात्। अन्यथा जलजातीयतापि कल्प्येत। त्वग-
पि न वायवीयमिन्द्रियं वायोः स्पर्शशब्दधृतिकम्पलिङ्गस्य तदभाव
एवाभावावधारणात्[२] घ्राणस्येव पाणाविति हेतुसम्भवात्। उ-
द्भूतस्पर्शस्यैवमिति चेत् न घ्राणे ऽपि तत्त्वप्रसङ्गात्। रसनमपि
नाप्यमिन्द्रियत्वेनाभौतिकत्वान्मनोवत्। न चेदेवं मनसोऽपि पा-
र्थिवत्वापत्तिः। श्रोत्रं च न स्वगुणग्राहकमिन्द्रियत्वात् मनोवत्।
योग्यविशेषगुणशून्यत्वमत्रोपाधिरिति चेत् न योग्यविशेषगुण-
शून्यत्वस्यात एवानुमानात्। इन्द्रियाणि न भौतिकानि इन्द्रियत्वा-
न्मनोवत् अन्यथा मनोऽपि भूतात्मकमेव स्यात्। अनारम्भकत्वं तत्र
बाधकमिति चेत् न तस्याप्यसिद्धेः यदा मनः पुरीतति वर्तते
तदाल्पमवयविनमारप्स्यते ऽपीत्यविरोधात्। प्रयोजनाभावात् तद-
सिद्धिरिति चेत् न सर्वप्रयोजनानामस्मादृशैरनाकलनात्। अ-
पि चान्धतमसमचाक्षुषमालोकासहकृतेन्द्रियग्राह्यत्वात्[३] एवमपि
तत्सामर्थ्यकल्पनायां चक्षुरेवैकमिन्द्रियं देहव्यापकमनुद्भूत[४]मस्तु
तच्च कतिभिरपि भागैः स्वाधिष्ठानवृत्ति बहिर्वृत्ति च स्यादिती-
न्द्रियनानात्वापलापः। वेद्यप्रच्युतिपरिच्छेदे नेन्द्रियाणां वि-
षयसहकारित्वं सर्वत्राभावाग्रहणप्रसङ्गादित्यालोकानपेक्षेति चेत् न
अनपेक्षा कथञ्चिदस्तु तथाप्ये तद्धेतुकचक्षुर्वैजात्यसिद्धेः।
कथं तर्हि युगपद्घटतिमिरदीपादीनामुपलम्भ इति चेत् न क्रमे-
ण मनसा तदधिष्ठाने सूक्ष्मकालभेदसम्भवात् तदिन्द्रियाणि मनो-
वद् द्रव्यान्तराण्येवेति नवैवेति व्याघातः। अत्रोच्यते। बहिरि-

(१) रूपरसयोः-पा॰ १ पु॰। (२) एव बाधावधारणात्-पा॰ २ पु॰।
(३) वेद्यत्वात् गन्धवत्-पा॰ २ पु॰। (४) अनुद्भूतरूपस्पर्शम्-पा॰ २ पु॰।

न्द्रियग्राहकमानेनाद्यहेतुबाधात् यद् यद्ग्राह्यविशेषगुणव्यञ्जकं तत् त-
द्ग्राह्यविशेषगुणाश्रय एव यथा वायुतेजसी। न चास्य शङ्कितव्यभि-
चारित्वं दृश्यादृश्योपाधिव्युदासे साध्येतरत्वोपाधेर्बाधैकगम्य-
स्य तदभावेनाभावे तदनुपपत्तेः। न च जलेन व्यभिचारः रसे
ऽपि व्यञ्जकत्वात्। नापि पार्थिवे योग्यतानियमः तेजोवदनुद्भूतरू-
पस्पर्शत्वाद्यविरोधात् न च वायुवन्दी ग्रहः तत्र विशेषस्योक्तत्वा-
त्। चक्षुश्च विचित्रमपि स्यात् अविन्धनतेजोवत् तैजसं गुणेषु
रूपस्यैव व्यञ्जकत्वात् दीपवत्। एवं रसनमपि। क्षित्यादेरश्रोत्रत्वे
ऽजसंयोगाभावात् शब्दद्रव्यत्वनिषेधे श्रोत्रस्य स्वगुणग्राहकत्वा-
त्। न चान्धकारग्राहकमन्यत् निषेध्यनिषेधयोः समानेन्द्रियवेद्यता-
नियमात् व्याघाताच्च प्रतियोगिसहकारित्वस्यापि प्रतिक्षेपात्[१]।
मनःप्रतिवन्दिग्रहस्य मनस्येव निरसनात्। तथापि विशिष्टादृष्टो-
पगृहीतं[२] गोलकमेवास्त्विन्द्रियं कर्णशष्कुलीवत् न च व्यव-
हितोपलम्भापत्तिः योग्यदेशस्थस्यैव ग्राह्यत्वात् अन्यथा महा-
निशि ऋजुवस्त्वग्रहणप्रसङ्गात्[३] पवनेन तेजसां दूरमपनयनात्।
तेजोभेदे नैवमिति चेत् न कराभ्यामप्यावरणानुपपत्तेः[४] शाखा-
चन्द्रमसोः समसमयवेदनाच्च। न च तद् भ्रान्तं यौगपद्यमात्रप्रतिक्षे-
पापत्तेः। तत्र बाधकाभावादिति चेत् न तुल्यत्वात्। एतेन रसना-
दिकमपास्तम्। त्वगपि च देहव्यापी उद्भूतस्पर्शः पवन एवास्ता-
मिति नातीन्द्रियतासिद्धिरिति चेत् न का देशस्य योग्यता स्व-
रूपभेदो वा इन्द्रियप्राप्तिर्वा। नाद्यः। दिगन्तरस्थेन सत्यावरणे
तदनुपलब्धेः। पुरुषान्तरं प्रति तदावृतमिति चेत् न एकस्यावृता-
नावृतत्वविरोधात्। ज्ञातृभेदेनैकस्यैव ज्ञातृपुरोवर्तिकुड्यादिपराप-
रदेशसंयोगित्वं तत्त्वमविरुद्धमिति चेत् न आवृतप्रकाशकत्वेन

(१) प्रतियोगिग्राहकत्वस्यापि प्रतिक्षेपात्-पा॰ १। ३ पु॰।
(२) अदृष्टविशेषोपगृहीतं-पा॰ २ पु॰।
(३) प्रसङ्गः-पा॰ २ पु॰। (४) अनावरणापत्तेः-पा॰ २ पु॰।

दीपवत् प्राप्यकारित्वसिद्धेः। नेतरः। तत एवाधिष्ठानबहिर्भूतेन्द्रियसिद्धेः। ऋजुवस्तुग्रहोऽपि तस्यातिशयितवेगत्वेनाप्रतिबन्धात् तस्य च फलोन्नेयत्वात् अचिरदीधितिसंयोगवत्। अत एव यौगपद्यस्य भ्रान्तत्वम्। त्वगपि चान्य एव पवनः तस्येन्द्रियत्वेनानुद्भूतस्पर्शानुमानात्(१)। न चात्रानियमशङ्का निरुपाधित्वात् स्पर्शवदिन्द्रियत्वाच्च। रसनादयोऽप्यवयविन इति सिद्धमिन्द्रियम्॥

ननु शरीरं नाम द्रव्यान्तरं भूतचतुष्कप्रकृतित्वात् तथाहि गन्धवत्त्वात् तत् पार्थिवं यथा तथा जलानलानिलप्रकृतिक(२)मपि द्रवत्वस्य स्यन्दनहेतुत्वात् उष्णतायाश्च पाकहेतुत्वात्। एतेन उष्णं जलं शीतः शीतमयूखरश्मिरित्युपपद्यते। न चैतदुपष्टम्भकसन्निधिप्रयुक्तं गन्धे ऽपि तथाप्रसक्तेः। न च पार्थिवाप्यभागौ सम्भूयारभेते विजातीयत्वात् आप्यतैजसभागवदिति साम्प्रतं दृष्टान्तस्य साध्यविकलत्वात्। तयोरारम्भकत्वे आरब्धस्यागुणवत्त्वं स्यादिति तत्सिद्धिरिति चेत् न तदसिद्धेः। शीतोष्णयोर्भास्वराभास्वरयो रसतदभावयो रूपरूपाभावयोर्विरोधोऽस्तीति चेत् न एकैकशः सजातीयारम्भे ऽपि विजातीयसान्निध्यान्नीलानीलरूपकदम्बस्य विलक्षणरूपजननवदस्यापि विचित्रकार्यजनकत्वात्। मैवम्। नीलपीतादिरूपकदम्बस्य यथा विचित्ररूपजनकत्वमध्यक्षसिद्धं न तथा पृथिव्यादीनां विजातीय(३)कार्यजनकत्वं भूजलप्रभवे विलक्षणे वस्तुनि मानाभावात् ततो गन्धवतां गन्धवत्पृथिवीजातीयजनकत्वनियमात् जलस्य निर्गन्धजनकत्वनियमस्याविप्लुतत्वात् एकं शरीरं गन्धवत् निर्गन्धं क्षितिजलादिजातिमच्च स्यादिति विरोधात्। किञ्च कार्यस्य वैलक्षण्यं गन्धवन्निर्गन्धतादात्म्यमुभयबहिर्भूतत्वं वा अन्यतररूपत्वं वा। नाद्यौ। विरोधात्। नेतरः। गन्धवता गन्धवर्ज्जनने ऽगन्धवताप्यगन्धोत्पादनात् अन्य-

(१) स्पर्शत्वानुमानात्-पा०२ पु०। (२) जलानलप्रकृतिक-पा०२पु०।
(३) विचित्र-पा० २ पु०।

तररूपत्वानुपपत्तेः। एतच्चित्ररूपे तुल्यमिति चेत् न तत्र नीलस्यानीलचित्ररूप(१)जनकताया अनुभवसिद्धत्वात्। तच्च द्विविधं योनिजमयोनिजं च। शेषे प्रमाणं नास्तीति चेत् न पृथिवी अयोनिजशरीरारम्भिका आरम्भहेतुत्वात् जलवदिति तत्सिद्धेः। तदसिद्धमिति चेत् न जलं शरीरजनकमिन्द्रियारम्भकत्वात् पृथिवीवदिति तत्सिद्धेः अन्यथेन्द्रियमपि नारभेतादृष्टरूपत्वात्। आप्यं शरीरं योनिजमिति चेत् न भूमण्डले बुद्बुदोपमदेहानुपलब्धेः। करकादिवत् प्रतिरुद्ध(२)द्रवत्वमिति चेत् न भौमेनोष्मणा विलयनाभावात् भूवर्तिनां शरीराणां गन्धवत्त्वेन पार्थिवत्वात्। तदौपाधिकं किं न स्यादिति चेत् न आनाशमनपायित्वात्। सुवर्णगुरुत्ववदेतत् स्या(३)दिति चेत् न अत्र बाधकसत्त्वात् अन्यथा धर्मधर्मिव्यवहारोच्छेदप्रसङ्गात् शैत्यादीनां देहशोषे ऽपि निवृत्त्युपलब्धौ तदेव बाधकं तथाहि न(४) वायवीयं रूपवत्त्वात् न तैजसं दहनेन भस्मीभावात् नाप्यं कदाचिदनुपलभ्यमानस्वाभाविकद्रवत्वात् ततोऽपामयोनिजशरीरारम्भकत्वं दृष्टम्। स्वर्गसुखं कस्यचिद्देहिनो भोग्यं सुखत्वात् न चास्मदादिस्तथा भूचराणां सप्तद्वीपेश्वराणामपि तादृशसुखानुभवाभावात्(५) न चायं नित्यो देहोऽमुक्तिप्राप्तेः। न चादृष्टोपग्रहनिवृत्तौ मानसो न्याय इति वाच्यं कल्पनागौरवात्। न च तद्योनिजं गर्भवासादिदुःखवेदनादिभिः स्वर्गित्वव्याघातात्। तत्र दुःखहेतुरिति चेत् न अदृष्टकल्पनापत्तेः शिववरुणमहेन्द्रादिभुवनसुखाभिलाषात् पौराणिकविधिप्रवृत्तेश्च। न च मर्त्यातिशयितसुखप्रतिपादनपरं तदिति वाच्यं दुःखे ऽपि तथाप्राप्तौ महापातकादौ प्रवृत्तिप्राप्तेः अर्थित्ववैचित्र्याद्विचित्रवित्तव्ययाननुष्ठानापत्तेश्च अन्यथा वेदाचाराणामपि विप्लवप्रसङ्गात्। तथापि भुजगमृगादिर्देहातिरेकीति चेत् न इन्द्रियाश्रयत्वेन

(१) अनीलरूपचित्ररूप-पा० ३ पु०। (२) प्रतिबद्ध-पा० २ पु०।
(३) गुरुत्ववत् स्यात्-पा० २ पु०। (४) न तावत्-पा० २ पु०।
(५) सुखानामभावात्-पा० २ पु०।

तस्यापि देहत्वात् देहव्यवहारस्य मनुष्य एवोल्वणत्वात् तत्सादृश्यस्य च तत्राभावात् करकादौ जलव्यवहारवत् तत्रापि न लौकिकेतरसाधारणो देहव्यवहार इति सुस्थं शरीरम् ॥

ननु मृत्पाषाणमणिवज्र[1]सरित्समुद्रकरकादीनि द्रव्याणि[2] भवन्ति[3] विलक्षणबुद्धिवेद्यत्वात् जलवत् अन्यथा तदप्येकजातीयं स्यात् न भुजगमृगादिषु शरीरबोधवदुपपत्तेः[4] । न च जलादिवन्दीग्रहः स्नेहादिसमवायिकारणत्वेन भिन्नजातीयत्वात्[5] । वज्रे ऽप्यलौहलेख्यत्वं बाधकं करकादौ स्वाभाविकमद्रवत्वं शीतमयूखमयूखादौ च शैत्यमिति चेत् न द्रव्यं हि स्पर्शाधिकरणमन्यच्च आद्ये उष्णाधिकरणमन्यथा वा अन्यथापि शीताधिकरणमन्यादृशं च तत्त्वे अनुष्णाशीताधिकरणमेव अन्यादृशस्पर्शानुपलब्धेः अत्र द्वितीये अनित्यताव्याघातः प्रथमे तेजस्त्वं द्वितीये जलत्वं चरमे क्षितिपवनयोरन्यतरत्वमिति नवबहिर्भावाभावात् । वज्रं तु पार्थिवमपि लौहलेख्यं न भवति शक्तिभेदात्[6] अविन्धनविद्युत्तेजोवदित्यादि विस्तरस्तूह्यो बहुलत्वात् ॥ विषयः ॥

अत्र भाष्ये संहारविधिरुक्तः स नास्ति प्रमाणाभावादित्येके । तथाहि विश्वसन्तानोऽयं दृश्यसन्तानशून्यैः समवायिभिरारब्धः सन्तानत्वात् आरणेयसन्तानवदित्यत्र विश्वशब्देन ब्रह्माण्डपक्षीकरणे चतुर्महाभूतसन्तानावासस्य तस्यासिद्धावाश्रयासिद्धिः कार्यसन्तानमात्रपक्षीकरणे क्रमारब्धदहनपवनसन्तानन्यायादारम्भे ऽपि प्रलयासिद्धेः सिद्धसाधनात् एकदेतिविशेषणे तेनैव व्यभिचारित्वात् एकदारम्भहेतुसाकल्ये सतीतिविशेषणे विशेषणासिद्धिः एकदापीतिपक्षे विरोधात् सर्वकार्याणां च युगपदनुत्पत्तेश्च । एतेन

(१) मणिवज्रेति नास्ति २ पु° । (२) द्रव्यान्तराणि-पा° २ पु° ।
(३) भवन्तीति नास्ति २ पु° ।
(४) भुजगमृगादिशरीरभेदवदुपपत्तेः-पा° २ पु° ।
(५) भिन्नजातीयत्वसाधनात्-पा° २ पु° ।
(६) लोहालेख्यम् शक्तिभेदात्-पा° २ पु° ।

ब्रह्माण्डपरमाणवः पूर्वमुत्पादितसजातीयान्तराः[1] परमाणुत्वात् दीपारम्भकपरमाणुवदित्यादि प्रतिक्षिप्तं बालतरुणवृद्धसन्तानवदारम्भकत्वस्वीकारः[2] । न च तत्स्थापकादृष्टनाशादेव तन्नाश इति वाच्यं तस्यापि प्रवाहित्वेनैकफलोपभोगे ऽपि देहारम्भकादृष्ट[3]वन्नाशानुपपत्तेः । न च ह्रासदर्शनात्[4] तदनुमानं दिनरात्रिह्रासैरेव[5] व्यभिचारात् चतुर्युगपरिवर्तस्तु स्यादेव ऋत्वयनवत् । न च सन्तानाः कदाचित् समुच्छिद्यन्ते सन्तानत्वात् सम्प्रतिपन्नसन्तानवदिति[6] वाच्यं क्रमोच्छिन्नानां सन्तानानां कदाचिदपि तदभावेन व्यभिचारात् विपरीतनिश्चयाच्च ब्रह्मवर्षशतमितिगणितभेदगम्यः कालः महाभूतसङ्घातवान् कालत्वादिदानीमिव । तत्समयवर्तिनश्च वर्णाः सजातिसन्ततिजन्मानः वर्णत्वात् अधुनातनवर्णवत् । न चारणिप्रभवज्वलनन्यायः असति बाधके निश्चितहेतुफलभावस्य विशेषानिष्ठत्वविरोधात् अन्यथेन्धनधूमादावपि तथाभावापत्तेः । मैवम् । सर्व एव परमाणवः कदाचित् समग्रोपादेयप्रबन्धशून्या आरम्भकत्वात् नष्टपवनारम्भकपरमाणुवत् न च किञ्चिदेतादृशं न भविष्यतीत्यनैकान्तता पवनत्वादेर्दहनादावसम्भवेनानुपाधित्वात् । भूगोलकसन्तानश्च कदाचित् साकल्येनोच्छिद्यते सन्तानत्वात् दीपसन्तानवत् सन्तानत्वं चाङ्गाङ्गिप्रवाहत्वम् । एकावयवित्वमस्यासिद्धं नानावयवित्वे तु क्रमनाशे ऽपि सिद्धसाधनं यौगपद्ये तु व्यभिचार इति चेत् न एवं सति तरुगिरिदहनपवनादिष्वपि संयोगादेकस्थूलबोधोपपत्तौ सर्वत्रावयविनोऽसिद्धिप्राप्तेः तदसिद्धावपि चैकसमुदायप्रत्ययगोचरत्वेन सावित्रतेजोवदुच्छेदसाधनात् उच्छेदस्तु क्रमेणैव यौगपद्येन वास्तु किं

(१) सजातीयसन्तानान्तराः-पा° २ पु° ।
(२) देहसन्तानवदारम्भस्वीकारात्-पा° २ पु° ।
(३) देहान्तरारम्भकादृष्ट-पा° २ पु° ।
(४) क्रमदर्शनात्-पा° १ पु° । (५) दिनरात्रिक्रमैरेव पा° १ पु° ।
(६) सम्प्रतिपन्नसन्तानवदिति नास्ति २ पु° ।

तु साकल्येन साध्यः न चासावेकदेशावस्थितौ सम्पद्यते । अनुपभुक्तसमस्तप्राणिकर्माणि युगपन्निरुद्धवृत्तीनि अनुपभुक्तविचित्रकर्मत्वात् सुषुप्तिसमयवर्तिकर्मवत् । न चैवं भूतोच्छेदानुपलब्धेर्नैवम् । उत्पत्तेरनुपलम्भादनुत्पत्तिप्राप्तेः[1] स्वभावादेव चावयवित्वप्रसङ्गात् घटादेरपि तथाभूतस्य नित्यताप्राप्तेः[2] । न च ब्रह्मवर्षशतनियमः प्रलयस्य पुराणप्रसिद्धेः समयप्राचुर्योपलक्षणपरत्वात् तथा च कालविशेषस्य प्रत्यक्षादेरसिद्धावाश्रयासिद्धेः आगमात् तत्सिद्धौ तु तेनैव बाधात् कश्चित् काल इत्युपादाने सिद्धसाधनात् सर्वपदोपादाने तु विशेषणवैयर्थ्यं तत्सङ्ग्राह्यप्रलयसमयाप्रतीतेः प्रतीतौ च बाधात् एतद्बाधकबलेन वर्णव्यवस्थापि आरणेयसन्ततिवदिति ।

ईश्वरोऽपि न द्रव्यान्तरम् । प्रमाणाभावात् असिद्धेरित्येके तन्न विवादाध्यासितं सकर्तृकं कार्यत्वाद् घटवदित्यनुमानस्य सत्त्वात् सकर्तृकत्वं चोपादानगोचरापरोक्षविज्ञप्तिचिकीर्षाकृतिमज्जन्यत्वमिति[3] न सिद्धसाधनम् । कर्तुः शरीरनियतत्वेनाध्यक्षबाध इति चेत् न बाह्याध्यक्षाणां ज्ञानादावयोग्यत्वात् मनसः स्वात्मैकगुणग्रहणयोग्यतानियमात् दृश्यानुपलब्धेरसिद्धेः । शरीरस्य तद्व्यापकस्यानुपलब्धेः कर्तुरभावनिश्चय इति चेत् न व्यापकानुपलम्भस्यानुमानतया बाधमुपक्रम्य सत्प्रतिपक्षमापादयतोऽभुक्तवान्तिप्रसङ्गात् । शरीरिकर्तृसाधनादभिमतविशेषविरुद्धो हेतुरिति चेत् न कार्यत्वस्यानुपलब्धव्यभिचारसाहचर्यबलेन वा विपरीतविशेषसाधकत्वं तथाभूतविशेषप्रतिबन्धबलेन वा । नाद्यः । उत्कर्षसमत्वात् । द्वितीये तु स्वसिद्धाविनाभावबलेन परसिद्धाविनाभावबलेन वा । नाद्यः । अपसिद्धान्तात् । नेतरः । परस्यासिद्धेः । परं प्रति साधितेन नियमेनेति चेत् न प्रमाणेन तत्साधने

(१) अनुत्पत्तेः-पा० २ पु० । (२) नित्यतापत्तिः-पा० २ पु० ।
(३) कृतिजन्यत्वमिति-पा० २ पु० ।

ऽपसिद्धान्तात् अप्रमाणेन साधनानुपपत्तेः साध्यव्यापकत्वेन साधनाद्विरोध इति चेत् । न । अनपेक्षितविशेषस्य शरीरित्वानियमे तादृशे[1] साध्ये पक्षधर्मताविरोधात् तदविरोधस्य चानुमानाङ्गत्वात् अन्यथा परमते ऽसर्वज्ञकर्तृत्वसिद्धेर्दुर्वारत्वात् । नापि व्याप्तिपक्षधर्मतयोरनीश्वरेश्वरकर्तृगोचरयोर्विरोधाद्विशेषविरोधः सामान्यव्याप्तेर्विशेषविषयया पक्षधर्मतयाऽविरोधात् विशेषव्याप्तेश्चानुमानानङ्गत्वात् । नाप्यर्थाक्षिप्तविशेषविरोधात् साध्यबाधो विशेषविरोधः । केन पुनः साध्ये[2] शरीरादिमत्कर्तृकत्वमाक्षिप्तं कर्तृमत्त्वेनेति, चेत् अप्रतीतेन वा प्रतीतेन वा । नाद्यः । अप्रतीतस्यानाक्षेपकत्वात् प्रतीतेस्तु साधनस्य निर्दोषत्वमन्तरेणानुपपत्तेः पराभ्युपगमसिद्धेन[3] तदाक्षिप्तमिति चेत् । न । तस्य[4] व्यापकानुपलम्भस्वभावत्वेन सत्प्रतिपक्षपक्षनिक्षेपात् । ननु दृश्येन कर्त्रा व्याप्तिर्गृह्यते दृश्यादृश्यसाधारणेन वा । नाद्यः । विटपादिना व्यभिचारात् । नेतरः । तथाभूतस्य व्यतिरेकग्रहे प्रत्यक्षस्यासामर्थ्यात् सामर्थ्ये वा विटपादिना व्यभिचारात् । किं च साधारणेनापि व्याप्तिं गृह्णदध्यक्षं देशकालव्यवधानादृश्यमेव विषयीकरोति न स्वरूपादृश्यं स्वरूपादृश्ये प्रत्यक्षस्यासामर्थ्यात् सामर्थ्ये तु धूमस्यापि जठरसाधारणकृशानुव्याप्तिः स्यात्[5] । उच्यते । कार्यत्वसकर्तृकत्वयोरनुपाधिनान्वयेन प्रतिबन्धावधारणात् कार्यकारणयोरिव अन्यथा कार्यमात्रस्य कारणमात्रेण प्रतिबन्धावधारणेऽपि परोदीरितदूषणकलापः सम्भवत्येव कार्यस्याहेतुकत्वे कादाचित्कत्वं न स्यादिति विपक्षे बाधकः । तत्र प्रतिबन्धग्रहो न त्वन्वयव्यतिरेकाभ्यामिति चेत् । न । अहेतुकस्याकादाचित्कत्वेन प्रतिबन्धासिद्धेः व्यभिचारानुपलम्भेन तत्सिद्धिरिति चेत् । न ।

(१) नियमेन तादृशि-पा० २ पु० । (२) पक्षे इत्यर्थः ।
(३) पराभ्युपगमसिद्धेन-पा० १ पु० ।
(४) आक्षिप्तशरीरकर्तृबाधकरूपस्य विशेषविरोधस्येत्यर्थः ।
(५) कृशानुजातीयमात्रेण व्याप्तिः स्यात्-पा० १ पु० ।

सर्वादृष्टेश्च सन्देहात् स्वादृष्टेर्व्यभिचारतः ।
योग्यादृष्टेरसद्भावात् प्रतिबन्धो न सिध्यति ॥

विपक्षे[1] बाधकात् प्रतिबन्धसिद्धि[2]रिति चेत् । न । अहे-
तुकस्य कादाचित्कत्वे बाधकाभावात् । शशविषाणमहेतुकं का-
दाचित्कं स्यादिति बाधकमिति चेत् । न । सद्विशेषस्याहेतुकस्य
कादाचित्कत्वं भविष्यतीति शङ्काया अनिवारणात्[3] । यथा च
सहेतुकत्वाविशेषे ऽपि कस्यचित् प्रतीतिरूपत्वमप्रतीतिरूपत्वं
च कस्यचित् तथा अहेतुकत्वे ऽपि कस्यचित्तु कादाचित्कत्वम-
कादाचित्कत्वं च कस्यचित् भविष्यतीति तथा च क्षित्यादिकं
सकलहेतुरहितमेवास्तु । न चानुपाधित्वमसिद्धम् । न तावद्व्यक्तिभेदा
उपाधयः सामान्यव्याप्त्युच्छेदप्रसङ्गात् । न चावान्तरजातिभेदा
उपाधयो घटत्वादयः तेषां परस्परव्यभिचारित्वात् व्यक्तिभेदवत् ।
नाप्यतीन्द्रियो विशेषः कार्यविशेषात् कारणविशेषानुमानोच्छे-
दप्रसङ्गात् धूमे ऽपि दहनानुमाने तथाभूतोपाधिशङ्काया अनिवा-
रणात् । न च शरीरिकार्यत्वमुपाधिः उभयोरनुपलभ्यमानव्यभि-
चारयोः समानयोगक्षेमत्वेनोपाधिसद्भावासिद्धेः । न च मित्रा-
तनयत्वश्यामतासाहचर्ये ऽप्येष न्यायः तत्रोपाधिसाधकस्य
न्यायस्यावश्यव्यञ्जनीयत्वात् । धूमे तु न जठरसाधारणदहनानु-
मानं तेजोमात्रस्य धूमोत्पत्तौ व्यभिचारात् दाहकस्पर्शाधिष्ठान-
स्यैव तेजसो धूमजनकत्वनियमात् ।

कर्मनिर्मितवैचित्र्यं यदि विश्वमनीश्वरम् ।
अस्त्वनिर्मितवैचित्र्यं जगदेतदहेतुकम् ॥

कर्तृव्यापकशरीरानुपलम्भेन सत्प्रतिपक्षत्वमस्त्विति चेत् । न ।
ईश्वरमधिकृत्याश्रयासिद्धेः क्षित्यादिकमधिकृत्य[4] सिद्धसाधनात् ।
शरीरिकर्तृकत्वव्यापकानुपलम्भेन सकर्तृकत्वं निवर्तत इति चेत् ।

(१) विपर्यये-पा० २ पु० । प्रकाशसम्मतश्च ।
(२) प्रतिबन्धनिश्चयः-पा० २ पु० । (३) अनिराकरणात्-पा० २ पु० ।
(४) क्षित्यादिकं कर्तृ नेति साध्य इत्यर्थः ।

न । सकर्तृकत्वं शरीरिकर्तृत्वाद् भेदेन[1] प्रतीतं न वा न चेत् व्याप्य-
व्यापकयोरप्रतीतौ व्याप्तेरसिद्धेः प्रतीतं[2] चेत् अशरीरकर्तृकत्वसि-
द्धौ व्यभिचारः । प्रतीतं शरीरविशेषणानवच्छिन्नत्वेन व्याप्यं शरी-
रविशेषणावच्छिन्नत्वेन च प्रतीतं व्यापकमिति चेत् । न । विरोधात्
यदि हि विशेषणावच्छिन्नं तत् प्रथते कुतः केवलस्यावभासः के-
वलं चेत् प्रथते कुतस्तेनैव[3] विशिष्टावभासः । सकर्तृकत्वस्य च श-
रीरेण व्याप्तिर्गृह्यते शरीरविशिष्टेन वा । नाद्यः । असम्भवात् न
हि सकर्तृकत्वं शरीरमिति व्याप्तिप्रतीतिः । विशिष्टेनापि किं स-
कर्तृकत्वेन तदन्येन वा । नान्येन । तदनुपन्यासात् । नापि सकर्तृक-
त्वेन । न हि यावद्व्याप्यत्वेन विवेचितं तावदेव विशेषणान्तरावच्छेदेन
व्यापकमिति शक्यते वक्तुं व्याप्तिग्राहकप्रमाणस्य सर्वत्र व्या-
प्यरूपं व्यापककोटावनन्तर्भावयत एव व्याप्तिग्राहकत्वनियमदर्श-
नात् । तर्कापरिशुद्धिस्तु किं तर्कादपरिशुद्धिर्व्याप्तिपक्षधर्मताविरोधः
तर्करूपमेव वा अपरिशुद्धिरनुमानदूषणम् । नाद्यः । तदविरोधस्य
साधितत्वात् । नेतरः । अनुमानरूपसाकल्ये पञ्चरूपसम्पत्त्यादौ[4]
तस्यानुमित्युत्पत्तिप्रतिबन्धकत्वानिश्चयेन दूषणत्वानिश्चयात्
अन्यतरासिद्धदूषणभावस्य चैकतराभिमतसाधनवत् स्वसाध्यासा-
धकत्वात् । शशशृङ्गप्रतिबन्धी[5] ग्रहो बाधको ऽस्त्विति चेत् । न । अ-
न्यतरान्वयव्यतिरेकिणो[6] व्यतिरेकिणो वा विषाणसाधकत्वोप-
न्यासे यथैव विपक्षे साध्यव्यतिरेकावधारणं तथैव पक्षे ऽपीति
हेतोर्बाधितविषयत्वात् केवलान्वयिनस्तु स्वयं साधकत्वस्वीकारे
ऽपसिद्धान्तत्वात् परसिद्धेन परस्य विरोधोद्भावनं नास्ति परमते
विषाणस्य दृश्यजातीयता[7]नियमात् ॥ ईश्वरसिद्धिः ॥

अणुर्नाम द्रव्यान्तरमिति चेत् तन्न तदसिद्धिरित्येके । अ-

(१) भिन्नाश्रयत्वेनेत्यर्थः । (२) आश्रयभेदेनेति शेषः ।
(३) तदैव-पा० २ पु० । (४) पञ्चरूपसम्पत्त्यादौ इति नास्ति २ पु० ।
(५) प्रतिबन्दी-पा० २ पु० । (६) अन्वयव्यतिरेकिणो-पा० २ पु० ।
(७) विषाणजातीयस्य दृश्यता-पा० २ पु० ।

णुपरिमाणतारतम्यं क्वचिद्विश्रान्तमिति चेत्। न। तदसिद्धौ अणुपरिमाणस्यैवासिद्धेः। महत्त्वापकर्ष इत्थं[1] व्यपदिश्यत इति चेत्। न। तस्य त्रुटावेव विश्रामात्। अणुव्यवहारास्पदमात्रमनुपात्ताणुमहदादिवैचित्र्यं धर्मीति चेत्। न। प्रमाणसिद्धस्य व्यवहारास्पदत्वेन महत्त्वभेदादन्यस्य व्यवहारास्पदताप्रतिक्षेपात्। त्रसरेणुर्भागवान् चाक्षुषद्रव्यत्वात् अन्यथा तन्न स्यात् महत्त्वप्रकर्षस्य चाक्षुषत्वानुविधानात् दूरे केशाद्यनुपलम्भेऽपि शालतमालोपलम्भात् तथानेकद्रव्यवतामपि महत्कारणत्वात् धूम इवेन्धनमनुविधत्ते चाक्षुषत्वमिति तत्सिद्धिरिति चेत्। न। महत्त्वनित्यत्वेनाप्युपपत्तेः। त्रसरेणुः कार्यो महत्त्वे सति क्रियावत्त्वादिति चेत्। न। महत्त्वविशेषणव्यावर्त्याप्रसिद्धा[2]वसामर्थ्यात् तस्यान्यतः प्रतीतौ वैयर्थ्यापातात् अतः प्रतीतावन्योन्याश्रयात्। नित्यश्च त्रसरेणुः महत्त्वोत्कर्षापकर्षाभ्यां शून्यत्वात् गगनवत् महत्त्वाधिकरणमनिसमुत्कृष्टापकृष्टमहत्त्वसम्बन्धप्रतिबद्धं घटोऽपि कुतश्चिदल्प इव कुतोऽपि महत्तरो भवति न त्वेवं गगनं कुतोऽपि अल्पताया असम्भवात्[3] त्रसरेणोस्तु महत्त्वं महत्त्वान्तरेभ्योऽपकृष्टं न कुतोऽप्युत्कृष्टं न हि त्रसरेणोरल्पं महदस्तीति। दृश्यसमवायिहेतूनां च दृश्यत्वनियमात् दृश्यत्वस्य[4] दृश्यानुपलब्धिप्रतिक्षिप्तत्वात् अन्यथा दृश्यादृश्यव्यवस्थाविलयात्[5]। तदिदमसङ्गतम्। यथा तैजसानां न कारणानां दृश्यतानियमस्तथेहापि अन्यथा नयनविलयात् न च त्रसरेणुमहत्त्वं नित्यं महत्त्वे सति चाक्षुषत्वात् घटमहत्त्ववत् न च नित्यस्त्रसरेणुर्महत्त्वापकर्षविरहमात्रस्य महत्त्वैकाधिकरणस्य नियमग्राहकमानगोचरत्वात् अनुमानादेव तत्सिद्धेः[6]। तथापि कथं तत् पृथिव्यादिजातीयं कार्यसमवायिनिदानयोः तन्तुपटादौ वैजा-

(१) अणुपरिमाणतारतम्यशब्देनेत्यर्थः।
(२) व्यावर्त्याप्रतीता-पा० २ पु०। (३) अभावात्-पा० २ पु०।
(४) दृश्यत्वस्येति नास्ति १ पु०। (५) विलयानियमात्-पा० २ पु०।
(६) परमाणुसिद्धेः-पा० २ पु०।

स्स्यापि दर्शनात्। गन्धादिमत्त्वात्तदनुमानमिति चेत्। न। तस्य दृश्यसंस्थानैकव्यङ्ग्यत्वनियमात् अन्यथा स्फटिकलौहताम्रादिजातेरपि अनुमानापत्तेः ततः परममहद्गगनवद[1]णवोऽपि द्रव्यान्तरमेव अन्यथा तत्रापि का प्रत्याशेति स्थितम्। मैवम्। तदसिद्धेः यदि हि दृश्यैकव्यङ्ग्येयं स्यात् स्यादेवं न त्वेवं केवलस्य दृश्यत्वस्य भूजलादिसाधारण्येन व्यभिचारित्वात् गन्धादिना तु विशेषणे विशेष्यवैयर्थ्यात् गन्धसमवायिकारणतानिर्वाहकजातेरणावपि स्वीकारात् अन्यथा गन्धसमवायिकारणत्वानुपपत्तेः गन्धस्नेहभास्वररूपापाकजस्पर्शैन क्षितित्वादिजात्यनुमानात् स्फटिकादिजातेश्च गुणविशेषस्य व्यवस्थापकस्याभावात् दृश्यसंस्थानव्यङ्ग्यत्वेनाणुषु तदनुमानविरोधात्॥ परमाणुः॥

शब्दो गुणः जातिमत्त्वे सति अस्मदादिबाह्याचाक्षुषप्रत्यक्षत्वात् गन्धवत् यदि तु द्रव्यं[2] स्यात् बाह्येन्द्रियग्राह्यं न स्यात् निरवयवद्रव्यस्य बाह्येन्द्रियाग्राह्यत्वेन प्रतिबन्धात् प्रत्यक्षत्वे सत्यकारणगुणपूर्वकत्वात् अयावद्द्रव्यभावित्वात् आश्रयादन्यत्रोपलब्धेश्च न स्पर्शवद्विशेषगुणः वायुरेव यावद्वेगं चलन् शब्दनिमित्ततया अभ्युपगतोऽस्त्वाश्रयः अणुष्वतीन्द्रियो ध्वनिरस्तु स्थूलेष्वैन्द्रियकः कारणगुणपूर्वकः स चोत्पत्तौ भेरीदण्डाद्यभिघातसापेक्षः यावद्द्रव्यभावी चाश्रय एवोपलभ्यते चेति किमसङ्गतमिति चेत्। न। शब्दस्य विशेषगुणत्वे सति त्वगिन्द्रियावेद्यत्वेन रूपादिवदवायवीयत्वात्। न दिक्कालमनोगुणः प्रत्यक्षत्वाद्रूपवत् नात्मनो बाह्यकरणवेद्यत्वात्[3] तदाकाशमितरेभ्यो भिद्यते शब्दसमवायित्वात् न यदेवं न तदेवं यथा घट इति॥ आकाशम्॥

ननु कालसत्त्वे किं प्रमाणमध्यक्षमनुमानं वा। नाद्यः। अरूपित्वेनानध्यक्षत्वात् प्रतिभासाभावाच्च। न द्वितीयः। लिङ्गाभावात् परापरादिषट्कं लिङ्गमिति चेत्। न। परत्वापरत्वे तत्समवायितया

(१) ततो महत्परममहद्गगनवत्-पा० १ पु०।
(२) निरवयवद्रव्यम्-पा० २ पु०। (३) करणप्रत्यक्षत्वात्-पा० २ पु०।

[1] तल्लिङ्गं तदसमवायिकारणतया[2] वा तन्निमित्ततया वा। नाद्यः। दिक्कालयोः पञ्चगुणवत्त्वमितिभाष्यविरोधात्। नेतरः। संयोगस्यैव तादृशत्वात् सन्निकृष्टादिबुद्धेरेव च तन्निमित्तत्वात्। न तृतीयोऽपि। सन्निकर्षाभावात् सन्निकृष्टबुद्धेरसत्त्वे[3] तत्सिद्ध्यर्थमवश्यं कालः स्वीकर्तव्य इति चेत्। न। जगन्निमित्तभूतपरमेश्वरशक्तेरेव तदुपपत्तेः। एवं यौगपद्यप्रत्यया अपि न निरुपाधिसमयालम्बनाः वैलक्षण्यानुपपत्तिप्रसङ्गात् सोपाधिसमयालम्बनत्वे तु तत्सम्बन्धसिद्ध्यर्थं समयाभ्यर्थनं तच्चेश्वरादिद्वारेणैवोपपन्नमिति समयप्रतिबन्धस्यासिद्धेः न च परत्वापरत्वसिद्धिरपि बहुतरतपनपरिस्पन्दान्तरितजन्मत्वेनैव तदुपपत्तेः अन्यथा मध्यत्वस्यापि स्वीकारप्रसङ्गादिति भूषणः। न च तपनपरिस्पन्दभेदानां साक्षात्तदवच्छेदकतानुपपत्तौ[4] तन्निर्वाहककालकल्पनेति वाच्यम्। कालप्रतीतौ तद्द्वारा विशिष्टप्रत्ययात्[5] विशिष्टप्रत्यये तु कालानुमानात्। अत्रोच्यते। दृश्यते तावद्दिवसमासादिवैचित्र्येण तपनपरिस्पन्दभेदानां तत्तत्पदार्थसार्थविशिष्टप्रत्ययजनकत्वं ते च विशिष्टप्रत्ययजनने स्वप्रत्यासत्तिमपेक्षन्ते स्वरसतोऽप्रत्यासन्नत्वे सति विशिष्टव्यवहारजनकत्वात् चन्दने सौरभवत् स्वरसप्रत्यासत्तिरहिताश्च सम्बन्धे बाधकाभावात् परम्परासम्बन्धिनश्च साक्षात्सम्बन्धविरहे सति सम्बन्धित्वात् पटसंसृष्टनीलत्ववत्। न चेतरेतराश्रयः सति सम्बन्धेऽवच्छेद्यावच्छेदकदृश्यतामात्रेण विशिष्टव्यवहारदर्शनात् समवायातीन्द्रियत्वे शीतलं जलमितिवत् पिण्डतपनपरिस्पन्दयोश्च संयुक्तसंयोगिसमवायात्मनि परम्परा-

(१) तत्समवेततयेत्यर्थः।

(२) तदसमवायिकार्यतया-पा॰ १। २ पु॰। स कालोऽसमवायिकारणं यस्येत्यर्थः। तदसमवायिकार्यतयेति पाठे स चासमवायी चेति तदसमवायी कालस्तस्य कार्यमितिविग्रहः।

(३) सन्निकर्षाभावेन सन्निकृष्टबुद्धेरसत्त्वेन-पा॰ २ पु॰।

(४) तदनुपपत्तौ-पा॰ २ पु॰। (५) विशिष्टप्रत्ययः-पा॰ २ पु॰।

सम्बन्धे न तावत् पृथिव्यादिकं हेतुः तपनपिण्डाभ्यामसंसर्गात् न चाहस्करकरनिकरस्तथा तदभावेऽपि गृहनिखातपदार्थेषु मासाद्यवच्छेददर्शनात्[1] न चाकाशात्मानौ तथा विशेषगुणवत्त्वात् पृथिवीवत् न चात्राव्यापकत्वमुपाधिः तुल्ययोगक्षेमयोरुपाध्युपाधिमद्भावानुपपत्तेः यदि च गगनमात्मा वान्यधर्मेणान्यमवच्छिन्द्यात् काश्मीरवर्तिना कुङ्कुमरागेण कर्णाटचक्रवर्त्तिनां करकमलतलमवच्छिन्द्यात् न च कालेऽप्येष प्रसङ्गः तस्यासिद्धावाश्रयासिद्धेः सिद्धौ वा नियतपरधर्मोपनायकत्वेनैव सिद्धेः एकस्यैवोपाध्युपनयनसामर्थ्ये च व्यापकान्तराणामन्यथासिद्धसन्निधीनामुपाधिभेदोपनयनाहेतुत्वे अव्यापित्वस्य साध्याव्यापकत्वेनानुपाधित्वात् व्यापकानामपि तद्धेतुत्वाभावात् दिगेवास्त्विति चेत्। न। तस्या असिद्धेः सिद्धौ वा तदहेतुत्वेनैव सिद्धेः ततस्तपनस्पन्दभेदे पिण्डसंसर्गोपनायकः पदार्थ इतरेभ्यो भिद्यते उपाधिभेदसंसर्गोपनायकत्वात् न यदेवं न तदेवं यथा पृथिवी एष तावच्चिरन्तनः पन्थाः॥ कालः॥

ननु दिशोऽरूपित्वेनानध्यक्षत्वात् लिङ्गाभावाच्च कथं सिद्धिः। ननु पूर्वापरादिदशप्रत्ययाः सन्ति कथं लिङ्गाभाव इति चेत्। न। तेषां निरूपाधिदिगालम्बनत्वे दिशां दशत्वप्रसङ्गे नवैवेति व्याघातः सर्वत्र सर्वप्रत्ययप्रसङ्गश्च उपाधि[2]मुखपिण्डीकारे तु तेनैव प्रत्ययानामन्यथासिद्धत्वात् उपहितदिगालम्बनत्वे तु लिङ्गान्तरस्यासत्त्वे प्रत्ययानामनुत्पादात्। उपाधीनां सूर्यादिगतत्वेन स्वरूपप्रत्यासत्तिशून्यत्वेनावच्छेदकान्तरस्वीकारे तत्सिद्धिरिति चेत्। न। कालेनैव तदुपपत्तेः। मैवम्। कालस्य क्रियामात्रोपाध्युपनायकत्वात् न संयोगोपनायकत्वं नानापुरुषसाधारणप्रत्ययविषयवर्तमानाद्युपाध्युपनायकत्वं च[3] व्यापकं न त्वसाधारणप्राच्या-

(१) मासाद्यवच्छेदात्-पा॰ २ पु॰। (२) उपाधिः सूर्योदयादिः।

(३) वर्तमानद्युपनायकत्वं च-पा॰ २ पु॰।

घ्युपनायकत्वं[1] असाधारणो ह्ययमुपाधिः प्राच्या एव पुरुषान्तरापेक्षया प्रतीचीत्वात् दिशस्तु सिद्धौ नियततपनसंयोगोपसम्पर्कत्वेनैव प्रसङ्गस्य बाधात् अन्यथाऽसिद्धेः तत्सिद्धिश्च दिगितरेभ्यो भिद्यते पूर्वापरादि[2]प्रत्ययविषयसंयोगोपनायकत्वात् न यदेवं न तदेवं यथा पृथिवी एवं सति पूर्वापरोपा[3]ध्युपनायकत्वेनैव दिशो नियमादनेकदिक्कल्पनापत्तिः तद्वदनेककालकल्पनापत्तिश्चेति चेत्। न। अनेकत्वे ऽपि क्रियोपाध्युपनायकः कालः संयोगोपाध्युपनायिका दिक्। न च नवैवेति व्याघातः आत्मनामानन्त्ये ऽपि आत्मत्वेनोपसङ्ग्रहवदित्यविरोधात् । परममहत्परिमाणसामान्यं वा विशेषगुणशून्यद्रव्याधिकरणानेकव्यक्तिवृत्ति परिमाणतारतम्यविश्रान्तिविषयजातित्वात् अणुत्ववत्। न चान्त्यकल्पनमुक्तोतरत्वात्। परममहत्परिमाणं द्रव्यचतुष्टयवृत्ति नित्यपरिमाणत्वादिति बाधितं परिमाणस्य प्रत्येकं मेलकेन वा द्रव्यचतुष्टयवृत्तित्वाभावात्। न च मनसा सिद्धसाधनं तस्याणुत्वात् । न च कालकृतपरत्ववैलक्षण्यादस्य[4] दिक्कृतत्वं कालजन्यत्वेन वैलक्षण्यासिद्धेः स्वरूपवैलक्षण्यस्य कालकृतेनापरत्वेन व्यभिचारात्। विलक्षणदेशकालव्यवहारबलेन दिक्कालभेदकल्पनेति च न वाच्यम् । व्यवहारविषयभेदप्रत्ययं विना विचित्रव्यवहारस्यैवासिद्धेः[5] अज्ञाते व्यवहाराभावात् व्यवहारविषयभेदज्ञानं च न प्रत्यक्षात् तयोरतीन्द्रियत्वात् नानुमानात् तेषां दूषितत्वात् न व्यवहारादितरेतराश्रयात तत्परिज्ञाने हि तयोर्व्यवहर्तव्यता तद्व्यवहारे च तत्परिज्ञानमिति । अथवा विवादाध्यासितानि कार्याणि निरवयवेन्द्रियग्राह्यविशेषगुणजातीयवर्जितसाधारणद्रव्याधिकरणजन्यानि कार्यत्वात् अभिन्नतन्तुहेतुकद्रव्यगुणकर्मवत न च शब्दसुखा-

(१ प्राच्यादुपाध्युपनायकत्वम्-पा० २ पु० ।

(२) पूर्वादौति प्रकाशसम्मतः पाठः । (३) पूर्वादुपा पा० २ पु० ।

(४) संयुक्तसंयोगभूयस्त्वगोचरापेक्षाबुद्धिजन्यदिक्कृतपरत्वस्येत्यर्थः ।

(५) अनुपपत्तेः-पा० २ पु० ।

दिभिर्व्यभिचारः एवम्भूताधारजन्यत्वेन तेषामपि प्रत्यक्षत्वात्[1] विशेषगुणवदाधारजन्यत्वेन न तद्रहिताधारजन्यतेति चेत् न घटादावसर्वज्ञकर्तृपूर्वकत्वे सर्वज्ञकर्तृतावदविरोधात् अत एवात्मनि ज्ञान[2]मिह नीले नीलत्वमिह कर्मणि चलनत्वमिह नभसि खद्योत इत्यभिन्नाकारसाधारणमवभासते असम्बद्धं कथमिदमवच्छेदकमिति चेत् न समवायवत् स्वभावबलेनैवोपपत्तेः । नन्वेवं सति प्रत्यक्षादिकं स्यात् न स्यात अनुमानपारतन्त्र्येण प्रत्यक्षप्रवृत्तेः व्यवसायपारतन्त्र्येण परमाण्वादिषु मनःप्रवृत्तिवत् घ्राणजसुरभिज्ञानपारतन्त्र्येण त्वगिन्द्रियगन्धप्रवृत्तिवद्वा अप्रतिसंहितानुमानानामपि इहेतिमतिदर्शनात् नैवमिति चेत् न देहे ज्ञानसुखादिप्रतीतौ अभ्यस्तत्वेन प्रतिसंहिते ऽपि लिङ्गे अप्रतिसन्धानाभिमानात्[3] । एवं कालोऽपि सर्वत्राभिन्नाकार[4]वर्तमानप्रत्ययवेद्यः । अस्तित्वं वर्तमानत्वमिति चेत् न तद्वस्तूनां स्वरूपं सत्तासामान्यं वा नाद्यः भिन्नेष्वभिन्नावभासानुपपत्तेः । नेतरः अभावे सामान्ये च वर्तमानप्रत्ययात् अनुत्पन्नप्रध्वंसत्वमसत्प्रागभावत्वं च वर्तमानत्वमिति चेत् न ध्वंसप्रागभावव्यावृत्तेः वस्तुस्वभावत्वेन व्यावृत्तत्वादनुगतावभासविषयताविरोधात् अथ क्रियाजननयोग्यत्वमिति चेत् न तदपि वस्तुस्वरूपमेव तच्च व्यावृत्तमनुवृत्तं वा आद्ये अभिन्नावभासविरोधोऽन्यत्र जातित्वापत्तिः कार्योपहितं स्वरूपमिति चेत् न अननुसंहितकार्यान्वयव्यतिरेकस्यैव नीलादिष्वभिन्नावभासदर्शनात् किं च जनकत्वं जननानुकूलसहकारिमत्त्वं स्वरूपं वा नाद्यः सहकारिरहितेष्वपि वर्तमानप्रत्ययात् नेतरः अतीतानागतेष्वपि वर्तमानप्रत्ययप्रसङ्गात् तेषां स्वरूपायोग्यत्वे[5] तत्र कारणत्वनिश्चयस्य भ्रान्तत्वप्रसङ्गात् प्रमाणवेद्यत्वं तदिति चेत् न अतीतेष्वपि[6] वर्तमानावभासापत्तेः ततः समवायवदेकं वर्तमानं यदवच्छेदकं स का-

(१) कृतिपूर्वकतावत्-पा० २ पु० । (२) अत्रात्मनि सामान्य-पा० २ पु० ।

(३) अप्रतिसंहिताभिमानात्-पा० २ पु० । (४) सर्वभिन्ना-पा० २ पु० ।

(५) स्वरूपतोऽयोग्यत्वे-पा० २ पु० । (६) अतीतानागतेष्वपि-पा० २ पु० ।

ष्टः न चैवमतीतानागतावभासबलेनातीतानागतपदार्थवेदनप्रसङ्गः
प्राक्प्रध्वंसोपाधित्वेनैव[१] तदुपपत्तेः विवादाध्यासितानि अव्यापक-
द्रव्याणि युगपद्विशेषगुणशून्यैकद्रव्यसंसर्गीणि द्रव्यत्वादात्मवत् दिक्-
सुखोपादानमितरेभ्यो भिद्यते सुखोपादानत्वात् न यदेवं न तदेवं
यथा रूपम् न तावद्रूपादिविषयपञ्चकमेवोपादानम् आन्तराणां
बाह्यानुपादानत्वात् अन्यथा ज्ञानस्यापि देहाद्युपादानतापत्तेः ना-
पि ज्ञानमेव सुखस्य ज्ञानानात्मकत्वात्[२] अन्यथा शब्दस्यापि ता-
दृशतापत्तेः न चेदमेव ज्ञानं शब्दनीलाद्याकारवत् स्पष्टज्ञाताद्या-
कारस्यापि बाह्योपादानत्वात् न चानादिसुखसन्ततिरुपादानं पू-
र्वमनुपलब्धेः तदिन्द्रियबुद्धिविषयदेहव्यतिरिच्यमानमुपादानमा-
त्मैव असति चात्मनि अन्यानुभूतस्यान्येन स्मरणं न स्यात् उपादा-
नोपादेयभावादुपपत्स्यत इति चेत् न दिनान्तरानुभूतस्य सुषुप्ति-
दशान्तरितोपादानोपादेयस्मृतिसन्ततित्वेन(३) स्मृतेरनुपपत्तेः निरा-
कारा चित्सन्ततिरनुवर्तत इति चेत् न चितां साकारत्वेन प्रतिब-
न्धात् अन्यथा सर्वत्र सुखसन्ततेरनुवृत्तिप्राप्तेः । नन्विदमसम्बद्धं
जगतः क्षणभङ्गित्वात् तथाहि यत् पूर्वापरकालयोर्विरोधिसंसर्गे तत्
पूर्वपर[४]कालयोर्भिद्यते यथा प्रदीपः तथा च विवादास्पदं
न चैतदसिद्धं[५] प्रसङ्गविपर्ययाभ्यां तत्सिद्धेः अजनकमपि
सहकार्यभावात् सन्दिग्धव्यतिरेकित्वमेतयोरिति चेत् न स्वभा-
वानिरुक्तेः तथाहि भावस्य कारकस्वभावत्वे सदाजननमन्यथा
चाजननमेव स्यात् सहकारिसन्निधाने जनकत्वमन्यथाजनकत्वं
चान्यदेति[६] स्वभाव इति चेत् न कारकमकारकं चेति यदि धर्मा-
भिधानं[७] न तर्हि स्वभावः[८] धर्मिस्वरूपं चेत् कथमनेकमेकस्य

(१) प्राक्प्रध्वंसाभावोपाधिवशेनैव-पा० २ पु० ।
(२) अज्ञानात्मकत्वात्-पा० २ पु० ।
(३) उपादेयसन्ततित्वेन-पा० २ पु० । (४) पूर्वापर-पा० २ पु० ।
(५) न चेदसिद्धम्-पा० २ पु० । (६) अजनकत्वञ्चान्यदा-पा० २ पु० ।
(७) कर्माभिधानम्-पा० २ पु० । (८) धर्मिणः स्वभावः-पा० २ पु० ।

स्वरूपम् एकं चेत् तावदवस्थानं[१] जनकमजनकं चेति प्राप्तम् । यदि
च सहकार्यवच्छेदोऽपि न स्वभावान्तर्गतः तदा गले पादिकया सह-
कारिणामुदयः न चेत् सदाऽजननापत्तिः सहकारिसमयानन्तरसम-
यभाविनः फलात् पूर्वभावित्वं स्वभाव इति चेत् न अस्यापि ध-
र्मस्वभावत्वात् । अत्रोच्यते । सहकारिसन्निधानकाले यत् कार्यम-
र्जयति भावः सहकारिविरहकालेऽपि तत्र कार्ये सम्बन्धोऽसम्बन्धो
वा समर्थश्चेत् तदापि जनयेत् न चेत् तदेव वस्तु तत्र शक्तमशक्तं चेति
दुर्वारो विरोधः सहकारिविरहकालेऽसत्त्वान्न करोति न तु तद-
समर्थमिति चेत् न सहकारिविरहकालेऽसद्रूपता सा सहका-
रिसन्निधानकालेऽपि विद्यते न वा विद्यते चेत् स्वकाल एवा-
सत्त्वप्रसङ्गः न चेत् न तर्हि सहकारिविरहकाले तदसद्रूपम् अथैक-
मेव वस्तु सहकारिभावाभावयोः सदसद्व्यवहारयोग्यमिति चेत्
तथैव तर्हि एकमेव शक्ताशक्तव्यवहारयोग्यमिति तुल्यं किञ्च न ह्य-
सामर्थ्यं विहायान्यदसत्त्वमस्ति अथैकस्मिन्नेव वस्तुनि सहकारिस-
मवधानानन्तरं कार्यजननस्वभावता तद्विरहे चासमर्थस्वभावतेति
उभयमविरुद्धमिति चेत् तुल्यमस्मन्मतेऽपि तथापि सहकारिसम-
वधानकाले यत् समर्थस्वरूपं तदेव तत्प्रागप्यस्ति पूर्वमपि कार्य-
प्रसवप्रसङ्गः इति चेत् न सहकारिविरहकाले यत् तत्र कार्येऽसम-
र्थरूपं तदेव चेत् सहकारिसमवधान[२]कालेऽपि ततोऽजननप्रस-
ङ्ग इति तुल्यम् न च कारिणां स्वभावान्तर्भावः यत् सहकारिमति
कार्यमुत्पद्यते तस्यैव शक्तपदवाच्यत्वात् ॥ आत्मा ॥

सुखप्रतीतिरिन्द्रियजा साक्षात्प्रतीतित्वात् रसप्रतीतिवत् न
च ज्ञाताकारो ज्ञानार्थैवेति वाच्यम् नीलादिबोधेऽपि तथाभाव-
प्रसङ्गात् कादाचित्कत्वान्नैवमिति चेत्तुल्यमत्रापि वासनापरिपाक-
कादाचित्कत्वं तत्र हेतुरिति चेत् तादृगेवैतदपीति सामग्रीसाजा-
त्यं तत्र हेतुरिति चेत् न एकदेशसाजात्यस्य नीलादौ व्यभिचारा-
त् अन्यस्यासिद्धेः नाप्ययं सन्दिग्धव्यभिचारः इन्द्रियप्रतीतावप्र-

(१) यावदवस्थानम्-पा० २ पु० । (२) सन्निधान-पा० २ पु० ।

तीतौ च व्याघातात् ततो यत् सुखोपलम्भकमिन्द्रियं तन्मनः। कथं पुनरितरभेदीदं मनस्त्वजातेरिति चेत् न अनुगतप्रत्ययासिद्धौ शब्दप्रवृत्तेः सुखोपलम्भकत्वेनाप्युपपत्तौ इन्द्रियत्ववदसिद्धेः अन्तरा घ्राणादिवत् साक्षिते वावान्तरजातिः नापि सुखोपलम्भकेन्द्रियत्वात् तदपार्थिवं पार्थिवत्वे ऽपि तदविरोधात् न चास्पर्शत्वात् ततोऽपि भिद्यत इति वाच्यम् तस्याप्यसिद्धेः अनारम्भकत्वात् तदिति चेत् न विषयदेहयोः परमाण्वन्तरादप्युपपत्तौ इन्द्रियतया च फलाभावात् अन्यथासिद्धेः पार्थिवाणोरपि कस्यचित्तादृशत्वापत्तेः न चेदेवं घ्राणमपि पार्थिवं न स्यात् ततः कल्पनालाघवादेतदुचितं व्योमादेश्च भेदानुपपत्तेः मूर्तत्वादिति चेत् न अस्पर्शद्रव्यत्वेन[1] तत्प्रतिक्षेपात् ततो भेदकाभावान्न भिद्यते इति स्थितम् मैवं विभुविशेषगुणग्राहकेन्द्रियत्वेन मनसो मूर्तचतुष्टयव्यावृत्तेः पार्थिवस्य गन्धग्राहकत्वानियमात् अन्यथा घ्राणरसनयोरेकशेषापत्तेः। श्रोत्रमपि द्रव्यान्तरं स्यादिति चेत् न तत्र शब्दासमवायात् शब्दसमवाये वा तस्याकाशत्वात् मनसश्च ज्ञानासमवायिकारणसंयोगाश्रयत्वेनात्मवत् स्पर्शानाधारत्वात् स्पर्शवत् संयोगस्य स्पर्शवद्द्रव्यारम्भादौ सामर्थ्यात् अमूर्तत्वादपि भिद्यते मूर्त्तत्वात्तदसिद्धं सुखदुःखयोरबाधितयुगपत्प्रत्ययविषयत्वेन यौगपद्यात् अन्यथा यौगपद्यविलयापत्तेश्च एकदानेकज्ञानानुत्पादस्य ज्ञानकरणत्वेनैव समूहालम्बनबोधवदुपपत्तेः ज्ञानानां विषयैकज्ञानाभावस्यापि[2] तत एवोपपत्तेः अन्यथा गुडादौ युगपद्रसस्पर्शावभास[3]प्रसङ्गात् सुखादिदेशनियामकत्वमपि सामग्रीदेशनियमस्यैव अन्यथाऽणुमात्रदेशतापत्तेः द्वित्रिश्छिन्नभुजगादौ चलनदर्शनाच्चेति चेत् सुस्वापव्यासङ्गयोर्बहिरिन्द्रियमनःसम्बन्धविच्छेदलक्षणयोर्विभुत्वे व्याकोपात् दृष्टसाकल्ये ऽदृष्टवैलक्षण्यस्याप्यसम्भवात्

(१) अस्पर्शवत्त्वेन-पा० २ पु० ।
(२) नानाविषयज्ञानानुत्पादस्यापि पा० २ पु० ।
(३) रसस्पर्शाभाव-पा० २ पु० ।

अदृष्टाभावस्य दृष्टसाकल्यविरोधात् अन्यथा सामग्र्याः फलानुमानस्य शक्तेश्च सिद्धिप्रसङ्गात् न च देशकालादयोऽप्युपाधयः सर्वसहकारिविरहे मनसोऽप्यसिद्धेः आत्ममनोयोगस्य च संयोगत्वेनानित्यत्वात् अन्यथा विभागस्यापि नित्यतापत्तावपसिद्धान्तता नित्यत्वेन संयोगस्यापि समवायत्वेन रूपादीनामपि संयोगित्वेन विभागित्वात् पृथगुपलम्भप्रसङ्गः। अयुतसिद्ध्या विशेष इति चेत् न अजसंयोगाभावात् संयोगत्वेन विशेष इति चेत् न तस्य नियामकं विना नियतदेशव्यङ्ग्यत्वानुपपत्तेः अत एव यौगपद्यप्रत्ययोऽभिमानः गोधाभुजगादौ तु वेगवत् खड्गाद्यभिघातेन नानादेहावयवाश्रितवेगवत्प्राणपवनसंयोगादेव क्रियोत्पद्यते अतिरिक्तत्वं च न सिध्येत् श्रोत्रवद्गगनत्वेनैव कृतार्थत्वात् इति आत्मान्तरेण वा इत्युपरम्यमे ॥ मनः ॥

इति न्यायलीलावत्यां द्रव्यपदार्थोपवर्णनम् ॥

संख्याभावान्नैकादिव्यवहारहेतुत्वेन भिद्यते तस्य समुदितस्य स्वरूपासिद्धेः विपरीतस्य भागासिद्धेः गणनासाधारणकारणत्वादिति चेत् न एकद्विश्यादिज्ञानविषयत्वे पूर्वदोषात् संख्यामात्रत्वे तस्यैवासिद्धेः संख्याजातीयं तदिति चेत् न जातेरप्यसिद्धेः गणितशब्दप्रयोगात् तत्सिद्धिरिति चेत् न हस्ततलादिपरिमितदीर्घादिपरिमाणगुरुत्वयोः परिमितव्यवहृतिवदुपपत्तेः विपक्षाद्व्यावृत्तेश्च एकत्वद्वित्वादीनां सामान्यरूपत्वेनैवोपपत्तेः न च परापरभावानुपपत्तिः अन्यूनानतिरिक्तव्यक्तिकत्वात् न च मानाभावः विचित्रबुद्धिवेद्यत्वात् न च सदा द्वित्वावगतिः विशिष्टबुद्धिव्यङ्ग्यत्वात् योनिसम्बन्धबुद्धिव्यङ्ग्य[1]ब्राह्मणत्ववत् न चैकजातीयकारणान्नानाजातसभावः कारणेष्वपि तज्जातिसत्त्वात् सत्तावत् अन्यथा सदितिव्यवहारात् सत्त्वमपि गुणान्तरं स्यात् गुणेषु तु एकबुद्धिवत् सत्प्रतीतिरपि भ्रान्त्यैव स्यात् बाधकाभावस्तु एकत्वादेरपि तुल्य एव। मैवं द्वित्वादिकं न सामान्यं एकैकशः स्वो-

(१) योनिसम्बन्धवेद्य-पा० २ पु० ।

परक्तव्यवहारजनकत्वात् संयोगवत् अन्यथा घट इतिवदेकत्रैवायं
द्वावयञ्च द्वाविति प्रतीतिः स्यात् जातेः प्रत्येकं समाप्तत्वात्
एवं व्यवस्थिते गणनव्यवहारत्वादेकव्यवहारोपि गुणानुबन्धी
द्विव्यवहारवत्[1] सत्तानुबन्धी ग्रहस्तु मानाभावादेव[2] निरस्तः
संख्यात्वं जातिरपि गणितप्रयोगसाध्यैव परिमाणगुरुत्वयोस्तु
धर्माधर्मवदुभयवृत्तिजात्यभावात् एकत्वं च न स्वरूपाभेदमात्रम्
एकमेकमित्यननुगमापत्तेः याद्दश्येकत्वसंख्या समवैतीति चेत् न
जातेरपि विलयापत्तेः सामग्रीभेद एवासौ विशेषः स्यात् न चा-
यं तत्र प्रत्ययः तदननुसन्धानेपि जायमानत्वात् ननु तथापि द्वि-
त्वादिकं न सिध्यति एकत्वसमुच्चय एव तद्व्यवहारोपपत्तेरिति चे-
त् न विचारासहत्वात् स हि समुच्चयमात्रे वा व्यवहारान्तरविशे-
षे वा[3] नाद्यस्तस्यावैचित्र्ये द्वित्वादिव्यवहारवैचित्र्यविरोधात्
[4] न द्वितीयो विकल्पानुपपत्तेः स हि समुच्चेतव्यभेदाद्वा उपाय-
भेदाद्वा[5] नाद्यः एकतापाः सर्वत्र तुल्यत्वात् न द्वितीयः आरो-
पितस्य पारमार्थिकस्य वा द्वित्वादेरसम्भवात् । सैकं सैकमित्युत्तरो-
त्तरमेकैकबुद्ध्या योऽर्थविशेषः प्रतीयते तत्र द्वित्वादिव्यवहार इति
चेत् न एकत्ववीप्सा ह्येकैकत्वं सा चैकत्वनानात्वमात्रं सर्वसा-
धारणं नारोपितमनारोपितं वा द्वित्वादिक[6]मनाश्रित्य विचित्र-
व्यवहारहेतुरित्यतो विशेषात् तथाप्यपेक्षाबुद्धेरवैचित्र्ये कार्यविशे-
षानुपपत्तौ तुल्या व्यवहारानुपपत्तिरिति चेत् न विषयावैचित्र्ये-
ऽपि स्वभाववैचित्र्याद्विचित्रकार्यजनकत्वात् धूमज्ञानस्य विषया-
भेदे ऽपि[7] शक्तिवैचित्र्यात् धूमविषयसंस्कारदहनज्ञानजनकत्वव-

(१) गुणानुबन्धो गणनव्यवहारत्वात् द्वित्वादिव्यवहारवत्-पा॰ २ पु॰ ।
(२) द्वित्वाभावादेव-पा॰ २ पु॰ ।
(३) समुच्चयमात्रे वा व्यवहारान्तरविशेषे वा-पा॰ २ पु॰ ।
(४) तस्यावैचित्र्येऽपि द्वित्वादिवैचित्र्यविरोधात्-पा॰ २ पु॰ ।
(५) तदुपाधिभेदाद्वा-पा॰ २ पु॰ । (६) द्वित्वादिव्यवहार-पा॰ २ पु॰ ।
(७) विषयावैचित्र्यभेदेऽपि-पा॰ २ पु॰ ।

त् तन्निबन्धन एव द्वित्वादिव्यवहारोऽस्त्विति चेत् न विचारा-
सहत्वात् स हि सत्तया व्यवहारभेदमुत्पादयेत् ज्ञातो वा नाद्यो-
ऽतिप्रसङ्गात् न द्वितीयः तन्निरूपकस्य द्वित्वादेरभावात् व्यवहा-
रेण तन्निरूपितमिति चेत् न तस्मिन्ननिरूपिते व्यवहारासिद्धेः
[1] न ह्यनिरूपितविषयाविशेषाव्यवहारानिष्पत्तिर्नाम द्वित्वादिकं
कथमुत्पद्यत इति चेत् न सत्तयेति गृहाण उभयाश्रितं च द्वित्वं
स्वरूपतोऽभिन्नमेव भासते न चैषा भेदप्रतीतिर्भ्रान्ता अबाधित-
त्वात् अन्यथा गोत्वे व्यञ्जकपिण्डैरेवानुगताकारप्रतीत्युपपत्तौ
जातेरपि विलयापत्तेः शब्दसमवायानुपपत्तिस्तूभयपक्षसाधार-
णी नैकत्र पक्षपातमवलम्बते तदिदं चिरन्तनवैशेषिकमतदूष-
णं भूषणकारस्यापि त्रपाकरं[2] तदियमनात्मज्ञाना[3]भासर्वज्ञस्य
यदयमाचार्यमवमन्यते तथा च तदनुयायिनः तात्पर्याचार्यस्य
सिंहनादः संविदेव भगवतीत्यादि ॥ संख्या ॥

परिमाणं मानव्यवहारकारणम् ननु कः पुनरयं मानव्यवहारः
हस्तवितस्त्यादिव्यवहारो वा अणुमहदादिव्यवहारो वा असर्व-
गतव्यवहारो वा परिमितव्यवहारो वा नाद्योऽननुगतत्वेना[4]-
सामान्यलक्षणत्वात् परमाणौ परममहति चाभावात् न द्वितीयः
सर्वपरिमाणसाधारणत्वाभावात् न तृतीयः अविभुत्वेनैवोपपत्तेः
व्यापकपरिमाणे चाभावात् न तुरीयो महद्व्यवहारस्यैव परिमि-
तव्यवहारत्वात् सर्वपरिमाणाव्यापकत्वात् । अणुत्वे ऽपि परि-
मितव्यवहारोऽस्तीति चेत् न परिमाणत्वजातेरसिद्धौ अणुत्वस्यै-
वा[5] सिद्धेः । अथ परिमाणतारतम्यं क्वचिद्विश्रान्तं परिमाणता-
रतम्यत्वात् महत्परिमाणतारतम्यवदिति तत्सिद्धिरिति चेत्

(१) व्यवहारानुपपत्तेः-पा॰ २ पु॰ ।
(२) दूषणकारस्यापि त्रपाकरम्-पा॰ २ पु॰ ।
(३) अनात्मतत्त्वा-पा॰ २ पु॰ ।
(४) अनुगतत्वेन-पा॰ २ पु॰ ।
(५) अणुत्वव्यवहारस्यैव-पा॰ २ पु॰ ।

परिमाणतारतम्यं किमणुमहत्साधारणपरिमाणजातीय[1]तारतम्यं महत्तारतम्यं वा विवक्षितम् नाद्योऽसिद्धेः नेतरश्च सिद्धसाधनात् द्व्यणुकोपादानं परिमाणवत् द्रव्यत्वात् घटवदिति तत्सिद्धिरिति चेत् न परिमाणजातीयतामात्रस्य व्यापकस्यासिद्धौ प्रतिबन्धासिद्धेः गुरुत्वावच्छेदादौ च परिमितव्यवहारदर्शनात् ततो भेदकमानाभावान्न भिद्यते। अत्रोच्यते द्व्यणुकोपादानं गुणत्वापरजात्या महत्त्वैकजातीयगुणवत् द्रव्यत्वात् घटवत्। ननु किं महत्त्वजात्या एकजातीयगुणवत्त्वं साध्यं जात्यन्तरेण वा नाद्योपसिद्धान्तात् नेतरोऽसिद्धेः नानामहत्त्वसाधारणजातिमात्रेणेति ब्रूमः। न चैवं तत्र महत्त्वस्यैव सिद्धिः परमाणोरपि दृश्यतापत्तेः ततो महत्त्वाणुत्वसाधारणी जातिः परिमाणत्वं सिद्ध्यतीति गुरुत्वावच्छेदादौ परिमितव्यवहारो निरूपिततदवच्छेदकोपाधिसंख्याविषयः। ननु महत्त्वमेव न सिद्ध्यति बहुतरद्रव्यसमवायेन महदिति व्यवहारोपपत्तेः[2] बहुतरद्रव्यसमवायाभावादेव[3] द्व्यणुकादेरनुपलम्भोऽपि एवं गगने महदितिप्रत्ययो न स्यादिति चेत् न स्यादन्यत्र महत्त्वासिद्धौ तत्र महत्त्वाननुमानात्। मैवं अवयवबहुत्वमात्रं वा महदितिप्रत्ययगोचरः बहुत्वविशेषो वा सोऽपि निर्धारितोऽनिर्धारितो वा नाद्यो महदल्पसाधारणत्वात् न द्वितीयोऽवयवबहुत्वेयत्तानिश्चयेऽपि घटादौ महदितिप्रत्ययात् तन्निरूपकमानाभावाच्च न तृतीयः महत्त्वप्रकर्षापकर्षप्रतीत्यनुदयप्रसङ्गात् प्रचुरदेशव्यापकत्वात्तदनुमानमिति चेत् न तद्देशप्राचुर्यस्यापि निश्चायकप्रमाणाभावात् तत्रापि प्रचुरदेशान्तराभिधानेऽनवस्थानात् कथं तर्हि घटादेः प्रचुराप्रचुरदेशव्यापकताप्रतीतिः महत्त्वोत्कर्षापकर्षाभ्यां तदनुमानादिति ब्रूमः देशानां च भेदेनाप्रतिसन्धाने तदपेक्षाबुद्धिसाध्यस्य बहुत्वविशेषस्यैवानुपपत्तेः द्व्यणुकानुपलम्भो वा गुणविशेष-

(१) अणुमहत्परिमाणजातीय-पा० २ पु०।
(२) प्रत्ययोपपत्तेः-पा० २ पु०।
(३) समवायाभावनिबन्धन एव-पा० २ पु०।

विपर्ययाधीनः सालोकेन्द्रियसन्निकृष्टचाक्षुषद्रव्यानुपलम्भत्वात् पवनानुपलम्भवत् दीर्घत्वं च उपर्यधोभागावच्छिन्नप्रचुरदेशव्यापकत्वम्। न चात्रापि प्रचुरदेशव्यापकतानुपलम्भो महत्त्वोत्कर्षेणैव तदनुमानात्। न चेदेवं खर्वत्वऋजुत्वादिकमपि परिमाणान्तरं[1] स्यात्॥ परिमाणम् ॥

अथ पृथक्त्वे किं प्रमाणम्। पृथगिति प्रत्यय इति चेत्। न। तस्यान्योन्याभावावलम्बनत्वात् अन्यथा गुणादौ तदनुपपत्तेः। तथा सति इदमिदं न भवतीति प्रत्ययः स्यान्न तु पृथगिति चेत्। न। सत्यादि[2]पदवदन्तर्भावितनञर्थ एव भावात्मनि पृथक्शब्दसङ्केतादुपपत्तेः। मैवम्। अभावस्य प्रतियोगिसापेक्षनिरूपणत्वादस्य चावधिनिरूप्यत्वात्। आनुशासनिकपञ्चमीविभक्त्यन्तवाचकपदाभिलप्यमानत्वमवधित्वमिति चेत्। न। अनधीतशब्दविद्यानां तथाप्रतीतिविरोधात्। दण्डी पुरुष इतिवदुपपत्स्यत इति चेत्। न। तत्र दण्डाधिकरणत्वस्य मत्वर्थीयेन प्रतिपाद्यमानत्वात्। तस्मात् पृथक्त्वगुणनिरूपकत्वमेवावधित्वम्। अन्यपर्यायसम्बन्धे पञ्चम्यनुशासनव्यवहाराच्च पाणिनेरन्यादिशब्दानां पृथक्त्वगुणयोगिपदार्थप्रतिपादकत्वमुन्नीयते अन्यथा अघटः पट इत्यन्योन्याभाववाचकनञ्प्रयोगेऽपि पञ्चमीप्रसङ्गात् पृथक्त्वं च रूपवत् सत्तासम्बन्धितया प्रतिभासते। न च तमोवदेतत् स्यादिति वाच्यम्। तद्भावत्वे बाधकाभावात् ॥ पृथक्त्वम् ॥

अथ द्विपृथक्त्वे किं प्रमाणम्। अनुभव एवेति चेत्। न। तस्य द्वित्वसाहचर्यादेवोपपत्तेः। ततो नैतद्व्यवस्थितिरिति चेत्[3]। मैवम्। द्वित्वसामानाधिकरण्येन पृथक्त्वप्रतीतेः द्वित्वं च न घटत्ववदयं घटोऽयं घट इत्येकैकसंसर्गितया भासते अयं च द्वावयं च द्वाविति प्रत्ययप्रसङ्गात्। न चैकपृथक्त्वमुभयाश्रितम्। एकपृथक्त्वयो-

(१) वक्रत्वऋजुत्वादिकं परिमाणम्-पा० २ पु०।
(२) विशेष्यावृत्त्यप्रकारकज्ञाने सत्यपदस्य शक्तिरिति प्रकाशः।
(३) नैव तद्व्यवस्थेति चेत्-पा० २ पु०।

रभेद आरोप्यत इति चेत्। न। असति बाधके उभयाश्रितपृथक्त्व-
प्रतीतेर्भ्रान्तत्वानुपपत्तेः। न चेदेवं चित्रमप्येकं रूपं न स्यात्
नीलादीनां विजातीयानारम्भकत्वनियमे व्यापकैरव्यापकैर्वा
नीलपीतादिनानारूपैरेव विचित्रप्रत्ययोपपत्तेः[1]। विचित्रैकानु-
भव[2]बलात् तद्व्यवस्थितिरिति चेत् तुल्यं प्रकृते ऽपि। द्विपरत्वव-
न्दिस्त्ववशिष्यते सा तु परत्वापरत्वप्रक्रियायां निरसनीये-
ति ॥ द्विपृथक्त्वम् ॥

संयोगसिद्धौ किं प्रमाणं तस्य विभागाभावात्मकत्वात्। कः
पुनरयं विभागः किं सम्बन्धावभासमात्रमुताभावभेदो भावभेदो
वा। नाद्यः। समवायादेरपि संयोगतापत्तेः। इष्टत्वाच्च न द्वितीयः।
अभावाभावत्वे भावत्वव्यवस्थितेः। नेतरः। गुणगुणिनोर्विषयवि-
षयिणोरपि संयोगितापत्तेः। विभागध्वंसः संयोग इति चेत्। न।
संयुज्य विभक्ते ऽपि तत्प्रत्ययप्रसङ्गात् तमःप्रत्ययवद्यावदुत्-
पन्नप्रतियोगिध्वंसालम्बनत्वात् संयोगप्रतीतेः। असिद्ध एव
संयोग इति चेत्। न। सहोत्पन्नयोरविभक्तयोरेव संयोगात्। जा-
तस्तदापि विभाग इति चेत्। न। तद्धेतूनां कर्मविभागादीनामभा-
वात्। अजोऽसाविति चेत्। न। ध्वंसानुपपत्तेः। ततः संयो-
गप्रागभाव एवासौ तदभावस्तु संयोग इति स्थितम्। संयोगः सन्स-
न्नित्यबाधितबुद्धिवेद्यत्वाच्च[3] समवायवत् अन्यथाऽसमवायाख्यभा-
वाभाव एव समवायोऽपि स्यात् गगनपवनसंसर्गजध्वानस्य च द्वि-
तीयशब्दवद् भावासमवायिकारणत्वानुमानात् तथोत्पादस्तु न
संयोगः क्षणभङ्गनिषेधात्। अतिरेके ऽपि सर्वध्वानोत्पत्ति[4]-
रिति चेत्। न। अव्याप्यवृत्तित्वात्। किं पुनरव्याप्यवृत्तित्वमेक-
स्यैकत्रैकदा भावाभावौ विचारासहत्वादिदमयुक्तं तथाहि न ता-
वत् तत्र संयोगस्य प्रागभावप्रध्वंसाभावौ तयोः प्रतिपक्षसमान-

(१) प्रतीतेरुपपत्तेः-पा० २ पु०। (२) चित्रैकरूपानुभव-पा० २ पु०।
(३) सम्बद्धबुद्धिविषयत्वाच्च इत्यधिकम् १ पु०।
(४) ध्वानोत्पत्तिप्राप्तिः-पा० २ पु०।

कालत्वाभावात्। नात्यन्ताभावः तेन सादेश्यव्याघातात्। नाप्य-
न्योन्याभावो व्याप्यवृत्तीनामपि स्वाश्रये तादात्म्याभावबलेना-
व्याप्यवृत्तित्वप्रसङ्गात्। यथैकत्रैव बीजे कारणत्वं तदत्यन्ताभावश्च
कार्यभेदावच्छेदात् तथात्राप्यवच्छेदभेदमादायाविरोध इति चेत्।
न। अवच्छेदो यद्यनर्थान्तरमर्थान्तरं वा व्यापकं तदा तदवच्छिन्न एव
विधिनिषेधाविति स एव विरोधः। अर्थान्तरमव्यापकं चेदयमपरो-
ऽवच्छेदभावाभावस्वभावो विरोधः। अत्रोच्यते। वस्तुस्वभाववैचि-
त्र्यात् संयोगस्य स्वाभावसमानदेशकालत्वात्। रक्तारक्तस्वभावः
पटो यथा विज्ञानमेकं रक्तारक्तपटरूपं[1] विज्ञानस्य भेदानुभवो वि-
ज्ञानान्तरेण वा तेनैव वा। नाद्यः। भेदे ग्राह्यलक्षणायोगात्। अभेदे
तु रक्तारक्तात्मना स्वसंवेदनेन भेदानुभवस्यापनयात्। अभिन्नं
ज्ञानमिति चेत्। न। अभेदे ऽपि रक्तस्वभावमरक्तस्वभावं वानुभूयेत
न तु रक्तारक्तस्वभावमिति प्रकाशमानस्य भेदस्यापह्नवायोगात्।
भेदाभेदाभ्यामशक्यविवेचनमाकारचक्रमिति चेत्। न। बाह्यमप्येव-
मेव। बाह्यस्य भेदे ऽप्येकत्वप्रतीतिरविद्यावशादिति चेत् तुल्यं ज्ञाने
ऽपि। ज्ञानानां भिन्नत्वे ऽन्येनान्यस्यावेदनात् कथं रक्तारक्तप्रती-
तिरिति चेत्। न। अभेदे ऽपि कथं रक्तारक्तत्वप्रतीतिरिति तुल्यम्।
अभिन्ने भेदावसायोऽविद्यावशादिति चेत्। न। अनात्मनो भेदस्या-
विद्यावशादप्यनुल्लेखात् उल्लेखे ऽपि वाऽनात्मनो भेदस्या पारमा-
र्थिकतापत्तेः। अभिन्नमेवानुभूतमरक्तव्यावृत्त्या रक्तं रक्तव्यावृत्त्या
चारक्तमित्युच्यत इति चेत्। न। रक्तव्यावृत्तस्यारक्तव्यावृत्ततानु-
पपत्तेः। अनुभवबलादेवमिति चेत् तुल्यं संसर्गस्यासंयोगित्वे ऽपी-
त्यभेदबुद्धेरन्यथासिद्धत्वाद्विरोधात्। ननु च संयोगस्यैकत्र सद-
सत्त्वे रक्तारक्तस्वभावत्वेनैव पटोऽवसीयेत न तु कदाचिद्रक्तत्वे-
नैवेति चेत्। न। रक्तावयवावच्छेदोपाधितिरस्कृतरक्तारक्तस्वभाव-
त्वात्। तन्न। संयोगस्याव्याप्यवृत्तित्वादुपाधीनामपि रक्तारक्तस्व-
भावत्वे तिरस्कारकत्वव्याहतेः। किं चाभावस्य स्वप्रतियोगिसमान-

(१) विज्ञानात्मकं रक्तारक्तरूपम्-पा० २ पु०।

देशकालत्वे स्वभावमात्रविरोधाद[1]न्योन्याभावत्वप्रसङ्गः। मैवम्। संयोगस्य स्वाभावेन सह सादेश्यविरोधसाधकमानाभावात्। भावान्तराणां स्वाभाववैदेश्यनियमात् संयोगोऽपि तथेत्यवधार्यत इति चेत् सोऽयं भावजातीयस्य स्वाभाववैदेश्यनियमो व्यभिचारानुपलम्भमात्रेण वा सिध्यति विपर्यये बाधकप्रमाणप्रवृत्तेर्वा। नाद्यः। तस्य नियमानियमसाधारणत्वात्। नेतरः। तदभावात्। भावाभावयोः समानदेशकालत्वे भावाभावव्यवहारगोचरत्वं न स्यादिति चेत्। न। न हि वैदेश्यभिन्नकालतानिमित्तो भावाभावव्यवहारः किं तु भावाभावाकारव्यवहारयोग्यस्वरूपनिमित्तो घटतदन्योन्याभावयोरिवेत्यतोऽविशेषात्। तस्माद् भावान्तराणां स्वाभावसमानदेशकालत्वविरोधे ऽपि संयोगादीनां [2] स्वभाववैचित्र्यात् समानकालस्वाभावाविरुद्धदेशत्व[3]मव्याप्यवृत्तित्वमाख्यायते। न च वस्त्वन्तरासाधारणमिदं रूपं संयोगादीनामसम्भावनीयं सर्ववस्तूनामसाधारणरूपोच्छेदप्रसङ्गात्। न चैवं रक्ते ऽप्यवयवे रक्तारक्तत्वप्रतीतिः तददृश्यभागवृत्तित्वेन संयोगाभावस्याप्रतीतेः। न चैवं स्वप्रतियोगिना सह समानदेशकालत्वे संयोगाभावस्यान्योन्याभावतापत्तिः नेदमिहेति[4]विलक्षणबोधवेद्यत्वात्। विद्यमानस्यैव वा संयोगस्य उपलम्भानुपलम्भावव्याप्यवृत्तित्वम्। ननु किं देशभेदेनोपलम्भानुपलम्भौ कालभेदेन पुरुषभेदेन वा। नाद्यः। अभिन्नदेशत्वात्। नापरौ। रूपादीनामव्याप्यवृत्तितापत्तेः। देशकालपुरुषाभेदेन पुनरेकस्य वस्तुन उपलम्भानुपलम्भौ विरोधादेवानुपपन्नौ। मैवम्। एकदा तावदुपलम्भानुपलम्भौ भिन्नेष्ववयवेषु न त्ववयविन्यत एव विरोधात् कालभेदेन तु संयोगानुपलम्भः तन्निरूपकस्य महारजनादेः संयोगिनोऽनिरूपणात्।

(१) स्वभावविरोधित्वादिति प्रकाशसम्मतः पाठः। संसर्गाभावस्वभावविरोधादित्यर्थः। (२) प्रसङ्गादित्यधिकम् १ पु०।
(३) समानदेशकालस्वभावाविरुद्धत्व-पा० १ पु०।
(४) न चेदमिदं नेदमिहेति-पा० १। २ पु०।

कुतः पुनः पटनिरूपणे ऽपि महारजनाद्यनिरूपणं पटस्य भूरिदेशव्यापकत्वेनानावृतत्वेनेन्द्रियसन्निकर्षे ऽपि महारजनादेरिन्द्रियासन्निकर्षात्[1]। कुतस्तर्हि पटोऽरक्त इति प्रतीतिरिति चेत् न कुतश्चित् न हि यत्र संयोगः प्रतीयते तत्रैव तदैव तदभावः प्रत्येतुं न शक्यते। पटोऽरक्त इति व्यपदेशस्तर्हि कथमवयववृत्तिना रागाभावेन परम्परासम्बन्धेन तद्व्यपदेशात्। न चावयवसंयोगेनैव संयुक्तप्रत्ययोपपत्तौ संयोगोऽप्यवयविनि नास्तीति वाच्यम्। सर्वत्रावयविनि संयोगोच्छेदे संयुक्तप्रत्ययस्यैवोच्छेदप्रसङ्गात् कारणसंयोगस्य कार्यसंयोगोपार्जननियमाच्च। तस्मादवयववर्तिना संयोगाभावेनावयविनि संयोगस्य सादेश्यव्यपदेशविषयत्वमेवाव्याप्यवृत्तित्वम्। नन्वेवं देशान्तरोच्चरितस्यापि शब्दस्येहस्थेन ग्रहणं स्यात्। न। एतच्छ्रोत्रेण तस्याप्राप्तेः। कर्णशष्कुलीतत्संयोगयोरेकतरस्य श्रोत्रत्वे अत्रस्थोच्चरितस्यापि शब्दस्याग्रहणं ताभ्यामसम्बन्धात् नभसस्तु श्रोत्रत्वे तस्यापि ग्रहणं श्रोत्रप्राप्तेरविशेषादिति चेत्। न। एतद्देशवासिपुरुषं प्रति विशेषादृष्टप्रसूतकर्णशष्कुलीभेदस्य तत्संयोगभेदस्य वा शब्दविशेषोपलम्भ एव सहकारित्वाभ्युपगमात्। सैव तर्हि कर्णशष्कुली अत्र स्थितपुरुषस्य तच्छब्दोपलम्भे सहकारिभूतास्त्विति चेत्। न। तस्या एतत्पुरुषादृष्टानुपगृहीतत्वादिति मूकीभव॥ संयोगः॥

विभागः संयोगप्रध्वंसोऽस्त्विति चेत्। न। संयोगवदुक्तोत्तरत्वात् पल्लवः प्रक्रियायामित्ययं विभागः॥

कथं पुनः परत्वापरत्वे संयुक्तसंयोगाल्पीयस्त्वभूयस्त्वयोरेव तद्व्यवहारहेतुत्वात्। अनुमेयाव् प्रचुरातीततपनपरिस्पन्दावच्छेदादेर्विलक्षणे एव प्रत्यक्ष[2]प्रतिभासिनी परत्वापरत्वे तथान्यत्राप्यनुमानमिति चेत्। न। चिरक्षिप्रादेरपि बहिर्भावापत्तेः। ततः परापरधीरनध्यक्षैवाभ्यासपाटवात् वायुर्वातीतिप्रत्यक्षवदाभासते। ननु

(१) रजनादेरसन्निकर्षात्-पा० १ पु०।
(२) प्रत्यय-पा० २ पु०। एवमग्रे ऽपि।

भिन्नदिगवस्थितयोर्योजनतदर्द्धान्तरितत्वे दूरादूरबुद्धावपि परापरव्यवहाराभावेनातिरिक्तनिमित्तत्वमस्तु । तत्रापि परापरव्यवहारौ स्त इति[1] चेत् । न । मध्यव्यवहारस्यापि प्रसङ्गात् उभयापेक्षसंयुक्तसंयोगाल्पीस्त्वज्ञानजन्यमुभयापेक्षमपरत्वमेव मध्यता भवति हीदमनयोरन्तरालमित्यत्रैकैकावध्यपेक्षयाऽवध्यन्तरे संयुक्तसंयोगभूयस्त्वबुद्धौ सत्यामन्यत्र संयुक्तसंयोगाल्पीयस्त्वमतिः । मैवम् । आर्जवावस्थिते[2]रप्युपयोगात् । भवति हि चतुर्योजनान्तरिता मत्तो वाराणसी द्वियोजनान्तरितं च श्रुघ्नपुरमित्यनुसन्धाय वाराणसी परा अपरं च श्रुघ्नपुरमिति व्यवहारः स यदि संयुक्तसंयोगाल्पीयस्त्वभूयस्त्वावच्छेदकज्ञाननिबन्धनः तदा प्रमातर्यपि परापरव्यवहारप्रसङ्गः ततोऽतिरिक्तपरत्वापरत्वनिबन्धनः । परत्वापरत्वयोरुत्पादनियमः कुत इति चेत् । न । जनकशक्तिवैचित्र्यात् यथा भेर्याकाशसंयोगस्योभयाश्रयत्वेऽपि नभसि शब्दजनननियम इति किरणावलीकारः । तन्न । यत् संयुक्तसंयोगबहुत्वविशेषावच्छिन्नसंयोगाधिकरणत्वेन प्रतिसन्धीयते तत्र परव्यवहारो न तु प्रमातरि तस्यावधित्वेन प्रतीतेः युदा तु प्रमातैव तदधिकरणत्वेन प्रतिसन्धीयते तदा भवत्येव प्रमातरि परव्यवहारो वाराणसीतः परोऽहमिति । संयोगस्वभावत्वे परत्वस्य संयोगिनिरूप्यत्वमेव स्यात् न त्ववधिनिरूप्यत्वमिति चेत् । न । संयोगभूयस्त्वाल्पीयस्त्वयोः परापरव्यवहारविषयत्वेनैव तदुपपत्तेः । अत्रोच्यते । किं पुनः संयोगस्य भूयस्त्वमल्पत्वं च किं परिमाणविशेषः संख्याभेदावच्छेदो वा द्वयमपि न गुणानां गुणसंसर्गायोगात् । आरोपिता संख्येति चेत् । न । द्वित्वत्रित्वादेर्व्यभिचारात् । क्वचिद् द्वित्वं क्वचित् त्रित्वादिकमिति चेत् । न । अनुवृत्तपरव्यवहार[3]विलयापत्तेः एकत्र चतुष्ट्वे त्रित्वपञ्चत्वाद्यपेक्षया परापरव्यवहारानुपपत्तेश्च । चतुष्ट्वे त्रित्वपञ्चत्वाद्यपेक्षया बहुत्वमल्पत्वं च तद्व्यवहारनिमित्त-

(१) व्यवहारोऽस्तीति-पा० २ पु० । (२) एकदिगवस्थितेरित्यर्थः ।
(३) अनुवृत्तव्यवहार-पा० २ पु० ।

मिति चेत् । न । चतुष्ट्वे बहुत्वाल्पत्वयोरभावात् । परसंख्यावच्छिन्नत्वं भूयस्त्वमिति चेत् । न । संख्यायाः स्वाभाविकपरत्वाभावात् । आरोपितत्वेऽपि क्वचिद्वास्तवपरत्वस्वीकारात् । संख्यायाः प्राथम्यमपरत्वं पश्चाद्भावश्च परत्वमिति चेत् । न । परत्वापरत्वेतरस्य प्रथमपश्चाद्भावस्यैवासिद्धेः । पराचीनापराचीनापेक्षाबुद्धिजन्यत्वं तदिति चेत् । न । परत्वापरत्वे विहाय परावाग्भावयोरभावात् । येन विषयेणापेक्षाबुद्धेर्वैचित्र्यं स इति चेत् । न । अपेक्षाबुद्धेर्विषयवैचित्र्यमन्तरेणापि विचित्रकार्यजननशीलत्वेन विलक्षणफलजनकत्वाविरोधात् । अत एव तर्हि विचित्रव्यवहारजनकत्वमस्त्विति चेत् । न । विषयविशेषविमर्शमन्तरेण विलक्षणव्यवहारविलक्षणफलजनकत्वविरोधात्[1] बुद्धेः स्वरूपवैचित्र्यस्य परापरव्यवहारास्पदस्य परत्वापरत्वैककार्योन्नेयत्वात् । कुतस्तर्हि संयुक्तसंयोगाल्पत्वबहुत्वप्रतिभासनमिति चेत् परत्वापरत्वोत्पत्तेः पूर्वमकुतश्चिदसत्त्वात् न च संयुक्तसंयोगस्वरूपं कश्चिद् दर्शयति । प्रत्येकं सामान्यतस्तदनुमानमिति चेत् । न । न ह्यविद्यमानमनुमातुं शक्यं न च लिङ्गमस्ति । दूरत्वादूरत्वे लिङ्गमिति चेत् । न । दूरत्वादूरत्वयोः परत्वापरत्वातिरिक्तयोरभावात् । ततः परत्वापरत्वसामानाधिकरण्यमेव संयुक्तसंयोगस्य भूयस्त्वमल्पत्वं च उत्पन्ने परत्वापरत्वे अवभासते । यत्तु भासर्वज्ञीयं मतं पूर्वोत्पन्नत्वं परत्वं पश्चादुत्पन्नत्वमपरत्वमिति । तत् कणभक्षपक्षाक्षमामात्रविजृम्भितम् । पूर्वपश्चाद्भावस्य परत्वापरत्वातिरिक्तस्य निर्वक्तुमशक्यत्वात् यथा चैतत्तथास्माभिरपीश्वरसिद्धावुक्तम् ॥

प्रकाशो बुद्धिः सा च द्विविधा विद्या चाविद्या च । तत्राविद्या संशयविपर्ययस्वप्नानध्यवसायलक्षणा । तत्र न तावत् संशयस्योभयविधिर्विषयः पुरुषः स्थाणुश्चेतिसमुच्चयप्रसङ्गे विकल्पानुपपत्तेः । नाप्युभयानिषेधः स्थाणुर्न पुरुषो नेतिप्रतीतिप्रसङ्गात् । नाप्यन्यतरनिषेधः स्थाणुरेवेत्यवधारणप्रसङ्गात् ।

(१) व्यवहारापहारविरोधात-पा० २ पु० ।

नाप्युभयविधिनिषेधौ उभयावधारणप्रसङ्गात्। निषेधस्य चानुप-
लम्भमात्राद्वा निश्चयो योग्यतासहिताद्वा ।नाद्यः । अतीन्द्रि-
यनिषेधावभासापत्तेः । न द्वितीयः । तत्त्वस्फुरणे अतत्त्वारो-
पानुपपत्तेः स्थाणुत्वोपलम्भे च तदनुपलम्भाभावात् शुक्तिकायां
रजतावभास इवाभावावभासानुपपत्तेः तत्र दोषवशादेवाभावा-
नुपलम्भस्यात्रापि समानत्वात्[1] दूरत्वादेरपि तत्रापि सत्त्वात्।
वार्थश्च न द्वयविधिर्न द्वयनिषेधः अन्यतरनिषेधो वा कीर्तितदो-
षात्।नापि चरमो नित्योऽनित्यो वेत्यत्राधिकाभावासत्त्वे तदनुपप-
त्तेः । नापि विरोधः तन्निश्चये वाशब्दसम्भेदानुपपत्तेः एकको-
टिस्वीकारप्रङ्गे च तदनुपपत्तेः। अन्य एवायमाकारभेदः स्ववा-
सनायातो वाशब्दसम्भेदी अस्थाण्वादिव्यावृत्तिकृतश्च स्था-
ण्वादिपदप्रयोगः चित्राकारे नीलादिशब्दसम्भेदवदिति। समान-
धर्मादिजत्वं लक्षणमसिद्धमिति चेत्। न[2]। उभयविधेरुभयनिषे-
धवैशिष्ट्यस्य विषयत्वात्। दूरत्वात्तु विशेषाग्रहे स्मृतिस्तयोर्भावा-
भावयोरारोपात् ऊर्द्धत्वस्योभयसाधारण्येन[3] उभयराशिस्मारक-
त्वात् दोषमाहात्म्यात् तदनुपलम्भाभावे ऽपि सन्निकर्षाभावे
रजतारोपवत् कोटिचतुष्टयारोपापत्तेः एकत्र धर्मिणि स्फुरितयो-
राकारयोर्विरोधस्यैव[4] विकल्पविषयत्वात् तस्यैव च वाशब्दाभि-
लापादिति सर्वं सुस्थं परस्परविरुद्धयोरवमर्श[5] इति लक्षणम् ॥

विपर्ययोऽपि अतस्मिंस्तदिति प्रत्ययः । यथा शुक्तिकायां
रजतमिति ज्ञानम्। ननु चात्र पुरोवर्तिज्ञानं दोषवशोपजाततदंश-
मोषं रजतत्वसामान्यस्मरणं रजतत्वस्य पुरोवर्तिनि समवायतद-
भावयोरज्ञानं प्रवृत्तिव्यपदेशादिरूपव्यवहारे कारणं सत्यरजते
ऽपि तथैव प्रवृत्तिदर्शनात् तत्रापि हि रजतव्यक्तिज्ञानं रजतत्व-

(१) तुल्यत्वात्-पा० २ पु० । (२) केचित्। तत्र-पा० २। ३ पु०।
(३) ऊर्ध्वत्वस्यैवोभयराशिसाधारण्येन-पा० २ पु०।
(४) स्फुरितयोर्विरोधस्यैव-पा० २ पु० ।
(५) विरुद्धार्थावमर्शः संशयः-पा० २ पु

बाधश्च आन्तरालिकव्यक्त्यन्तरापरिस्फुरणं समवायाज्ञानं च
तत्प्रतिपादकलिङ्गाभावात् । अविसंवादिव्यवहारजनकत्वविशिष्ट-
साकाङ्क्षरूपरूपिसहोपलम्भो हि तल्लिङ्गं विसंवादिव्यवहारज-
नकयोः पीतत्वशङ्खयोः समवायाभावात् तदविसंवादित्वं तु प्र-
वृत्त्युत्तरकालगम्यं प्रवृत्तेः पूर्वमप्रतीतमसिद्धमाभासभूतं देशका-
लानवच्छिन्नरजतत्वसमवायिस्मरणदर्पणारूढमनुभूतपुरोवर्तिना व-
स्तुना अगृहीतभेदं वा प्रवृत्तिकारणं भेदज्ञानमसमवायज्ञानं च निव-
र्तकमिति व्यवस्थिते प्रयुज्यते विवादाध्यासिताः प्रत्यया[1] यथार्थाः
प्रत्ययत्वात् घटप्रत्ययवदिति गुरुमततत्त्ववेदिनः । अत्रोच्यते ।
व्यवहारो हि व्यवहर्तव्योपलम्भनिबन्धनो न तु व्यवहरणीयविप-
र्ययानुपलम्भनिबन्धनः न हि घटव्यवहारस्तन्मतिमतिक्रम्य कल-
सविपर्ययानुपलम्भेन भवति यदि तु स्यात् संसर्गानुपलम्भबले-
नासंसर्गव्यवहारोऽपि दुर्वारः । तस्माद्यो व्यवहारः स व्यवहर्त-
व्यप्रकाशनिबन्धनो यथा कलसव्यवहारः व्यवहारश्चायं विमति-
गोचर इति । अपि च वास्पपूरगोचरधूमव्यवहारोपचारात् भवति
शिखरिणि शिखरगोचरविचित्रचित्रभानुव्यवहृतिः सा किं सं-
सर्गज्ञान[2] पूर्विका असंसर्गाग्रहपूर्विका वा।नाद्यः। अन्यथाख्याति-
स्वीकारचमत्कारात्।न द्वितीयः। अनुमानमात्रोच्छेदप्रसङ्गात् एवं शा-
ब्दे ऽपि वाच्यम् । असंसर्गाग्रहस्य बाधिताबाधितव्यवहारकारणत्वे
व्यवहारवैचित्र्यं संवादित्वासंवादित्वरूपं न स्यादिति संवादी
व्यवहारः संसर्गविज्ञप्तिपूर्वक इति चेत्।न। संसृष्टयोरसंसर्गाग्रहस्य
संवादिव्यवहारहेतुत्वात् शाब्दे ऽपि चानाप्तप्रणीतवाक्यप्रभवस्मृ-
तिसन्तानासंसर्गाग्रहस्याविसंवादिव्यवहार[3]हेतुत्वात् संसर्गग्रह-
स्य च विसंवादिव्यवहारहेतुत्वे ऽसंसर्गाग्रहादविसंवादिव्यव-
हारे व्यवहारवैचित्र्यस्यान्यथासिद्धेः रजतत्वतद्व्यञ्जकयोः संस-
र्गाग्रहे ऽपि संवादिव्यवहारदर्शनेनानैकान्तिकत्वाच्च । या यद्वि-

(१) सर्वप्रत्यया इति प्रकाशसम्मतः पाठः। (२) संसर्गावज्ञप्ति-पा०२पु०।
(३) संसर्गव्यवहार पा० २ पु० ।

लक्षण आभासः स तद्विजातीयप्रमाणप्रतिरूपकः यथा प्रत्यक्षाभासः शाब्दाद्याभासात् विलक्षणौ च शब्दलिङ्गाभासौ प्रत्यक्षाभासादिति शब्दानुमानसिद्धिरिति चेत्। न। विचारासहत्वात् तत्सादृश्यं वा तदाभासत्वं विपर्यस्तव्यवहारजनकत्वं वा तद्विपर्ययत्वं वा। नाद्यः। अनेकान्तात् भवति प्रत्यक्षाभासाद्विलक्षणस्तर्कदृष्टान्तस्मरणदूषणाभासो न तु प्रत्यक्षेतरप्रमाणप्रतियोगिकः। अत एव न द्वितीयो दृष्टान्ताभासादेरपि विपर्यस्तव्यवहारजनकस्य प्रमाणप्रतियोगिकत्वाभावात्। यो यद्विलक्षणः प्रमाणाभास इति विशेषणादयमदोष इति चेत्। न। शब्दलिङ्गयोः प्रामाण्यसिद्धिमन्तरेण शाब्दलिङ्गाभासयोः प्रमाणाभासत्वासिद्धेः शाब्दाभासो हि पदार्थस्मृतिसन्तानासंसर्गाग्रहरूपत्वात् स्मरणाभासः स्यात् शब्दप्रामाण्यसिद्धौ च तदाभासस्याप्यन्यथाख्यातिस्वभावत्वसिद्धेः। न तृतीयः। अन्यथाख्यातिस्वीकारात्। यश्चाभासो नासौ संसर्गवेदनप्रतियोगिको यथेदं रजतमित्याभासः आभासश्च शाब्दादिः यः संसर्गव्यवहारः सोऽसंसर्गाप्रतिभासपूर्वको यथा रजतव्यवहारभेदः तथा च विवादाश्रय[१] इति निषेधाच्च शब्दानुमानार्थापत्तिप्रामाण्याक्षेपकं प्रत्यनुमानोपन्यासानवकाशाच्च। यथा दीपैकत्वव्यवहारो भेदाग्रहात् तथा च प्रत्यभिज्ञानमात्रमुच्छिद्येत तत्तुल्ययुक्तिकत्वात्। यत्राभेदोऽस्ति तत्रावभासते न सर्वत्रेति चेत्। न। यत्राभेदोऽस्ति तत्र व्यवह्रियते न सर्वत्रेति तुल्यम्। अविद्यमानोऽप्यभेदस्तदभावाग्रहाद्व्यवह्रियत इति चेत् तुल्यमसन्नप्यभेदो भेदाग्रहादवभासते। ननु चैवमप्यन्यथाख्यातिरनुपपन्ना कारणाभावात्। दोषाः कारणमिति चेत् न। दोषाणां यथार्थज्ञानजननप्रतिबन्धे सामर्थ्यात् विपरीतज्ञाने त्वसामर्थ्यात् न खलु दुष्टं न्यग्रोधबीजं कुटजधानाय[२] कल्पते। दवदहनदग्धवेत्रबीजस्य कदलीकाण्डजनकत्ववत् भस्मकदुष्टजठरानलस्य बहुतरान्नपानपाकहेतुत्ववच्च दोषाणां विपर्ययहेतुतेति

(१) विवादाध्यासितः-पा० २ पु०।

(२) कुटजबीजं न्यग्रोधधानायै-पा० २ पु०।

चेत्। न। दग्धस्यावेत्रबीजत्वात् अन्यस्यैव विजातीयफलहेतुत्वात् प्रभूतदाह्यदहनशक्तेरनलेषु स्वाभाविक्या अन्नरसजननशक्त्या अभिभवे भस्मकेन रसहेतुशक्तिप्रतिबन्धे प्रभूतदाह्यदहनशक्तेरनभिभूतत्वात्। तदेतदपेशलम्। यथा दाहस्य वेत्रबीजविनाशकत्वं रूपान्तरजनकत्वं च तथा दोषाणामपि अयथार्थज्ञानजननमन्यविज्ञप्तिप्रतिबन्धकत्वं च स्यात् दहनस्य प्रचुरा दाहशक्तिः किं स्वरूपमुतातीन्द्रियं रूपमथ सहकारिभेदः तत्र न तावदाद्यः तथा सति रसार्जनदाहसामर्थ्ययोरभेदेनाभिभाव्याभिभावकभावाभावात्। न द्वितीयोऽसिद्धेः। न तृतीयः। भस्मकाभावस्य रसजननसहकारित्वेन तदभावस्य प्रचुरदाहजनकत्वमिति दोषकारणतापत्तेः यथा वाऽविसंवादिव्यवहारोपहारशीलानां विज्ञानानां दोषवशात् तदजननेऽपि विसंवादिव्यवहारप्रसवक्षमत्वं तथैव तदपि स्यात्। अयथार्थत्वे ज्ञानस्य ज्ञानमात्रेऽनाश्वासप्रसङ्गः स्यादिति चेत्। न। विसंवादिव्यवहारजनकत्वेऽपि तुल्यत्वात्। यत्र विशेषदर्शनं संशयहेतुदोषानुपलम्भो वा न तत्र व्यवहारविसंवादशंकेति चेत् तुल्यमयथार्थविषयत्वेऽपि। स्वाभाविकं ज्ञानस्य संवादिव्यवहारजनकत्वमापवादिकमन्यथात्वमिति चेत्। न। शाब्देऽपि तथापत्तिरिति लौकिकवाक्यानामप्रामाण्यं न स्यात्। ननु च कारणत्वं वा विषयत्वं तद्गोचरव्यवहारजनकत्वं वा तत्प्रतिबद्धव्यवहारजनकत्वं वा। नाद्यः। अतीतादेरविषयतापत्तेः। न द्वितीयः। रजतप्राप्तिवत् रजताभावप्राप्तिव्यवहारस्यापि जननात् रजताभावविषयताप्रसङ्गात्। तृतीये तु पुरोवर्तिरजततादात्म्ये विषयत्वमसम्भावितमेव। तन्नियतव्यवहारजननाभावादिति चेत्। न। यत्र यस्येच्छाप्रयत्नजनकत्वं येन वा निरूपणं तस्य तद्विषयत्वात्। कारणमेव साक्षात्कारिणो ज्ञानस्य गोचरो नाकारणं रजतमिति चेत्। न। प्रत्यभिज्ञायां पूर्वकालताया अपि[१] गोचरत्वात्। यदसत् तन्न प्रकाशते यथा व्योमकमलमसच्च पुरोवर्तिरजततादात्म्यमिति चेत्।

(१) प्रत्यभिज्ञाया अपि-पा० २ पु०।

न । व्योमकमलस्यापि शब्दाभासप्रतिभासित्वेन दृष्टान्तस्य
साध्यविकलत्वात् पुरोवर्तिरजततादात्म्यप्रतीतौ चान्यथाख्याति-
स्वीकारात् अप्रतीतौ चाश्रयासिद्धेः असंसर्गाग्रहबलेन च व्यवहारे
तत्रासत्त्वस्याप्रतीतौ हेतोरपक्षधर्मत्वात् । असत्त्वेनासंसर्गाग्रहात्
पक्षधर्मताव्यवहार इति चेत् । न । सत्त्वेनापि तथापत्तेः । असतोऽका-
रणत्वात् कथं साक्षात्कारिप्रतीतिविषयत्वमिति चेत् । न । संस्कारो-
पनीतस्याकारणस्यापि प्रत्यभिज्ञायां तत्तांशस्य प्रतीतिविषयत्वात् ।
प्रत्ययत्वं त्वदुष्टसामग्रीप्रसूतत्वप्रयुक्तं सत्यभावमिथ्यासिद्धप्रतिबन्ध-
मित्यास्ताम् । स चायं सादृश्यानपेक्षस्तिक्तो गुड इत्यादौ भ्रमः अ-
न्यत्रापि तस्यारोप्यस्मृत्युपक्षीणत्वात् न च हस्तिनि मशकारोपाप-
त्तिरारोप्यव्यावर्तकाग्रहस्याभावात् नीलं शार्वरं तम इति[1] च भ्रमः ।
तमो नाभावात्मकं विध्याद्यात्मकतया वेदनात् नापि नित्यं रात्रिन्दिव-
विभागानुपपत्तेः अनित्यं च न चलनात्मकं[2] तथानवभासनात्
अचलनात्मकं च न गुणवत् आरभ्यत्वानारभ्यत्वाभ्यां व्याकोपात् ।
न निर्गुणमद्रव्यद्रव्यगं[3] चाक्षुषत्वात् नानेकद्रव्यद्रव्यगमालोकनिरपे-
क्षवेदनत्वात् । ततो भूरूपमारोपितं तम इति चेत् । न । विचारासहत्वा-
त् । स ह्यनुभूयमानारोपो वा सावित्रतेजसि पित्तपीतिमवत् स्मर्य-
माणारोपो वा नेदीयस्यणीयस्यपि महत्त्ववत् स्यात् । नाद्यः । आ-
लोकं विना तदननुभवात् । तुल्यमभावे ऽपीति चेत् । न । अभावग्र-
हे ऽपि प्रतियोगिग्रहापेक्षायां तद्ग्रहव्याघातात् रूपे तु तदनपेक्षायामेव
दोषात् । नेतरो गगनादेरप्यतीन्द्रियत्वात् क्षित्यादेरालोकसापेक्षवेद-
नत्वात् ततोऽभाव[4] एवायं शुक्लादिव्यावृत्तिनिबन्धनस्तु नीला-
दिव्यवहारश्च सषयोरिव सव्यवहारो गौडानां भावत्वेन वेदनम-
प्यसिद्धमित्यादि तात्पर्यपरिशुद्धावुदयनः । अथवा प्रतियोगि-
वाचकावच्छिन्नवभिलापप्रतिभासशून्यतया विधिमुखत्वाभिमा-
नात् एतच्चालोकप्रतियोगिकनिषेधबोधकैरन्धकारतिमिरादिपदै-

(१) शार्वरमिति-पा० १ पु० । (२) चलात्मकं-पा० १ पु० । एवमग्रे ऽपि ।
(३) अद्रव्यगं-पा० १ पु० । एवमग्रे । (४) भावाभाव-पा० २ पु० ।

रवच्छिन्नस्य तस्य भासनात् विमलं जलं तिष्ठति भूपतिरितिवत्
कदाचित्त्वालोकाभावोऽधुनेत्यनेनाकारेण प्रतायत इति । न चैक-
वाचकावच्छेदेनैव वस्तु प्रतिभासते घटः कलस इति बहुशः
प्रतीतेः । यदि वालोकाभाव एव नीलत्वं भावत्वं चारोप्यते चल-
नवत् न च प्रतिपक्षाप्रतीतावप्रतीतिः दोषवशादिन्द्रियविषयेषु इन्द्रि-
याणां प्रतीतचरसहकारिनिरपेक्षतादर्शनात् भवति हि कामातुरस्य
कामिनीसाक्षात्कारे सन्निकर्षानपेक्षा आलोकानपेक्षेव परेषाम् । न
च दोषाभावः तेजोऽभावस्य सकलस्वप्रतिपक्षनिवृत्तिसाहचर्य-
स्यैव दोषत्वात् । अत एव दिवा तुहिनकरकरप्रसाराभावे ऽपि न
नीलारोपः न चाभावमात्रे तदारोपोऽनधिगतनीलभावस्य तदना-
रोपो वा दोषवैचित्र्यादेवाधिष्ठाननियमोपपत्तेः वशोरगविभ्रमवत् ।
न चालोकानपेक्षा दोषः अभावग्रहे प्रतिपक्षापेक्षायामभाव-
ग्रहणव्याघातात्[1] । न चाभावे भावधर्मानारोपः दुःखसंयोगा-
भावादौ सुखविभाग[2]व्यवहारदर्शनात् महाप्रलये च महत्त्वव्य-
वहारदर्शनात् चलनारोपश्च विभिन्नदेशवर्तिनो[3]रभावयोरुत्पादे
पूर्वनाशे सत्युत्तरजन्मनि पूर्वदेशादर्शने सत्युत्तरदेशदर्शनात् । स्मृ-
तिविपर्ययस्त्व[4]सम्भावित एव जाग्रतां तदनुपपत्तौ छायादि-
व्यवहारविलयात् अन्यथा विश्वप्रकाशप्रत्ययस्यास्तमयत्वप्रसङ्गात्
अवश्यं चैवमन्यथा तमःसामानाधिकरण्यप्रतीतेरनुपपत्तेः । न हि
नीलरूपं समारोपिततथाभावं वा तमोऽतिप्रसङ्गात् किं त्वालो-
कमात्राभाव एवेति ॥ विपर्ययः ॥

अनध्यवसायोऽपि समुच्चिताशेषविषयो[5] वा वाच्यो व्या-
प्तिबोधवत् अनिश्चितैकविषयो वा असमुच्चितनानाविषयो वा ।
नाद्यः । धूमो वह्निनियत इतिवत् पनसे सर्ववाचकाध्यव-
सायापत्तेः । नेतरः । अविद्यात्वव्याकोपात् । एकं वाचकमिव

(१) अभावग्रहणप्रसङ्गात्-पा० २ पु० । (२) विभागादि-पा० २ पु० ।
(३) दिग्वर्तिनो-पा० १ पु० । (४) विपर्ययपक्षस्तु-पा० २ पु० ।
(५) अशेषविशेषविषयो-पा० २ पु० ।

अवाचकमपि स्पृशतीति संविदविद्येति चेत् । न । संशयतापत्तेः । तृतीये तु संशय एवायमिति तु भूषणः । मैवम् । सामान्यतोऽवगते विशेषतोऽज्ञाते जिज्ञासिते वाच्यविशेषे यदा किंशब्दाभिलापः तदानध्यवसायः । अव्यवस्थितनानावाचकवाच्यत्वप्रतिभासे तु संशय इति । अविद्यात्वं तु विशेषव्यवहारपरिपन्थित्वादिति रम्यम् ॥ अनध्यवसायः ॥

कथं पुनः स्वप्नज्ञानमविद्या यतो यद्विद्यातो न विशिष्यते तद्विद्यात्मकम् । यथा सव्येतरकामिनीकुचकलसनिर्भासः । न च विशिष्यते स्वप्नज्ञानं विद्यातः । इदं बाधितमिति चेत् । न । स्वरूपविषयफलापहारात्मकबाधविरहे विपरीतार्थोपदर्शनमात्रस्योभयत्रापि तुल्यत्वात् । अनादित्वेन पूर्वोत्तरभावस्यानियामकत्वात् अव्यभिचारित्वस्य स्वप्ने ऽप्यप्रतिक्षेपात् । बाधात् तत्प्रतिक्षेप इति चेत् । न । बाधस्यैवासिद्धेः । जाग्रदवस्थायां सजातीयेषु प्रबन्ध[1]संवादात् स्वप्नस्य काकतालीयसंवादादिति चेत् । न । काकतालीयसंवादवतोऽपि चिरादृष्ट[2]पुनर्दर्शनादेरव्यभिचारात् प्रबन्धसंवादवतोऽपि दीपैकत्वनिर्भासादेर्व्यभिचारात् । अर्थक्रियासंवादविसंवादै जागरणस्वप्नलक्षणमिति चेत् । न । स्वप्नपरिदृष्टजलादेरपि पानावगाहनाद्यर्थक्रियादर्शनात् । जाग्रदवस्थायां तदनुपलम्भेन बाधात्तासामर्थक्रियाणामसत्यत्व[3]मिति चेत् । न । प्रबुद्धदृष्टार्थक्रियाचक्रस्यापि स्वप्ने विपर्यासोपलम्भात् । मिथ्याप्रत्ययप्रवाहः स्वप्नः तद्विपरीतप्रत्ययस्तु जागरणमिति चेत् । न । मिथ्याप्रत्ययप्रवाहस्यापि पीतशङ्खगोचरस्य जागरणत्वात् । प्रचुरतरमिथ्याप्रत्ययप्रवाहः स्वप्नो भूरियथार्थप्रत्ययप्रवाहो जागरणमिति चेत् । न । तन्मर्यादाघटितप्रचुरतरविपर्ययप्रत्ययप्रवाहस्यापि जागरणत्वात् । बहिरिन्द्रियप्रवृत्तिभावाभावाभ्यामर्जितं ज्ञानं स्वप्नजागरणात्मकमिति चेत् । न । योगिनां ध्यानसन्ततेरपि स्वप्नत्वप्रसङ्गात् । सिद्धोपप्लुतान्तकरणजं ज्ञानं

(१) सजातीयप्रबन्ध-पा॰ २ पु॰ । (२) चिरदृष्ट-पा॰ २ पु॰ ।
(३) [illegible]-पा॰ २ पु॰ ।

स्वप्नोऽन्यच्च जागरणमिति चेत् का सिद्धा निरिन्द्रियप्रदेशे मनसोऽवस्थानं कुतस्तर्हि सुषुप्तिः स्वप्नज्ञानजनकस्य संस्कारस्यादृष्टस्य वा कालविशेषसहितस्याभावात् । मैवम् । जाग्रत्प्रत्ययानामपि स्वप्नप्रत्ययवत् पूर्वपरिदृष्टवासनाजन्यत्वे ऽपि निद्राभिभूतान्तःकरणजत्वनिवृत्तेरनवधारणात् । कथं तर्हि प्रथममेव जागरणगोचरपदार्थोपलम्भ इति चेत् । न । अनादित्वादस्य विभ्रमस्य । सजातीयावस्थाप्रबन्धसंवादो जागरोऽन्यस्तु स्वप्न इति चेत् किं साजात्यं जाग्रत्प्रत्ययगोचरत्वं चेत् स्वप्ने ऽपीदमस्तीति सजातीयप्रबन्धसंवादोऽसिद्धः । प्रबन्धबाधकादिर्बाध्यप्रबन्धान्तो जागरितं नान्य इति चेत् । न । क्वचित् स्वप्ने ऽपि पूर्वजाग्रत्प्रत्ययप्रवाहो मिथ्येति प्रबन्धबाधकप्रत्ययस्यादिभूतस्य सत्त्वात् तदन्तर्भूतजाग्रद्विज्ञप्तिसन्तानस्य च स्वापानन्तरस्वप्नवर्तिना ज्ञानेन[1] सर्व एष जाग्रत्प्रत्ययो मिथ्येति बाध्यमानत्वात् ततो भेदकलक्षणाभावात् न विशिष्यते जाग्रत्स्वप्नज्ञानमिति । अत्रोच्यते । किं प्रमाणत्वेनाविशेषः स्वप्नप्रबोधज्ञानयोरुताप्रमाणत्वेन उत स्वप्नत्वजाग्रत्त्वाभ्याम्[2] । नाद्यः । सर्वजनसिद्धस्वप्नप्रबोधभेदप्रत्ययस्यापि जागरत्वेन प्रमाणत्वाद्धेतोर्बाधात् । न द्वितीयः । अविशेषप्रत्ययस्यैवाप्रामाण्ये विशेषनिषेधव्याघातात् । न तृतीयः । अनुभवबाधितत्वात् । मिथ्यायमनुभव इति चेत् । न । अनुभवमिथ्यात्वग्राहकं ज्ञानं सत्यं मिथ्या वा । मिथ्या चेद्भेदाऽनुभवः सत्य इति हेतोर्बाधः । सत्यं चेत् तत एवासत्यप्रत्ययान्न भिद्यते सत्यं चेत्यनेकान्तः । बाधितत्वाबाधितत्वाभ्यां विशेष इति चेत् तुल्यं स्वप्नजाग्रद्बोधयोरपि । कथं तर्हि स्वप्नजाग्रद्बोधयोर्भेदव्यवहृतिः विनापि लक्षणभेदमनुभवसिद्धत्वात् सुखदुःखवत् । तत्रानुकूलप्रतिकूलवेद्यत्वं लक्षणमिति चेत् । न । सुखदुःखातिरिक्तयोरनुकूलप्रतिकूलयोरसिद्धेः । इष्टत्वमनुकूलत्वमिति चेत् । न । इच्छाया एव लक्षणभेदासिद्धेः । इच्छात्वं तदिति चेत् । न ।

(१) स्वापानन्तरवर्तिना स्वप्नज्ञानेन-पा॰ २ पु॰ ।
(२) स्वप्नजागरत्वाभ्यां-पा॰ २ पु॰ ।

तस्याप्यसिद्धेः। सुखत्वं दुःखत्वं लक्षणमिति चेत्। न। तयोरेव भेदा-
सिद्धेः। अनुभवसिद्धं तदिति चेत् तुल्यमत्रापि एवं जल्पवितण्डाभ्यां
परिभूते वादिनि सिद्धोपप्लुतान्तःकरणजप्रत्ययप्रवाह एव स्वप्न
इति वादे लक्षणमनवद्यम्। ननु तथापि जाग्रत्प्रत्यया निराल-
म्बनाः प्रत्ययत्वात् स्वप्नप्रत्ययवदिति विद्याऽविद्याविभागोऽनु-
पपन्न इति चेत्। न। किमिदं निरालम्बनत्वमसत्प्रकाशनशीलत्वं
वा अन्यथाख्यातिरूपत्वं वा स्वात्मालम्बनत्वं वा। न तावदाद्यौ।
प्रतिबन्धप्रत्ययस्य निरालम्बनत्वे हेतोः प्रतिबन्धासिद्धिप्रसङ्गात्
तत्त्वालम्बनत्वे तेनैव व्यभिचारात्। न तृतीयः। स्वप्नपद्धतिपति-
तानां विज्ञप्तीनां बाह्यालम्बनत्वेन स्वात्मालम्बनत्वासिद्धेः।
तदसिद्धं सर्वस्यैव गौरगान्धारमधुरसुकुमारसुरभिशातेतरादि-
भदस्य वेदनस्वभावत्वात्। तथाहि यत् प्रकाशते तद्विज्ञानं यथा
प्रकाशः प्रकाशन्ते च नीलादयः न च ज्ञानाद्भेदे प्रकाशमानत्वं
सम्भावनीयं तद्धि न तावत् प्रकाशं प्रति कारणत्वं तेन समान-
सामग्रीप्रतिबन्धो वा रूपविज्ञाने चक्षुषोऽपि प्रकाशतापत्तेः।
नापि प्रकाशसारूप्यं साकारत्वे वित्तीनां बाह्यनीलादिभेदस्या-
सिद्धेः कस्य सारूप्यम्। तद्धि न तावदनुभवादेव व्यवस्थाप्यं नी-
लाकारद्वयाननुभवात्। नाप्याकारकादाचित्कत्वात् तस्य भ्रान्तप्र-
त्ययाकारवत् वासनापरिपाककादाचित्कत्वेनाप्युपपत्तेः ज्ञान-
समानरूपत्वे च बाह्यस्य ज्ञानत्वापत्तेः। सादृश्यं समानत्वमिति
चेत्। न। विधिरूपस्य तस्यासिद्धेः। अनीलव्यावृत्तिर्नीलनीलधियोः
सादृश्यमिति चेत् किमनीलं बाह्यनीलाकारप्रच्युतिर्वा नीलज्ञा-
नप्रच्युतिर्वा ज्ञानाज्ञानसाधारणनीलमात्रप्रच्युतिर्वा। नाद्यः। ज्ञा-
नस्य बाह्यनीलप्रच्युतिनिवृत्तिरूपत्वाभावात्। न द्वितीयः। बाह्यस्य
नीलज्ञानप्रच्युतिनिवृत्तिरूपत्वाभावात्। न तृतीयः। ज्ञानाज्ञानसा-
धारणस्य नीलमात्ररूपस्यासिद्धेः। नापि प्रकाशेन सार्द्धं विषय-
विषयिभावः नीलतज्ज्ञानयोरतिरिक्तस्य सम्बन्धस्याभावात्। स्वा-
भाविकः सम्बन्ध इति चेत्। न। स्वभावप्रभवस्यापि सम्बन्ध-

स्याभावात्। स्वभावः सम्बन्ध इति चेत्। न। असम्बद्धत्वेन[1] प्रती-
यमानयोर्नीलतद्वेदनयोः सम्बन्धरूपताव्याघातात्। असम्बद्धस्यैव
सम्बद्धव्यवहारजनकत्वमिति चेत्। न। सम्बन्धाभावाक्रान्तस्य त-
त्सत्ताव्यवहारजनकत्वविरोधात् सर्वत्र सम्बन्धोच्छेदप्रसङ्गाच्च। त-
न्निरूपणाधीननिरूपणत्वं तद्विषयत्वमिति चेत्। न। विषयविषयि-
भावानिरुक्तौ तस्यैवेदं निरूपणमित्यस्यैवासिद्धेः। तेन व्यपदिश्य-
मानत्वमिति चेत्। न। व्यपदिश्यमानताया व्यपदेशजनितज्ञानवि-
षयतानतिरेकात्। ज्ञानजनितव्यवहारगोचरत्वमिति चेत्। न। इच्छा-
दिरूपस्य व्यवहारस्यैवोपेक्षाज्ञाने ऽभावात्। तद्गोचरसंस्कारस्मृति-
जनकत्वमिति चेत्। न। स्मृतेरपि तद्गोचरताया अनिरुक्तेः। व्यवहा-
रजननयोग्यत्वमिति चेत्। न। योग्यताया एवानवगमात्। सामग्री-
विशेषप्रसूतत्वमिति चेत् न तावत् सामग्र्या असाधारणे ज्ञा-
नरूपे जनकत्वमन्वयव्यतिरेकयोरभावात्। नाप्यवान्तरज्ञान-
रूपे विशेषे[2] नीलज्ञानत्वरूपापरसामान्यस्याभावात् नीलवि-
षयतारूपस्य विशेषस्यासिद्धेः। स्वरूपमेव ज्ञानस्य विषयि-
त्वं नीलादेश्च विषयत्वमिति चेत्। न। स्वरूपस्य सर्वं प्रत्य-
विशेषात् ग्राह्यग्राहकव्यवहारनियमानुपपत्तेः नीलादिवस्तुस्व-
रूपस्य सर्वसाधारणत्वोपलम्भेन ज्ञानस्यापि सर्वसाधारणत्वा-
त् सर्वविषयताप्रसङ्गाच्च। ततः प्रकाशतादात्म्यमेव प्रकाशमा-
नत्वम्। नन्वेवं सति साध्याविशिष्टत्वं प्रकाशमानत्वज्ञानत्वयोर-
भेदात्। न। प्रकाशमानज्ञानयोरभेदेऽपि व्यावृत्तिभेदस्य सत्त्वात्
अप्रकाशव्यावृत्तेः साधारणव्यावृत्तेर्वा ज्ञानतारूपत्वात् अ-
प्रकाशमानतानिवृत्तेश्च प्रकाशमानतारूपत्वात्। ननु प्रकाशमान-
त्वं प्रकाशसम्बन्धः प्रकाशतादात्म्यं वा द्वयमप्यसिद्धम्। न। विशेषा-
सिद्धावपि प्रकाशमानप्रत्ययगोचरस्वरूपस्योभयसिद्धत्वात्। अत्रो-
च्यते। अभेदपक्षेऽपि किं प्रकाशस्य नीलगोचरत्वम्। नीलाकारत्व-

(१) असम्बन्धेन—पा. १ पु। (२) अवान्तरविशेषे—पा. २ पु।

मिति चेत् का नीलाकारता प्रकाशस्य । नीलत्वसामान्ययोगः बाह्यनीलगोचरत्वं वा अनीलव्यावृत्तता वा । नाद्यौ । तयोः प्रकाशभेदेन प्रकाशमानत्वानुपपत्तेः । अनीलव्यावृत्तता तु प्रकाशस्यानीलव्यावृत्तिसम्बन्धो वा प्रकाशरूपत्वं वा । नाद्यः । व्यावृत्तेरलीकत्वात् प्रकाशाद् भेदेन प्रकाशमानताविरोधाच्च । न द्वितीयः । सर्वप्रकाशानां नीलाकारताप्रसङ्गात् । (प्रकाशविशेषरूपत्वमिति चेत् विशेषरूपत्वमप्यसाधारणरूपतामात्रम् असाधारणैकरूपत्वं वा । नाद्यः । सर्वप्रकाशानां नीलाकारताप्रसङ्गात् । न द्वितीयः । द्वितीयज्ञानस्यानीलाकारताप्रसङ्गात्)[1] । नियता एव प्रकाशभेदा येषां नीलाकारत्वमिति चेत् भेदपक्षे ऽपि यदीयं ग्राहकता[2] स्यात् को विरोधः । नीलरूपेणासम्बन्धे तस्य प्रकाश इति प्रतीतिः कथ मिति चेत् स्वेन रूपेणासम्बद्धस्य स्वप्रतीतिः कथमिति तुल्यम् । स्वस्य प्रकाश इति नानुभवोऽपि तु व्यपदेशमात्रमिति चेत् तुल्यं नीलप्रकाश इत्यपि व्यपदेश एव । व्यपदेशे किं निमित्तमिति चेत् तुल्यं स्वप्रकाशव्यपदेशे ऽपि । काल्पनिकोऽयं व्यपदेश इति चेत् अस्माकमप्यौपचारिक इत्यवेहि । ज्ञानस्वरूपं चेत् नीलविषयत्वं सर्वं प्रति साधारणं स्यात्[3] अभिन्नत्वमपि ज्ञानस्वरूपमेव तदपि साधारण्येन व्यवह्रियेत । किं च साधारण्यं सर्वसम्बन्धित्वं वा सर्वैरेकरूपतया प्रतीयमानत्वं वा सर्वग्राहकता वा । नाद्यः । नीले ऽभावात् । न द्वितीयः । ग्रहीतृपुरुषसाकल्ये ज्ञानस्यापि एकरूपेण वेद्यमानत्वात् ग्रहीतृतदितरसाकल्ये च नीलस्यापि तत्त्वासिद्धेः । न तृतीयः । नीलस्यापि सर्वग्राहकत्वासिद्धेः । न च ग्राह्यग्राहकयोरविशेषापत्तिः ज्ञानत्वेनैव विशेषात् । तस्मात् प्रतिबन्धासिद्धमेव प्रकाशमानत्वम् । किं च साध्यसाधनयोर्व्यतिरेकः प्रती-

(१) ( ) एतच्चिह्नमध्ये नेतरः द्वितीयज्ञानस्यानीलाकारतापत्तेरिति पाठः २ पु. । (२) नीलग्राहकता-पा. २ पु. ।
(३) साधारणत्वात्-पा २ पु ।

तो न वा । न चेत् व्यतिरेकासिद्धिः प्रतीतश्चेदनेकान्तोऽज्ञानस्यापि प्रकाशमानत्वात् । न प्रतीतमज्ञानं किं त्वध्यवसितमिति चेत् कोऽध्यवसायः । तत्र व्यवहार इति चेत् । न । देहजन्यव्यवहारस्य तत्राभावात् । व्यपदेश इति चेत् । न । तत्रापि तस्य ज्ञानाजनकत्वे तदीयत्वाभावात् ज्ञानजनने[1] तु तेनव व्यभिचारात् । मानसस्यापि प्रत्ययस्य तद्विषयत्वे ऽविषयत्वे च विरोधात् नीलादयो हि प्रकाशाद्भिन्ना एवाध्यवसीयन्ते न प्रकाशन्त इति प्रकाशमानत्वं नीलादीनामसिद्धमस्तु अध्यवसायबलेन वा सकलबाह्यसिद्धिरस्तु । सहोपलम्भनियमादभेदोऽस्त्विति चेत् । न । यौगपद्योपलम्भस्य साहित्योपलम्भस्य वा भेदे ऽप्याविरोधात् एकोपलम्भविषयत्वस्य ज्ञानस्य स्वसंवेदनत्वासिद्धावसिद्धेः ॥ स्वप्नः ॥

अविद्यानन्तरं विद्या विचार्यते । सा द्विविधा अध्यक्षमनुमानं च । अध्यक्षमपि द्वेधा सर्वज्ञीयमन्यथा च । सर्वज्ञासिद्धौ तत् कथं तथाहि न सर्वज्ञोऽध्यक्षगम्यः परबुद्धेस्तदभावात् । नापि परमाणूनां मेयत्वेनाध्यक्षतया साध्यः तेषामध्यक्षत्वव्याकोपात् । न च बुद्धिवत् स्वतोऽतीन्द्रियत्वे ऽप्यध्यक्षत्वाविरोधः असति विपरीततर्के प्रत्यक्षत्वाणुत्वयोः स्वारसिकविरोधात् विपरीततर्कसत्त्वाच्च चक्षुरादीनां शक्तिविरहाद्रसवत्तत्राप्रवृत्तेः मनसो बहिरस्वातन्त्र्यात् स्वप्ने सिद्धा सहकारितावद्योगजधर्मसहकारित्वे नयनाद्यारम्भवैयर्थ्यात् स्वप्नस्य च स्मृतिविपर्यासत्वात् नानापुरुषाध्यक्षत्वे असर्वज्ञत्वात् अन्यथा प्रतिबन्धाभावात् । वेदनतारतम्यस्य क्वचिद्बहुज्ञ एव विश्रान्तेः अपकर्षतारतम्यादेकमात्रज्ञतापत्तेश्च । मनुष्यादिवत् करितुरगादिजातिभेदे ऽपि सार्वज्ञ्यापत्तेः भावनाभ्यासस्य च भाव्यविषयत्वेन सर्वविषयज्ञानजनकत्वानुपपत्तेश्च तथैव शक्तेरवसायात् । कर्तुः कर्तव्यतातिशयदर्शनाददेहिवद्देहिनोऽपि सर्वकर्तृतापत्तेः । कायव्यूहादिकृतेरप्रामाणिकत्वात् तथाविधादृष्टवशाद्बोपपत्तेः अभुक्तस्यैव वा कर्मणः क्षयात् । विपरीतनिश्चयाच्च

(१) ज्ञानजनकत्वे—पा. २ पु. ।

ज्ञानजातीयं कतिपयविषयतानियतं (१) तेन समं निरुपाधित्वात् यदेवं तदेवं यथा धूमो वह्निना विपक्षे तूक्ता एव तर्काः। तथा च सर्वमिदमनुपपन्नमिति चेत्। मैवम्। विरोधितर्काणां विपर्ययापर्यवसानात्। अणूना(२ मप्रत्यक्षत्वे प्रत्यक्षत्वप्रमेयत्वयोर्निरुपाधिसाहचर्यव्याकोपात् न चात्र रूपवत्त्वं महत्त्वं वा उपाधिः रूपादेरपि प्रत्यक्षत्वात् रूपे रूपत्वं द्रव्येषु च महत्त्वमिति चेत्। न। सुखादेरात्मनश्च प्रत्यक्षतोपलम्भात्। योग्यविशेषगुणवत्त्वमिति चेत्। न। गुणादावभावात्। तत्तद्रूपमाश्रित्य योग्यत्वं येषामध्यक्षतायामन्वयव्यतिरेकावुपलभ्येते इति चेत्। न। तेषां प्रत्यक्षताविशेषव्यापकत्वेन प्रत्यक्षत्वमात्रे ऽनुपाधित्वात्। प्रत्यक्षसामग्रीमध्यपातित्वप्रयुक्तं प्रत्यक्षत्वमिति चेत्। न। अस्य साध्याव्यावृत्तत्वेन धूमे आर्द्रेन्धनवदनुपाधित्वात्। प्रत्यक्षतायां दृष्टान्वयव्यतिरेकित्वप्रयुक्तं प्रत्यक्षत्वमणूनां तु नियमेनास्मदादीनां परोक्षत्वमिति चेत्। न। परबुद्ध्यादेरतथाभावे ऽपि प्रत्यक्षत्वात्। परप्रत्यक्षं प्रति परस्यान्वयव्यतिरेकाविति चेत् तुल्यं योगिप्रत्यक्षत्वे ऽपि। बुद्धित्वात्तत्रानुमानमिति चेत्। न। अणुष्वपि पृथिवीत्वादेः सत्त्वात् एकपुरुषापरोक्षबोधविषयत्वं च कल्पनालाघवात् प्रतिबन्धस्य चानुपाधित्वेन निश्चयात्। रसचाक्षुषतायां रूपैकनियतेन्द्रियवेद्यत्वे व्याघातात् अनियतवेद्यत्वे वेदकस्य मनस्त्वेन सापेक्षत्वनिरपेक्षत्वाभ्यां सिद्धसाधनव्याघातात् तैजसेन्द्रियवेद्यत्वे रूपैकनियमात् तैजसत्वावगतौ व्याघातात्। देहव्यूहमाश्रित्य सर्पादावनापत्तेः परेच्छा च स्वतोऽप्रत्यक्षेति परस्यापि प्रत्यक्षा न स्यात् भावे वा परमानसतावत् परचाक्षुषतापि स्यात्। अप्रत्यक्षा अणव इत्यत्र त्वस्मदादियोगिविशेषापेक्षया सिद्धसाधनव्याघातात्। प्राणित्वादेः कीर्तित प्रतिदृष्टान्तहतत्वात्। द्वे ब्रह्मणी वेदितव्ये पश्यत्यचक्षुरित्यागमसम्भवाच्चेति निराकुलमेतत्॥ योगी॥

लौकिकसविकल्पकमन्यच्च शब्दादिसंयोजनारहितमविकल्प-

(१) निष्ठम्-पा. १ पु.। (२) परमाणूनामिति प्रकाशसंमत: पाठः।

कम्। वाच्यवाचकतादात्म्यात्तदसिद्धं तथाहि घटोऽयमित्याद्यक्षराकारतादात्म्यमनुभूयते। न च घटत्वजात्यनुभवानन्तरं स्मर्यमाणघटशब्दावच्छिन्नघटत्वजातियोगमात्रमत्र भासते न तु तादात्म्यमिति वाच्यम्। घटोऽयमितिप्रत्ययस्यैकत्वेनानुभूयमानत्वात् प्रत्यभिज्ञानवत् अन्यथा तस्यापि स्मरणग्रहणात्मकत्वेनैकत्वाभावप्रसङ्गात्। न चेह स्मृतिचिह्नभूतस्तत्ताकारः प्रकाशते। न चाचाक्षुषवाचकाकारोपधानं जातेर्व्यक्तेर्वा चाक्षुषे चेतसि प्रकाशते। न च शब्दार्थयोर्भिन्नेन्द्रियवेद्यत्वं व्युत्पत्त्याद्यपेक्षा च न स्यादिति वाच्यम्। अर्थात्मभूतानात्मभूतयोर्वाच्यवाचकाकारयोर्भेदे ऽपि सुसदृशत्वेन प्रकारभेद इवाभेदाभिमानात्। मैवम्। अननुभवात् न ह्ययं पुरोवर्ती घटशब्द इति कश्चिदनुभवति न चाभिलापरूपं नयनस्य गोचरः न च स्मृतेस्तत्ता चिह्नभूता अनुभूतवर्णस्मृतौ (१) हरिहरादिस्मृतौ च व्यभिचारात् न च शब्दसंसर्गः प्रत्यक्षगोचरः ततो जातिसंसर्गमात्रमत्रावभासते शब्दस्तु व्युत्पत्तिसमयावगतोऽनुस्मर्यते न च तस्य केनचित् संसर्गोऽवभासते। यदि तु तत्संसर्गोऽवभासत इति मन्यसे तदाऽनुमानाद्व्यक्तिरियं घटशब्दवाच्या घटजातीयत्वात् पूर्वघटवत् जातिरियं घटशब्दवाच्या तेन सह गृहीतसङ्गतित्वादिति वाच्यम्। एकस्यच तरुविटपि(२)भूरुहादिनानाकारतादात्म्यप्रतीतिविरोधात्॥ निर्विकल्पकम्॥

सविकल्पकं योजितनिर्भासितत्त्वाध्यक्षं साक्षात्कारित्वेनानुभावात्। न चैतदौपाधिकमनुभवस्य तदानीमतीतत्वात्। न चैतद् भेदाग्रहनिबन्धनमनागतोपाधिभेदाग्रहादनुभवे ऽपि वैपरीत्यापत्तेः। अत्राभिलापसम्भेदो बाधक इति चेत्। न। तत्रापि तद्विरहस्य तुल्यत्वात्। तत् सन्दिग्धव्यतिरेकमिति चेत् तुल्यं तादृशं यदि नेन्द्रियजं तदेन्द्रियजमेव न स्यात् तस्यार्थाधिपत्त्यनियमात्तज्जन्यत्वं तच्च सिद्धमित्यध्यक्षं सविकल्पकं तत्रापि प्रत्यभिज्ञानात्मकं तत्तेदन्तावभासि। न चात्र तत्तेदन्ते पारोक्ष्यापारोक्ष्ये येन

(१) वस्तुस्मृतौ-पा. १ पु.। (२) तरुशिखरि-पा. २ पु.।

विरोधिधर्मसंसर्गाद् भेदः स्यात् परोक्षापरोक्षार्थत्वे ऽपि सोऽग्निमानयमग्निमानिति स्फुरणात् । नापि विषयभेद एकस्यैवानुमानस्य परनये[1] परोक्षापरोक्षविषयत्वात् नापि कारणभेदः तस्यैवानुभवस्य स्मृतिजन्यत्वात् न च विरुद्धधर्मसंसर्गविगतोऽपि भेद इति ॥ समाप्तमध्यक्षम् ॥

अनुमानमुच्यते । तदसिद्धमध्यक्षस्यैवानुमानत्वात् । तथाहि तत् प्रतिबन्धसिद्धिसापेक्षं स च न सामान्ययोः यत्र धूमत्वं यत् धूमत्वमिति वा नियमायोगात् व्यक्त्यन्तर्भावेन नियतत्वे कतिपयान्तर्भावे न सर्वोपसंहारवती व्याप्तिः समग्रान्तर्भावस्य तु देशकालव्यवधेर्भूयोदर्शनानां तत्राभावे ऽशक्यत्वात् । अत एव न व्यक्तीनां न चोभयोरिति । तस्मादनाकलितव्यभिचारदहनसहचरितधूमादिसंवेदनवशेन कृशानुमात्रमवधार्यते[2] तेन स्मर्यमाणेन असंसर्गाग्रहात् संसर्गव्यवहारे संवादविसंवादाभ्यामनुमानतदाभासव्यवस्थेत्यस्तु । मैवम् । न ह्ययमर्थः प्रत्यक्षगोचरः तदभावात् अनुमानप्रामाण्यस्वीकारे तेनैव व्याघातः । नापि सांशयिकः अनुमानेन साधनदूषणव्यवस्थानुपपत्तेः । एवमेवास्त्विति चेत् । न । अनिश्चितप्रतिबन्धत्वान्नेदमनुमानं तथाभूतं च व्याप्तिनिश्चयहेतोरभावादिति स्वयमेवानुमानदूषणोपसंहारात् वादिप्रतिवादिसाधनयोश्च प्रत्यक्षेण संवादानुपलब्धेः अनुमानस्य प्रमाणान्तरसंवादं विना प्रामाण्यव्यवहारगोचरत्वानङ्गीकारात् संसर्गज्ञानस्यैव संसर्गव्यवहारहेतुत्वात् । न च प्रतिबन्धावेदनं व्यक्तिमात्रसहितजातिनिर्भासात् मात्रार्थस्यापि पुरस्कृतजातिद्वयातिरिक्तव्यक्तिविशेषानुपादान[3]रूपत्वात् । तादृशस्य कतिपयविषयभूयोदर्शनजसंस्कारसचिवबाह्येन्द्रियवेद्यत्वात् तथैव शक्तेरवसायात् अन्यथोपादानादिव्यवहारविलयात् । न हि दृष्टमुपादेयमुपात्तत्वात् । नाप्यनागतमनवगतत्वात् । न च तदेवानुमितमनवगतनियम-

(१) परनये इति नास्ति २ पु. । (२) अवस्मर्यते-पा. २ पु. ।

(३) विशेषतोऽनुपादान-पा. २ पु. ।

त्वात् । न च जातिरनुमेया तस्या अनुपादेयत्वेनानुमानविरोधात् । न च जातिः कारणसम्बन्धानुपपत्तेर्व्यक्तिमाक्षिपति हेतौ सत्यनन्तरभावस्य हेत्वभावे अभावस्य जातावनुपलब्धेः । अस्तु जातिमती व्यक्तिरिति चेत् । न । उपादेयव्यक्तेरनवगमात् ततो जातिमत्तयाऽशेषव्यक्तिनिर्भासस्तावत् सिद्धः अन्यथा चेतनमात्रप्रवृत्तिविलयापत्तेः । अत्र च कतिपयव्यक्तिगोचरसंस्कारसहकृतस्य चक्षुष एव सामर्थ्यं अनन्यथासिद्धान्वयव्यतिरेकबलात् दोषसहकारिवशात् असन्निहितपदार्थसार्थप्रतिभास इव विपर्ययप्रतिपत्तिषु जातेश्च कार्यत्वेन साहचर्यविरोधात् ॥ अनुमानम् ॥

का पुनर्व्याप्तिः । साधनस्य साध्यसाहित्यं कार्त्स्न्येन न पुनरनुपाधित्वमनैकान्तिकं सोपाधित्वोद्भावनापत्तेः । नापि साध्याभावविरोधः अन्वयिनि प्रतिबन्धासिद्धिप्राप्तेः । किं पुनरस्या लक्षणमनुपाधित्वं किं पुनरुपाधित्वं साध्यकृत्स्नसहचारिणः साधनैकदेशवृत्तित्वम् । अत एव च न कृतकत्वे साधने सावयवत्वं वैपरीत्ये वा नोपाधिः । स चायं क्वचिन्निश्चितोभयरूपः यथा प्रमेयत्वे कृतकत्वम् । क्वचिन्निश्चितान्यतररूपो यथा मैत्रतनये शाकाहारपरिणतिः । क्वचिन्निश्चितचरमरूपः यथा पार्थिवत्वे प्रशिथिलसंयोगित्वम् । अनिश्चितोभयरूपोऽनिरूपितरूपश्च । देशकालसाध्येतरवृत्तित्वमनुमानमात्रव्यवहारविच्छेदकत्वान्नोपाधिः । उन्नीयते च बाधव्यभिचारा[1]नुकूलतर्काभावप्रतिकूलतर्कैः यथा दहनेतरत्वं कृतकत्वे प्रमेयत्वे कृतकत्वं मैत्रतनयत्वे शाकाद्याहारपरिणतिः उपलभ्यमानस्पर्शत्वे चाक्षुषत्वमिति ॥ व्याप्तिः ॥

अथ कस्तर्कः एकधर्माभ्युपगमे द्वितीयस्य नियतप्राप्तिरूपः । ननु किमेतस्य फलं विपक्षजिज्ञासानिवृत्तिः शङ्कानिवृत्तिर्वातन्न्यूनता वा । नाद्यः । अनुमानादेव तत्सिद्धेः । न द्वितीयः । अनुमानवैयर्थ्यात् । निर्णयत्वं तदिति चेत् । न । तत एव शङ्कानिवृत्तेरपि सिद्धेः । न तृतीयः । न्यूनाया अन्यूनाया वा अनुमाननिवर्तनीय-

(१) बाधव्यवहारव्यभिचार-पा. १ पु.

त्वेन तन्न्यूनतापादनवैयर्थ्यात्। अनुमानकरणत्वेन व्यापारतया तर्कमपेक्षत इति चेत्। न। दात्रादौ दृढमुष्टिनिष्पीडनादिव्यापारव्यतिरेके छिदानुपपत्तिवत्तर्कज्ञानं विना लिङ्गादनुमितिव्यतिरेकादर्शनात् स्वज्ञानं वा लिङ्गस्यावान्तरव्यापारः स्यात् तदनुपकारकं नेदमनुमानाङ्गम्। अत्रोच्यते। अनुमानानुकूलप्रतिबन्धनिश्चयोत्पत्तौ व्यभिचारशङ्कानिवृत्तिद्वारेणास्योपयोगात् । स चायमाहार्यारोपरूपः आरोपितहेतुसमुत्थत्वात् बाधितविषयत्वाच्च कोटिद्वयोपनिपाते चैककोटिपरिग्रहस्य यद्यर्थत्वात् । तथापि किं भूयोदर्शनापेक्षया व्यभिचारसन्देहस्य तत्रापि सत्त्वात् विपक्षबाधकस्यैतदभावे ऽपि तुल्यत्वात् उपाध्यभावस्य चानुकूलतर्कवेद्यत्वादिति चेत्। मैवम्। प्रथमतो नियतसंवेदनाभावात् अन्यथोत्तरत्र नियतसन्देहा(१)नुपपत्तेः ब्राह्मणत्वकठत्वादिसादृश्यानां च तथा सत्यवभासे उत्तरकालं प्रचुरतरदर्शनस्य विपरीतशङ्कामात्रविच्छेदफलतापत्तेः। भूयःसाहित्ये तु नियतसंवेदनव्यवस्थितौ तत्प्रामाण्य एव सन्देहात् तर्कस्य तदपनोदकत्वात्। तदेतद्व्याप्तिस्मृतिपक्षधर्मतासंवेदनात्मकमन्यानानुभवात् कार्यस्यास्मादेवोपपत्तेः न च लिङ्गं संवेदनं वस्तुतस्तद्विषये विदूरात्तदनवभासे(२) अजनकं लिङ्गत्वोल्लेखितया जनकमेकवेदनमेव पर्यवस्यतीति वाच्यम्। नियतसंवेदनपुरस्कृतजात्युल्लेखादेवोपपत्तेः अन्यथा परामर्शे ऽप्युपप्लवात् न च पक्षधर्मतासंवेदनं हेतोरेव जातमित्युपनयस्य विशिष्टविषयतेति(३) वाच्यम्। तस्य पराङ्गतापन्नलिङ्गमात्रविषयत्वादिति केचित्। तन्न। यथा व्यभिचाराग्रहे ऽपि व्यभिचारशङ्कायां नानुमानं तथा व्याप्तिपक्षधर्मतयोर्वैजात्याग्रहे वैजात्यशङ्कायां नानुमानं हेतोर्व्याप्यत्वासिद्धत्वात्। तस्माद्व्याप्यपक्षधर्मयोरेकजातीयत्वंवेदनमनुमितिकारणं वाच्यं स एव परामर्श इति ॥

अनुमानम् ॥

(१) उत्तरत्र सन्देहा-पा. २ पु. । (२) तद्विशेषानवभासे-पा. २ पु. ।
(३) पिण्डितविषयतेति-पा. २ पु. ।

शब्दस्तु न मानान्तरं पदानि स्मारितार्थसंसर्गविज्ञप्तिपूर्वकाणि योग्यतासत्तिमत्त्वे सति(१) संसृष्टार्थपरत्वात् गामभ्याजेतिपदकदम्बवदित्यनुमानादेव साध्यसिद्धेः न च निराकाङ्क्षेण व्यभिचारः तत्र संसृष्टार्थपरत्वस्यैवाभावात् तात्पर्यं च ज्ञानमत्रार्थप्रतीतिकारणं श्वेता धावतीत्यादौ लक्षणायां च तथा दर्शनात् संसृष्टार्थपरत्वं चानन्यथासिद्धसम्भूयोच्चारणबलादेवावधार्यत इति । शब्दभङ्गः(२) ॥

उपमानं च न मानान्तरम् अनुमानादेव तदर्थसिद्धेः यो यत्रासति वृत्त्यन्तरे वृद्धैः प्रयुज्यते स तस्य वाचको यथा गोशब्दो गोजातीयस्य प्रयुज्यते चायमसति वृत्त्यन्तरे प्रतिभासमानजातीय इति न चायमसिद्धः मुख्यार्थान्वयानुपपत्तिं विना उपचारस्यासम्भवात् सादृश्यवति प्रयोगस्य कल्पनागौरवापत्तिहतत्वात्(३) व्यक्तिषु प्रयोगस्यानन्त्यदूषितत्वात्(४) नूनमयमेतज्जातीयाभिधानाय प्रयुज्यत इति निश्चयोपपत्तेः । न चैवमुपमानेऽपि वृत्त्यन्तरनिमित्तान्तरविषयविशिष्टप्रयोगसम्भावनायामपेक्षितासिद्धिप्रसङ्गात् तथा च तत्त्वकौमुद्यामाचार्य एवमेवोपमानं प्रतिचिक्षेप । किरणावलीकारास्तु कल्पनालाघवात् सादृश्यविशिष्टव्यक्तिवाच्यताप्रतिपादकत्वे ऽतिदेशवाक्यस्य प्रतिक्षिप्ते उपलक्षणीये न गवयशब्दवाच्यतान्वयो गोसदृशो गवयशब्दवाच्य इत्यतो भासते गङ्गायां घोष इतिवत् । न च वाच्यं लक्षणस्वरूपान्वयेनैव पर्यवसानमत्र तत्र तु श्रुतान्वयानुपपत्तेरुपलक्षणीयव्यवस्थितिरिति ॥

यतो द्विविधं सामानाधिकरण्यं शाब्दमार्थं च तत्राद्यस्य न काचिदनुपपत्तिः माता बन्ध्येतिदर्शनात् द्वितीये तु न क्रियाकारकान्वयमात्रस्य गङ्गायां घोष इत्यत्रापि सप्तमीप्रथमाभ्यामाधाराधे-

(१) योग्यतासन्निधिमत्त्वे सति——पा॰ २ पु॰ ।
(२) शब्दान्तर्भावः——पा॰ २ पु॰ ।
(३) गौरवप्रतिहतत्वात्——पा॰ २ पु॰ ।
(४) अनन्त्यदूषितत्वात्——पा॰ २ पु॰ ।

यभावस्य भासमानत्वात्(१) वास्तवं तु नास्त्येव न हि गोसदृशो गवयशब्दवाच्य इत्युपपद्यते सादृश्यानिमित्ततायास्त्वयैवोक्तत्वात् उपलक्षणीयमादाय तूपपत्तिगङ्गायां घोष इति वदत्रापि तुल्येति नोपमानं मानान्तरमित्याहुः । प्रलपितमेतद्विचारासहत्वात् । तथा हि केन गवयपदवाच्यतासामानाधिकरण्यमनुपपन्नं किं गोसादृश्येन उत तदीयगवयशब्दप्रवृत्तिनिमित्ततया तथापि किमतिदेशवाक्यव्यक्तया उत्तरकालीनविमर्षसम्भावितया वा । नाद्यः केसरी वृक्षशब्दवाच्य इतिवदुपपत्तेः । नेतरः निमित्ततोपलक्षणीयतौदासीन्येन वस्तुताऽन्यतररूपिणोऽप्यस्य शाब्दत्वात् नान्त्यः उदासीनस्वभावस्य शब्दावेदितत्वेन विरम्य व्यापारापत्तेः तत्रापि गङ्गार्थमात्रे घोष इति पर्यवसानं स्यादिति चेत् न तेन जलमयस्यैव गङ्गाशब्दवाच्यतोपलम्भात् तत्र चानुपपत्तेः अर्थान्तरशङ्कापि स्यादिति चेत् न एवं सति स्थितेऽप्युपचारमात्रविलयात् न त्वेवं सादृश्ये निमित्तत्वेनानुपलब्धेः कस्यचिद्भ्रान्त्यैवमपि स्यादिति चेत् न तं प्रति मानव्यवहाराभावात् शाब्दन्तूपमानमनुमानमेव स गौरनेन सदृशः स्वसादृश्येनैव तदवच्छेदकत्वात् यदेवं तदेवं यथा भ्राता भगिनीति । उपमानभङ्गः ॥

नापि चार्थापत्तिः पृथगुच्यते(२) उपलभ्यते यद्धि यदभावेन नियतामुपपत्तिः तत्तद्व्यतिरेकनियमवदेवेति चेत् क्वचिदुपलब्धमुपपादकं कल्पयति न वा न चेदतिप्रसक्तिः उपलब्धं चेन्नियतन्नियतपक्षधर्मतावद्व्यतिरेक्येव अनुपपद्यमानस्योपपादकासत्त्वे विरोधो गमक इति नानुमानमिति चेत् न अनुपलब्धेरनुपलभ्यमानसत्त्वविरोधोऽर्थापत्तिरस्त्वित्यभावविलयापत्तेरिति प्रसिद्धं चैतदित्यलमनेन । इत्यर्थापत्तिभङ्गः ॥

प्रचुरसाहचर्यसंवेदनात् बुद्धिरबाधिता सम्भवः यथा सम्भवति

(१) अप्रत्यक्षप्रथमाक्षयोराधाराधेयप्रतिभासनात्—पा० २ पु० ।
(२) प्रत्युच्यते—पा० २ पु० ।

घटे जलमिति तत्राध्यक्षवत् क्वचित् व्यभिचारेऽपि मानान्तरमिति चेत् न अस्यान्यूनकोटिकोटिशङ्कात्मकत्वात्(१) व्यभिचारिणोऽव्यभिचारिसंवेदनानुपपत्तेः । इति सम्भवः ॥

सन्दिग्धाप्तोक्तत्वप्रवादपारम्पर्यमैतिह्यमिति कथमन्यथा चेदस्य प्रामाण्यमिति चेत् न तत्प्रवादपारम्पर्यस्यादरपरिग्रहादेवाप्तोक्तत्वानुमानात् । ऐतिह्यभङ्गः ॥

अभावो मानान्तरं नह्यनुपलम्भानपेक्षं नयनमभावग्राहि इदं रजतमिति विभ्रमाभावापत्तेः । न च तदकरणं तल्लक्षणानां व्यापारवत्कारकान्तरप्रभावत्वादीनामव्याहतेः न च नयनमपि करणं कृत्वोभयनिषेधादिति नयनं भूतल एवान्यथासिद्धमिति चेत् न दोषवशात्तद्गतव्यावर्तकधर्मानुपलम्भाद्भावस्यानुपलम्भे ऽनुपलब्धेरकारणत्वात् अभावानुपलम्भेनैव भावग्रहापत्तेश्च तथा सतीन्द्रियमनवकाशमिति चेत् न भावभेदमादायैव सावकाशत्वात् तुल्यन्यायेनैव विवक्तो न शक्यत इति चेत् न अस्याभावेऽपि तुल्यत्वात् विस्तृतं च यं शास्त्र इत्यलमनेन अभाव एव मूलतोऽसम्भवी कुतो मानभेदचिन्ता नास्तीति धीरस्तीति(२) चेत् न अस्या आश्रयस्वरूपभेदालम्बनत्वात् तथा हि अस्ति तावद्घटाभावोदासीनमाश्रयरूपं कीदृश्यन्यथाभावः समवैति न तावत्तद्वृत्ति आत्माश्रयात् नापि तज्जातीयवति अनवस्थितेः नापि तद्भिन्ने भावाभावयोरविरोधापत्तेः भावाभावयोश्च नास्तीति व्यवहारदर्शनात् घटाभावेऽपि यदि घटोऽस्ति उपलभ्येत नास्ति चेदभावान्तरं न चेत् सिद्धं समीहितं नः घटे च तद्घटतादात्म्याभावो नास्तीति यदि घटविधिस्तदानवस्था अथाश्रयस्वरूपमुक्तमुत्तरम् । एवं घटाभावपटाभावयोः प्रागभावप्रध्वंसयोर्वा नैक्यं नान्योन्यसंसर्गिता वेति(३) विकल्प्य दूषणमभिधानीयमिति चेत् मैवम् विचारासहत्वात् किमिदं परिपन्थित-

(१) संशयात्मकत्वात्—पा० २ पु० ।
(२) धीरिति चेत्—पा० २ पु० । (३) सम्बन्धिनावेति—पा० २ पु० ।

कमात्रं यदि भूतलौदासीन्यं न स्यात् तदाऽभावो न सम्बध्येतेति
विपर्ययपर्यवसानादाश्रयभेदसाधकं वा नाद्यः अपादानमात्रस्योपल-
म्भानङ्गत्वात् नेतरः सम्बध्यते चाभाव इत्यात्मनो विपर्ययस्य
स्वतोऽप्यसिद्धेः परसिद्धेन परस्यापादनमिदमाभासं सर्वथानुपल-
भ्यमानोपाधिकं शङ्काग्रस्तत्वादितिवदात्मप्रतिक्षेपकम् अत एव स-
म्बन्धप्रश्नोऽसङ्गतः अतिरेकिणस्तस्यासिद्धेः । जन्मप्रश्नेऽपि प्राग-
सत्त्वोपलक्षितं रूपं कीदृश्यभाववति यद्येव तादृप्यं तदेव तत् तेना-
भाववत् अथ प्राक्कालमाश्रित्य प्रश्नस्तदाभाववति विरोधः अथा-
न्तरालकालमाश्रित्य प्रश्नः तदा विरोधः इदं च सकलयोत्पत्तिप्र-
तिक्षेपकं सत्कार्यवादमनुपततीति महदिन्द्रजालम् । घटाभाव एव
घटनास्तिता अतिरेकेऽनवस्थितेः न त्वेवं प्रकृतेऽपि भूतलस्वरूपस्या-
तिप्रसङ्गिकत्वात् ततः सम्बन्धवदिदमवश्यमङ्गीकर्तव्यम् । घटाभा-
वे पटो नास्तीत्यत्र का वार्त्ता प्राक्कृतेव तर्हि सापि घटनास्तिता
इति सर्वप्रतिपक्षविरहे जगच्छून्यं स्यादित्यसमत्पथमनुसरति चेत्
मैवम् स्वरूपेण तन्निषेधव्यवहारविषयत्वेऽपि कश्चित्तद्विरोधिस्वभावो
मध्यस्थश्चेति सम्भवात् वस्तुवैचित्र्यस्यापर्यनुयोज्यत्वादिति । सघ-
टभूतलजातीयभूतलात् पृथग्भूतलमिति चेत् न भूतलत्वेन पृथक्-
त्वानुपपत्तेः साधारणधर्मस्याभेदकत्वात् नहि तरुत्वेन तालस्त-
मालाद् व्यावर्तते नापि सघटत्वेन विरोधात् अघटत्वस्वीकारे
ऽभावस्वीकारात् असति बाधके व्यावृत्तेरसाधारणधर्मजत्वात् स-
घटभूतलबुद्धेरन्या भूतलबुद्धिरभावव्यवहृतिहेतुरिति चेत् न अभा-
वानङ्गीकारे तस्य सघटबुद्धिव्यावृत्तव्यवहारस्य कर्तुमशक्यत्वात्
स्वरूपभेदव्यवहारस्य सघटभूतलबुद्धावपि सत्त्वात् असति सघट-
भूतलबुद्धित्वे स्वरूपभेदव्यवहार इति चेत् न अभावस्वीकारात्
असति व्यावर्तकधर्मे व्यावृत्तिव्यवहारानुपपत्तेः सर्वत्र व्यावृत्तिव्य-
वहारस्य तत्प्रतिबन्धोपलब्धेः अत इयं किं भूतलबुद्धित्वेन व्याव
र्तते अथ घटाविषयत्वेन नाद्यः तस्यामपि भूतलबुद्धित्वाबाधात् न

द्वितीयः अभावस्वीकारात् सघटभूतलबुद्धिमात्रापेक्षया रूपभेद इति
चेत् न साधारणधर्मविभागे तन्मात्रापेक्षया स्वरूपभेदव्यवहारस्यैवा-
पहारात् नहि गोर्गोस्वरूपमात्राद् व्यावर्तते गोत्वेन ततो भवन्नयं
भिन्नव्यवहारोऽसाधारणघटाद्यविषयत्वप्रतीतिनिबन्धनः । अपि च
भूतलव्यवहाराद्विलक्षणो नास्तीतिव्यवहारः भूतलव्यवहारव्यति-
रिक्तव्यवहर्तव्यप्रकाशननिबन्धनः कलशव्यवहारवत् न च सघटभू-
तलविलक्षणं भूतलविलक्षणं वा प्रमेयं नावभासते अन्यथैकस्यैव
सामान्यस्य व्यञ्जकभेदेन वस्तुस्वरूपस्यैव वाऽभिन्नस्य चित्राका-
रजगद्व्यवहारस्य गोचरत्वमनिवार्यमिति घटे च घटाभावसं-
सर्गनिषेधो घट एव न तु प्रकृते ऽतिप्रसक्तेः प्रागभावप्रध्वंसयो-
रन्योन्यसंसर्गितानिषेध स्वरूपमेवाभावः सम्बन्धिसम्बन्धयोरिव
संसर्गिताविधौ निर्यामकं तत्र तु अन्योन्याभावावसर एव वक्ष्या-
मः । परस्पराभावरूपतापत्तिस्त्वविरोधिस्वभावत्वेन व्युदस्तेति-
सिद्धस्तावदभावः ॥

किं पुनर्नञोऽभिधेयमिति विचार्यते । न तावत् सामान्यं तस्य
परसामान्यनियतत्वात् नापि भावविरोधित्वम् अन्योन्याभावे तद-
भावात् तदर्थानिरुक्तेश्च सहानवस्थानं तदिति चेत् न अत्रापि
नञर्थाभिधाने ऽनवस्था अन्यथा वैयर्थ्यं नापि भावानात्मकत्वं
निषेध्यनिरूप्यत्वं वा तदर्थानिरुक्तेः नापि भावान्यत्वं स्वरूप-
स्याननुगतः अनुगतस्यासिद्धेः नास्तीतिबुद्धिवेद्यत्वं तदिति चेत्
न तदालम्बनस्यानुगतस्याभावात्(१) भावेन स्वभावप्रत्यासन्नत्वं
तदिति चेत् न समवायादावभावत्वप्रसङ्गात् । मैवम् सत्तासम्ब-
न्धबोधसामग्रीविधुरस्य सत्ताविरहस्यैव वाभावप्रत्ययहेतुत्वात् स
च नञर्थनिरुक्तिमन्तरेणापि स्वग्राहकमानसामर्थ्यात् स्वेन रूपेणाव-
भासमानः स्वभावप्रत्यासत्त्या सर्वाभावत्वसम्बद्ध एवाभावप्रत्ययं
करोति समवाय इव समवायिव्यवहारम् । न च स्वात्मन्यभा-

(१) व्यभिचारात्—पा॰२ पु॰ ।

व्यवहारकर्तृत्वविरोधः प्रमेयत्ववदविरोधात् । भावबुद्ध्यविषयत्वं
वा अभावत्वम् ।

भिन्नरूपेष्वभावेषु स्वेन रूपेण कश्चन ।
असम्बद्धोऽप्यभावात्मा तुल्यबोधप्रबोधकः ॥
प्रमेयत्वं यथान्यत्र स्वरूपे च तथाविधम् ।
व्यवहारं तनोत्येष विरोधं भजते न च ॥
भावत्वबुद्धिरेकैव विषयाभावयन्त्रिता ।
नास्तीत्यनुगताकारव्यवहारप्रवर्त्तिनी ॥

एवं सत्यभावप्रतिव्यर्थेति चेत् न तस्य सामान्यविशेषवि-
षयसाकाङ्क्षत्वे सामान्यव्यवस्थाया एवापेक्षणात् । स पुनश्चतुर्धा
प्राक्प्रध्वंसात्यन्तान्योन्याभावात्मानः । उत्तरकालावधिरभावः प्राग-
भावः । प्रागेकावधिरभावो ध्वंसः । प्रागभावनिवृत्तिनिवृत्तौ तदु-
न्मज्जनापत्तिरिति चेत् न ध्वंसस्यापि तद्विरोधित्वात् । एवं सति
भावाभावनिवृत्त्या तदुभयात्मकतापत्तिरिति चेत् न विधिमुखवेद्य-
त्वावेद्यत्वयोस्तल्लक्षणत्वात् तन्निषेधनिषेधविधावपि प्रागभाववि-
धाने ऽन्योन्याभावात्मकत्वं भावाभावयोर्भवत्येव एकतरनिषेधेऽप्यप-
रावस्थानाविधानादिति चेत् न एकप्रतियोगिनोऽप्यन्यतरनिषेध-
स्यान्यतरविधाननियमात् उभयविरोधिनि तु घटवत्तदभावात् त-
थापि परस्पराभावात्मकत्वं कुत इति प्रश्नेऽन्यतरनिषेधस्यान्यतर-
विधिनियमाभावेऽपि एकतरविधेरपरनिषेधनियामकत्वादिदमुत्तरम् ।
न हि प्रध्वंसविधौ न प्रागभावनिषेधः तद्विधौ वा न प्रध्वंसनिषेधः
एवं सति ध्वंसोऽपि नश्येत् कृतकत्वात् प्रागभावोऽपि जायेत नावि-
स्यात् उन्मज्जनापत्तेश्चिरमिह निहतत्वात्(१) अन्यथा तु प्रकृतेऽपि न
समाधिरिति चेत् न असम्भद्विरुद्धधर्मसंसर्गप्रत्यभिज्ञानप्रतिक्षिप्त-
त्वादनुमानानां लाघवाच्च पूर्वोत्तरावधिरहितस्तु संसर्गप्रतियोगिको
ऽभावोऽत्यन्ताभावः । न तु गवात्मनाऽश्वाभावोऽप्यत्यन्ताभाव एव

(१) निरस्तत्वात्—पा २ पु० ।

निरवधित्वात् तदपार्थकं संसर्गप्रतियोगिकत्वं यथा एकध्वंसा-
भावाभावनिषेधात्मा न च भिद्यते तथात्रापि न्यायस्य सत्त्वात्
तत् कुतोऽभावचातुर्विध्यमिति चेत् न अन्योन्याभावस्य निषेध्य-
समानदेशकालत्वात् अस्य तु तदभावात् अर्द्धरक्ते समानदेशका-
लत्वं भावाभावयोरिति तस्यापि पञ्चमाभावत्वम् अस्य वा चैत्र-
स्यैस्याप्रयोजकत्वे ऽभावत्रैविध्यमिति चेत् न तत्रावच्छेदभेदस्य
सत्त्वात् अवच्छेदकस्य भावैकनियमन भेदोऽनियमे न पुनः समा-
नदेशत्वम् अवच्छेदान्तरोपादाने त्वनवस्थितिरिति चेत् न युगप-
त्तावद्भावाभावयोरप्रतीतिरेव एकस्य बहुकालपुरुषाभवेन उप-
लम्भानुपलम्भयोरसिद्धेः क्रमेण प्रतीतिरुपाधिभेदसाहित्येनैव
उपाधिभेदसाहित्यमन्तरेण चैकत्र भावाभावौ विरुद्धौ इति सर्वत्र
दृष्टम् अत्र तु तदभावाद् विरुद्धो भविष्यतः । तादात्म्यप्रतियोगिको
न्योन्याभावः तदसिद्धं तत्र मानाभावात् भिन्नबुद्धिरिति चेत् न
तदभावेऽपि घटतदभावयोर्भिन्नबुद्धिदर्शनात् तत्र स्वरूपमालम्बन-
मिति चेत् न भावेऽपि तुल्यत्वात् आरोप्यते तत्र भाव इति चेत्
न अभावस्यारोपितत्वे तत्प्रतियोगिनो भावस्य सत्त्वापत्तेः उभय-
निषेधे च विरोधापत्तिरिति चेत् मैवम् अतिरेकिणो ऽनपस्याप्र-
पितत्वात् नास्तीति बुद्धेरारोपिताभावालम्बनत्वात् आरोपिता-
न्योन्याभावसंसर्गनिषेधव्यवहारस्य घटतदभावाभ्यामेव करणात्
सम्बन्धवत् यथा असम्बद्धरूपमेवासम्बन्धारोपात् सम्बद्धवदवभासते
सम्बन्धान्तरमन्तरेणारोपित स्वरूपमेव नियामकं तथात्रापि विरोध
इति सिद्धं चातुर्विध्यम् । अभावः ॥

तत्र दुःखात्यन्ताभावोऽपवर्गः । ननु चाद्वैततत्त्वसाक्षात्कारा-
दविद्यापनीतप्रपञ्चप्रत्ययबाधे जागराद्यप्रत्ययात् स्वप्नप्रत्ययवदद्वै-
तानन्दसाक्षात्कारो मुक्तिरिति मन्यते । मैवम् मानाभावात् श्रुति-
रत्र मानमिति चेत् न बाधितत्वात् ब्रह्मसंवेदनप्रपञ्चप्रत्ययस्य स-
त्यत्वात् ब्रह्मसंवेदनानन्दानौ नास्तीति चेत् न न हि ब्रह्म वेदना-

न्तरवेद्यं न च ब्रह्मरूपमिदानीं नास्तीति चेत् श्रुतिवाक्यजो विशिष्टब्रह्मानुभवो नानास्तीति चेत् न तस्याप्यनुभवरूपस्य ब्रह्मणानतिरेकात्(१)। ब्रह्मणोऽभिन्नत्वेन कल्पितोऽनुभवो नास्तीति चेत् न कल्पितस्यासत्त्वेन कल्पनात्वेन वा बाधकत्वात् अद्वैतश्रुतेश्च द्वैतावभासिप्रत्यक्षविरोधात् ग्रावप्लवनश्रुतिवदुपचरितार्थत्वात् अक्षक्षमविद्यात्वेन तस्याबाधकमिति चेत् तुल्यं प्लवनेपि किञ्चास्याविद्यात्वम् अद्वैतानुभवविरोधित्वमिति चेत् द्वैतानुभवविरोधित्वेन तस्यैव किं नाविद्यात्वम् अयत्नसिद्धत्वमिति चेत् न यत्नासिद्धस्यापि शाकातुरतनयसाक्षात्कारस्याविद्यात्वात् अयत्नसिद्धस्य च तनयाभावसाक्षात्कारस्य विद्यात्वदर्शनात्। विचारासहत्वमविद्यात्वमिति चेत् न अनुभवेन विरोधिना विचारस्यैव कृशानोरनुष्णानुमानवदाभासीकृतत्वात् ॥

जीवानामविद्यादिसमस्तोपाधिनाशे चिदानन्दब्रह्मरूपापत्तिर्मुक्तिरित्यन्ये। न जीवानां दुःखादिवत् ज्ञानात् सुखाच्च भेदेन प्रतीतेः अन्यथा दुःखरूपत्वस्यापि प्रसङ्गात् दुःखमहमिति नानुभव इति चेत् नाहं सुखमिति तुल्यम् सकलदुःखरहितत्वं सुखत्वमिति चेत् नाशेषसुखरहितत्वं दुःखत्वमित्यपि तुल्यत्वात् वस्तूनां परप्रकाश्यत्वनियमे तज्ज्ञातुः स्वप्रकाशत्वविरोधात् अन्यथा दुःखादेरपि स्वप्रकाशत्वापत्तिः। चिद्रूपोऽहमित्यनुभवो नास्तीति चेत् न ज्ञानाधारस्य चिच्छब्देनाभिधानात्(२) ॥

नित्यसुखाभिव्यक्तिरित्यपरे। तत्र सुखाभिव्यक्तेश्च नित्यत्वेऽसंसारप्रसङ्गात् तयोः सम्बन्ध उत्पद्यत इति चेत् न भावस्योत्पत्तिमतो विनाशित्वेन मुक्तस्यापि सुखासंवेदनप्राप्तेः संसारिसुखस्यापि च तथात्वापत्तेश्च। सुखतज्ज्ञानयोरुत्पन्नयोश्च ध्वंसवदविनाशित्वमिति चेत् न भावस्योत्पत्तिमतो विनाशित्वनियमात् तयोरेव प्रवाहनित्यत्वमिति चेत् न तद्वदेव देहादेरपि प्रवाहनियमस्वी-

(१) ब्रह्मरूपानतिरेकात्—पा० २ पु०। (२) निर्देशात्—पा० २ पु०।

कारप्रसङ्गात् सुखस्य देहिभोग्यत्वमिति नियमात् अन्यथा स्वर्गेऽपि देहविरहापत्तेः न चात्र प्रमाणमस्ति आनन्दं ब्रह्मणो रूपं तच्च मोक्षेऽभिव्यज्यते इति चेत्(१) न योगजधर्माविर्भूतकल्पकोटिशतानुभवनीयासंख्यसुखप्रतिपादनपरत्वेनाप्युपपत्तेः। ननु दुःखाभावोपि मुक्तिर्न युज्यते। स हि न तावद् दुःखप्रागभावः अनादित्वेन तस्यासाध्यत्वात् दुःखस्य चानागतस्योत्पत्तिप्राप्तेः नापि दुःखध्वंसः तस्य स्वतः सिद्धत्वात्। समस्तदुःखध्वंस इति चेत् न उत्पन्नदुःखसाकल्ये स्वतःसिद्धत्वात् उत्पन्नानुत्पन्नसाकल्ये विरोधात्। विद्यमानसकलदुःखहेतुध्वंसो मुक्तिरिति चेत् न दत्तफलानां निवृत्तेरयत्नसिद्धत्वात् अदत्तफलानां त्वनागतानर्थानुत्पत्तिमनभिसन्धाय निवृत्तेरसमीहितत्वात् न हि निदाननिवृत्तिः स्वतःसाध्या(२) क्लेशनाशेतरत्वात् अनागतानुत्पत्तेश्च स्वतः साध्यताविरोधात्। तच्चानर्थजातं मुमुक्षुसमवेतमन्यसमवेतं वा नाद्यः तथा सति दुःखस्यावश्यं तत्रोत्पत्त्यावदत्तफलताविरोधात्। नेतरः परदुःखनिवृत्तेः स्वात्मनि सिद्धत्वात् दुःखान्नियतपूर्वभावित्वस्य तद्धेतुत्वस्य प्रमाणादवगमे दुःखस्य स्वात्मन्यवश्यमुत्पादात् अनुत्पत्तौ दुःखहेतुताग्राहकस्य मानस्याभासतापत्तेः नापि दुःखात्यन्ताभावः तस्येदानीं सत्त्वे सिद्धस्य साध्यताविरोधात् असत्त्वे दुःखात्यन्ताभावस्य स्वतोनिवर्त्यत्वे(३) अत्यन्ताभावत्वव्याकोपात्। अत्यन्ताभावसम्बन्धः साध्यत इति चेत् न उत्पाद्यसम्बन्धनिवृत्तौ मुक्तस्यापि संसारितापत्तेः परात्मवृत्तिदुःखात्यन्ताभावस्य स्वतःसिद्धत्वात् मुमुक्षुसमवेतदुःखात्यन्ताभावस्य च प्राक् प्रध्वंसयोरन्यतरान्तर्भूतत्वात्(४) येषां चात्य-

(१) मोक्षे प्रतिष्ठितमित्यस्तीति चेत्—पा० २ पु०।
(२) स्वभावतः साध्या—पा० २ पु०। (३) निर्वाह्यत्वे—पा० २ पु०।
(४) अन्तर्भावात्—पा० २ पु०।

न्ताभावो दुःखानां तेषामध्यक्षानुमानागमप्रभवस्मृत्यगोचराणामभावनिरूपकतानुपपत्तिश्च । यावदनागतदुःखप्रागभावानुवृत्तिः क्रियत इति चेत् प्रागभावस्वभावो वानुवृत्तिः तस्यानागतकतिपयसमयसम्बन्धो वा यावदनागतसमयसम्बन्धो वा नाद्योऽनादित्वात् न द्वितीयो दुःखस्य पुनरुत्पत्तिप्रसङ्गात् न तृतीयः प्रागभावत्वविरोधात् विनाशिनश्चानन्तकालसम्बन्धित्वविरोधात् अविनाशिनः स्वतःसिद्धत्वादिति ॥

अत्रोच्यते ॥ क्रमेण दुःखोत्पादो हि संसारित्वं यदा तु युगपदशेषक्लेशोपभोगोपायकायव्यूहादिनिर्वर्तकयोगाभ्यासप्रसादसमासादितात्मतत्त्वसाक्षात्कारस्य कारणाभावाद्धीनक्लेशस्य युगपदुपभुक्तसमस्तदुःखनिवृत्तिः तदा सैव मुक्तिरशेषदुःखनिवृत्तिरूपा पुरुषार्थो भविष्यति । दुःखजातीयात्यन्ताभावस्य वा स्वात्मनि साध्यत्वात् अशेषक्लेशहेतुनाशस्य चात्यन्ताभावात्मसम्बन्धस्वभावत्वात् तदुत्पत्तौ दुःखात्यन्ताभावस्य तदीयत्वेन व्यवहारात् तदीयताव्यवहारार्थकत्वेन विषयविषयिभावादिवदस्यापि सम्बन्धव्यवहारगोचरत्वात् ध्वंसस्वभावत्वेन च कृतकत्वस्याप्यविनाशित्वोपपत्तेः । न चादत्तफलानां प्रमाणसाधनत्वनिश्चयविरोधः सतां सहकारिसाहित्ये दुःखजनकत्वस्य तत्साधनरूपत्वात् तेषां च ध्वस्तत्वेन फलानुत्पादकत्वात् प्रायश्चित्तप्रतिहतदुरितवत् न चात्यन्ताभावप्रतिपक्षानिरूपणम् शङ्कितदुःखपरिहारवत् मुमुक्षुसमवेतदुःखमात्रस्य सम्भावनोपनीतत्वात् । असति योगाभ्यासेऽवश्यं दुरितप्रवाहस्यानागतसमयवर्तिदुःखोत्पादकत्वात् सर्वत्र चात्यन्ताभावनिरूपणे सामान्यतोवगतस्य विशेषतः समारोपितज्ञानविषयस्य प्रतियोगित्वदर्शनात् विशेषतस्तु निश्चयापेक्षायामत्यन्ताभावनिरूपणवि-

रोधित्वात् (१) शशविषाणं तदीयं मदीयं वा नास्तीति दूषणस्य सुवचत्वात् । प्रागभावस्यासाध्यत्वेऽपि विनाशहेतुसन्निधौ विनाशोपलम्भादविनाशित्वसमीहया नाशहेतुनिवृत्तये प्रवर्त्तन्ते यथा प्रायश्चित्तविधौ दुःखाभावनाशकदुरितसम्पत्तौ दुरितनिवृत्तये अभावस्य नित्यत्वे स्वत एव नाशकनिवृत्तेराकाशादिवदनित्यत्वे त्वशक्येति चेत् न गगनस्य स्वरसतो नाशविरोधित्वात् दुःखाभावस्य तु नाशकोपलब्धौ स्वभावविरोधाभावात् कारणनिवृत्तिसुलभत्वात् घटाभावस्य नित्यत्वे घटहेतुतोऽप्यशक्या घटोत्पत्तिः अनित्यत्वेपि घटहेतुं विनैव भविष्यतीति पूर्वपक्षतुल्यतापत्तेः इयमेव प्रागभावानुवृत्तिरिति प्रावादुकप्रवादः । न चास्य समायव्ययत्वेनापुरुषार्थत्वं दुःखस्य प्राचुर्यात् सुखस्याल्पत्वात् आनन्त्यात् । सुखदुःखयोरिदमनुपपन्नमिति चेत् न दिनमासवर्षावच्छेदेन दुःखप्राचुर्यनिश्चयेऽन्यत्रापि तदनुमानात् तदनाकलितसंख्यत्वमुत्पादानन्त्यं (२) न तु न्यूनातिरेकभावाभावः अन्यथा सुकृतदुष्कृतयोरानन्त्ये विशेषाभावादपूर्वकर्माननुष्ठानप्रसङ्गे वैदिकविधिनिषेधयोर्वैयर्थ्यापत्तेः जीवन्निर्वाणदशायां वा योगजादृष्टसामर्थ्येनैवैहिकामुष्मिकसकलसुखोत्कृष्टयावदिच्छोपभोग्यसुखप्रवाहोत्पत्तौ सुखोपभोगसमीहाविरामे योगजादृष्टविनाशात् परमनिर्वाणस्य सकलदुःखाभावस्योत्पत्तौ समायव्ययफलत्वाभावात् । एवं च न प्रावादुकप्रवादावकाशः जीवन्मुक्तिसहितायाः परममुक्तेः पुरुषार्थत्वात् । न च जीवतः सुखोपभोगोऽनुपपन्नः ज्ञानेनैव सर्वकर्मणां क्षयादिति वाच्यम् अकृतप्रायश्चित्तानां कर्मणां देहारम्भककर्मवद्भोगैकनाश्यत्व-

(१) विरोधात्—पा० २ पु० ।

(२) संख्यत्वमेतयोरानन्त्यम्—पा० २ पु० ।

नियमात् न चानन्त्यात् कर्मणां भोगादपि क्षयानुपपत्तिः (१) योगर्द्धिसामर्थ्येनानन्ततदुपभोजककार्यनिर्माणोपपत्तेः न च विषमविपाकसमयतया कर्मणां युगपदुपभोगविरोधः तदनुकूलसहकारिसाकल्यस्यैकस्यैकदोत्पादनादेव समानविपाकसमयत्वोपपत्तेः । भवति चात्र स्मृतिः । नाभुक्तं क्षीयते कर्मेति । श्रुतिश्च तावदेवास्य चिरमिति । न चात्र ज्ञानाग्निः सर्वकर्माणीति प्रतिस्मृतिविरोधः । भस्मसात्करणेन विनश्वरताया उपलक्षितत्वात् (२) तस्य तत्फलसम्पादकदेहव्यूहेनाप्युपपत्तेश्च । स्वर्गवत् श्रुतिसिद्धे चापवर्गे ऽनुमानमप्युच्यते । आत्मा कदाचिद्ध्वस्ताशेषविशेषगुणः विभुत्वे सति कार्यविशेषगुणवत्त्वात् महाप्रलयावस्थायामाकाशवत् । न च क्रमेण सर्वमुक्तिः केषाञ्चिदात्मनां संसार्येकस्वभावत्वात् न चैवं तत्त्वशङ्कया सर्वेषां मोक्षानुष्ठानप्रसङ्गः शमदमभोगानभिष्वङ्गादिचिह्नेन श्रुतिसिद्धेन सन्देहनिवृत्तेः ॥ मोक्षः ॥

न्यायः परार्थानुमानम् स च प्रतिज्ञादिपञ्चावयवात्मा । न च प्रतिज्ञादीनामसाधनाङ्गत्वम् अत्यन्तबुभुत्सितसाध्यप्रतिपादनोपयुक्तत्वात् (३) न चोपनयनिगमनाभ्यामेव तदुपपत्तिः (४) तयोरुचितसमयातिक्रमात् (५) यथाऽपेक्षितं वाच्यमिति नियमः एवं यदा यस्येत्यपि नियम एव अन्यथाऽपूर्वनियमस्यैव भङ्गात् तथा च प्रतिज्ञार्थ एव पूर्वमपेक्षित इति प्रतिपाद्यः अन्यथा निग्रहात् । न च गङ्गायां घोषः पीनो देवदत्तो दिवा न भुङ्क्ते इत्यादिवाक्यवद्झटित्यप्रतीतावपि(६)

(१) भोगात् प्रक्षयानुपपत्तिः—पा० २ पु० ।
(२) विनश्वरत्वस्योपलक्षणत्वात्—पा० २ पु० ।
(३) प्रतिपादनोपयोगित्वात्—पा० २ पु० ।
(४) तदवगतिः—पा० २ पु० ।
(५) अभिमतसमयातिक्रमात्—पा० २ पु० ।
(६) औचित्यप्रतीतावपि—पा० २ पु० ।

न दोष इति वाच्यम् वादिनः सन्दिग्धाप्तत्वात् । अन्यथा विपरीतान्वयदृष्टान्ताभासानुपपत्तेः अत एव हेतुपदमपि साध्यस्वरूपमात्रवत्साधनस्वरूपमात्रस्य तद्धेतुतामात्रेण तदनन्तरं जिज्ञासितत्वात् ताभ्यां हेतुहेतुमद्भावप्रतीतौ धर्मधर्मिभावबोधनार्थम् उपनयोपि तस्मादनित्य एव न तस्मान्नित्योपीति विपक्षशङ्कानिरासार्थं निगमनमपीत्यास्ताम् । पञ्चावयवाः ॥

तदाभासाश्चत्वारः । असिद्धविरुद्धसव्यभिचारानध्यवसिताः । बाधप्रतिरोधावपि स्त इति चेत् न तयोर्व्याप्तिपक्षधर्मतापरिहारद्वारेणैवानुमानदूषणत्वात् सिद्धसाधनवत् अन्यथा तस्यापि दूषणान्तरतापत्तेः ताद्रूप्यपरिच्छेदी न तस्य विरोधी स्वभावादिति तस्य परापेक्षित्वात् बाधप्रतिरोधयोस्तु साध्याभावपरिच्छित्तिरूपत्वात्तदाभासान्तरत्वमिति चेत् न सर्वोपसंहारप्रवृत्तबाह्यान्तरनियमस्यानुमानसहायत्वात् तदेकदेशप्रवृत्तविपरीतपरिच्छेदस्यैव बाधस्य सव्यभिचारत्वात् सव्यभिचारो वह्निरन्तश्चेति व्यभिचारसन्देहान्तर्भूत(१)त्वात् प्रतिरोधि च प्रतिरोध्यनियमग्राहकप्रत्यक्षबाधस्य सत्त्वे तस्यानुद्भावनात् तस्याप्येतन्नियमग्राहकं विपक्षान्तरमस्तीति चेत् न तस्यैव प्रतिबन्धासिद्धिरूपत्वादलं तदुपजीविनाऽन्येनेति तयोरसत्त्वात् । लिङ्गत्वेनानिश्चितो हेतुरसिद्धः स एवैकोऽस्तु अन्येषामत्रैवान्तर्भावात् इति चेत् न व्याप्यत्वासिद्ध्यादेरन्यत्र व्यभिचाराद्युपजीवकत्वात् । ननु नियमनिश्चयप्रागभावस्यात्यन्ताभावस्य वाऽहेतुकत्वेनोत्पत्तावनपेक्षित्वात् ज्ञप्तेरपि मानसप्रत्यक्षाधीनत्वात् न प्रतिबन्धासिद्धेः व्यभिचारोपजीवकत्वमिति चेत् व्यभिचारिषु प्रतिबन्धानुपलम्भस्य प्रतिबन्धाभावहेतुकत्वात् । का-

(१) सव्यभिचारदेहान्तर्भूत—पा० २ पु० ।

रणाभावात् कार्याभावस्य सर्वमतसिद्धत्वात् । उपजीवकव्यवस्थितेरिति चेत् न व्याप्यत्वानुपलम्भस्य तन्निश्चायकत्वेन विपरीततापत्तेः न ह्यत्र योग्यानुपलम्भं विनाऽभावावगतिरिति चेत् नैवम् स्वार्थानुमाने यदेव स्फुरति तदेव दूषणमित्युपजीव्योपजीवकभावाविचारात् परार्थानुमाने तु व्यभिचारिणि न व्याप्तिसिद्धिः दृष्टान्ते सर्वोपसंहारात् तदुपलम्भात् । तदुपाध्यभावेन व्यभिचारशङ्काहानावतिपीडया पुनरनुत्तरव्यभिचारस्योद्भावनात् तस्यैव तदुपजीवकत्वात् प्रयासगौरवाच्च(१) । विरुद्धे च विपरीतप्रतिबन्धवाक्यस्थे परिस्फुरति अन्येषामनन्तरङ्गत्वमेवोपजीवकत्वम् । असिद्धौ त्वनुपलम्भस्यैवासत्त्वनिर्वाहकत्वेनोपजीवकत्वम् । एवं सति सोपाधित्वमेव दूषणमिति चेत् न तस्य स्वतोऽदूषकत्वात् ताद्रूप्यपरिच्छेदवत् तेन व्याप्त्यसिद्ध्युपजीवनात् । व्याप्त्यनुपलम्भस्य तु कारणाभावत्वेन स्वत एव दोषत्वात् अत एव व्यभिचारसन्देहस्य विपक्षव्यावृत्त्यपरिच्छेदोपजीवित्वेन सन्दिग्धानैकान्तोपि न दूषणम्(२) । पक्षैकवृत्तिरनध्यवसितः न चात्र प्रतिबन्धासिद्धिः व्यभिचारीवत् व्यतिरेकसाहचर्यप्रतीतिनियमं दर्शयति तदनुद्भावनात् न च व्यभिचार एव सपक्षविपक्षयोरप्रतीतेरेवानध्यवसायहेतुत्वेन सबलदूषणतया विलम्बप्रतीतिकस्य व्यभिचारस्यानुद्भावनात् ॥ हेत्वाभासाः ॥

स्मृतिरपि मानान्तरमेव अर्थ(३)निश्चयहेतुत्वात् । अनुभवपारतन्त्र्यान्नैवमिति चेत् न उत्पत्तिपारतन्त्र्यस्य प्रमाणान्तरसाम्यात् फलाभावेन ज्ञप्तिपारतन्त्र्याभावात् इच्छादिवद्विषये परापेक्षायां ज्ञा-

(१) आयासगौरवाच्च–पा० २ पु० ।
(२) न सन्दिग्धानैकान्तिकोऽपि पृथग्दूषणम्–पा० २ पु० ।
(३) स्वार्थ–पा० १ पु० ।

नत्वव्याघातात् । अनधिकपरिच्छेदस्य गृहीतानुभवसाधारण्यात् कारणज्ञानप्रामाण्यापेक्षया यथार्थत्वस्यानुमितिसाधारण्यात् स्वविषयज्ञानप्रामाण्यापेक्षत्वस्य शाब्दसाधारण्यात् । अधिकपरिच्छेदे च प्रमाणत्वात् अन्यथा तद्व्यवस्थानुपपत्तेः तत्त्वावच्छिन्नं हि स्मृतिरर्थमाकलयति सापि यदि पूर्वानुभवस्यापि गोचरः तदा तत्रापि तदित्युल्लेखः स्यात् न च क्वचिदिदमिति स्यात् न चेत् स्मृतिरेव तत्रानपेक्षेति मानम् तत्ता च न ज्ञातता ज्ञातोऽयं सोऽयमित्यनयोरविशिष्टविषयतापत्तेः नाप्यतिवृत्तानुभवविशिष्टता तस्याः पूर्वानुभवेनानुल्लेखात् । स्मृतिबलादेव तत्कल्पनमिति चेत् न अननुभूत एव स्मृतिस्तत्तांश इति तत्कल्पनापत्तेः नापि पूर्वकालविशिष्टता पूर्वमासीदयमित्यत्रापि प्राप्तेः घटमात्रावसायिनी स्मृतिरनुमिततत्तायां स इत्यभिलाप इति चेत् न तं घटं स्मरामीत्यनुपपत्तेः(१) । प्रमाव्यवहाराभावादप्रमात्वमिति चेत् न लौकिकानां साधूनां प्रामाणिकानां च सत्यज्ञान एव प्रमाव्यवहारदर्शनात् । स्मृतिर्हि पूर्ववर्तमानकालावच्छिन्नमर्थमाकलयति न च तदिदानीं तादृशमिति श्यामे रक्तताप्रत्ययवदयथार्थतेति चेत् न तस्य तत्कालीनतावच्छिन्न(२)तावभासनात् न च तत्कालीनतावच्छिन्नं तदानीमसत्त्वापत्तेः नापीदानीं तदवच्छेदमाकलयति अननुभूतस्येदानींकालस्य पूर्वानुभवेन स्मरणायोगात् । मुनीनामव्यवहारादिति चेत् न वादिनं प्रति मुनित्वस्यैवासिद्धेरिति तत् कथं द्वे एव प्रमाणे इति चेत् । अत्रोच्यते । न ह्यत्र सत्यज्ञानत्वं सत्यानुभवत्वं वा साध्यं प्रामाण्यं यथाक्रमं सिद्धसाधनबाधयोः सत्त्वात् नापि प्रमाणशब्दवाच्यत्वम् अनीश्वरेच्छाप्रयुक्तप्रमाणशब्दाभिधेयत्वे सिद्धसाध-

(१) अनुव्यवसायानुपपत्तेः–पा० २ पु० ।
(२) कालावच्छिन्न–पा० २ पु० ।

नात् ईश्वरेच्छाप्रयुक्तप्रमाशब्द(१)वाच्यत्वस्य तदभियुक्तपुरुषव्यवहारगम्यत्वात् प्रमाणाभियुक्तानां चाक्षचरणकणभक्षादीनां स्मृतौ प्रमाव्यवहाराभावात्(२) इन्द्रपाणिनिप्रभृतिव्यवहाराद्वाचकतानियमवत् पूर्वानुभवविषयतयैव(३) वा विषयनियमादिच्छादिवत् न चैवमज्ञानत्वापत्तिः अर्थस्वभावप्रत्यासत्तेरविरोधात् न हि ज्ञानस्यार्थेन सह प्रत्यासत्त्यन्तरमस्ति न चेच्छाया अपि ज्ञानत्वम् इच्छात्वस्यानुभवसिद्धत्वेन विषयप्रवणताया ज्ञानत्वव्यभिचारात् न चैवमध्यक्षादौ अध्यक्षस्येन्द्रियसन्निधानाद्विषयित्वनियमात् लिङ्गस्य स्वविषयप्रतिबन्धेन वाक्यस्याकाङ्क्षायोग्यतादिना आभासस्यापि दोषहेतुत्वादिति । तत्ता चातीतज्ञानवैशिष्ट्यम् अतीतसमयावच्छेदो वा स चानुभवोत्तरकालमाभासत एव न च तदित्युल्लेखः सर्वपर्यायावच्छेदस्य नियमेनानाकलनात् । अनुभुतदिवसादिरूपकालभेदो वा स्मृतिगोचरः तस्य चानुवृत्ततामिदानीमन्यतोनुसन्धाय तदिति तद्वाचकोल्लेखी व्यवहारः । इति स्मृतिः ॥

आर्षं च ज्ञानमृषीणां कन्यायाश्च यथा श्वो मे भ्राता आगन्तेति। न चैतदध्यक्षं कारणाभावात् न च मनस्तथा तस्य बहिरप्रवृत्तेः अनुमानविलयाच्च न चैतन्नयनस्पन्दनादिलिङ्गकं तेषां व्यभिचारात् न च धूमादिवदवान्तरजातिभेदावलम्बनं तदप्रतिसन्धाने च जायमानत्वात् न चैतत् सम्भावनार्थकं(४) कोटिद्वयानुल्लेखनात् न च भूयः सहचरितधर्मदर्शनजन्मैकन्यूनकोटिकः संशयः आगमिष्यत्येवेति निश्चयाकारेण जायमानत्वात् अनुमानवत् अन्यथा तस्याप्ये-

(१) परतन्त्रप्रमाणशब्द–पा० २ पु० ।
(२) प्रमाणव्यवहाराभावात्–पा० १ पु० ।
(३) पूर्वानुभवापेक्षयैव वा–पा० २ पु० ।
(४) सम्भवनात्मकम्–पा० २ पु० ।

वंविधसंशयापत्तेः यथा वा स्वेच्छास्मृतपदार्थसार्थे भवति शालिवाहनो नृपतिरिदानीं शृङ्गारसरसीतीरे देव्या लीलावत्या सह ललितमधुरं सङ्गीतमनुतिष्ठतीति ज्ञानं न चैष विपर्यासः(१) संवादात् । नन्विदमपरोक्षत्वे त्वध्यक्षमन्यथा त्वमनुमानमिति चेत् न परोक्षत्वेऽपि लिङ्गानपेक्षत्वात् । लिङ्गानपेक्षमप्यनुमानम् इन्द्रियानपेक्षपारमेश्वरप्रत्यक्षवदिति चेत् न अपरोक्षत्वस्य प्रत्यक्षत्वात् न च परोक्षत्वमनुमानत्वं शाब्दादेरुच्छेदापत्तेः। अपरोक्षमेवार्षं ज्ञानम् न तु प्रत्यक्षमनिन्द्रियकरणकत्वात् न चेश्वरज्ञानस्य प्रत्यक्षप्रमाणत्वविरोधः प्रत्यक्षप्रमाणतुल्यतयाऽपरोक्षत्वेन तत्र प्रत्यक्षत्वव्यवहाराद् आर्षेऽपि तत एव प्रत्यक्षव्यवहारापत्तिरिति चेत् न सतो ह्युपचारस्य निमित्तपरिकल्पनं न तूपचारनिमित्ते सति सर्वत्रोपचारप्रवृत्तिः आर्षस्य प्रमाणान्तरत्वे प्रत्यक्षानुमाने एव प्रमाणमिति त्ववधारणं लौकिकप्रमाणापेक्षयेति सर्वं सुस्थम् ॥

ननु गुरुत्वं न तावत् प्रत्यक्षम् ऊर्ध्वदेशे करस्पर्शेनाग्रहात् अधोदेशस्पर्शात् तद्ग्रहणमिति चेत् न अवनतिं प्रत्यहेतूनां तृणादीनामधःस्पर्शेऽप्यग्रहात्(२) स्पर्शव्यतिरिक्तस्य च स्पर्शनेन्द्रियप्रत्यक्षगुणस्य चाक्षुषप्रत्यक्षतानियमोपलब्धेः स्पर्शनेन्द्रियग्राह्यस्य चोर्ध्वानूर्ध्वस्पर्शप्रत्यक्षतानियमानुपलब्धेः अस्तु तर्हि पतनानुमेयमिति चेत् न अदृष्टवत् क्षेत्रज्ञसंयोगादेव पतनोपपत्तेः अदृष्टहेतुकत्वे पतननियमो न स्यादिति चेत् न दहनोर्ध्वज्वलनवदुपपत्तेः अन्यथा तत्राप्युद्गमनहेतोर्लघुत्वस्य कल्पनापत्तेः अदृष्टहेतुकत्वेपि ऊर्ध्वज्वलनवद्यावदाश्रयं पतनमनुवर्तेतेति चेत् न अदृष्टहेतुकत्वेऽपि परमाणुकर्मणां यावदाश्रयमननुवृत्तेः । नन्वदृष्टवदात्मसंयोगस्य पतनहेतुत्वे गुरुत्वता-

(१) विपर्ययः–पा० २ पु० ।
(२) स्पर्शेऽपि गुरुत्वाग्रहात्–पा० ३ पु० ।

रतम्याभावात् पतने चिरक्षिप्रतारतम्यविरोधात् न चातिरिक्तक्षित्यादिप्रवेशात् तदिति वाच्यम् तेजःप्रवेशेऽपि प्रसङ्गात्। तेजो न गुर्विति चेत् तुल्यं क्षित्यादौ गुरुत्वास्वीकारात् न पतनानुकूलवेगतारतम्येनैव पतनतारतम्यसन्तानस्य चिरक्षिप्रतोपपत्तेः तथाभुतवेगजनकपतनोत्पत्तौ तर्हि किं कारणम् अदृष्टवदात्मसंयोगः विशिष्टवेगोत्पादकपवनज्वलनकर्मवत् अथ भूगतकर्मविशेषोत्पत्तिरदृष्टेतरकारणविशेषजन्या शरीरादिषु दृष्टा तेनान्यत्रानुमानमिति चेत् पतनगतवेगार्यककर्मविशेषोत्पत्तिरप्यदृष्टेतरकारणापेक्षैव(१) दृष्टा पुरुषप्रेरितप्रवेशादि(२)कर्मवत् ततः पुरुषप्रयत्नानपेक्षपवनादिकर्मोत्पत्तावपि गुरुत्ववल्लघुत्वमप्यतीन्द्रियं कल्पनीयम्। रस एव गुरुत्वमस्त्विति चेत् न एवं सति रसनया माधुर्यानुभववद् गुरुत्वानुभवप्रसङ्गात् रसस्यावनतिभेदहेतुत्वात् गुरुत्वस्वभावत्वमिति चेत् न रसो न पतनासमवायिकारणं वहिरिन्द्रियव्यवस्थाहेतुत्वात् रूपवत् अन्यथा वेगप्रकर्षाद्गतितारतम्यवन्माधुर्यप्रकर्षाद्द्राक्षादिद्रव्येषु पतनप्रकर्षप्रसङ्गात् गुरुत्वाविशेषेऽपि पाषाणालावुप्रभृतिषु मज्जनोन्मज्जननियमवद् अदृष्टहेतुकतासाम्येऽपि पतनोत्पतननियमो भविष्यतीति चेत् न जलाधोगमनं हि मज्जनं जलेन धारणम् पतनप्रतिबन्ध उन्मज्जनम् एतच्च जलसंयोगस्य कस्यचिदेव पतनप्रतिबन्धहेतुत्वात्। दृष्टहेतुकमेव मज्जनमुन्मज्जनमिति चेत् अत्रोच्यते विवादाध्यासितं पतनं स्वसमवायिकारणमात्रसमवेतासमवायिकारणजन्यं पतनत्वात् वेगार्जितशरपतनवत् न तु तेजोऽधोगमनेन व्यभिचारः तस्य कारणगतवेगपूर्वकतेजोगतवेगजन्यत्वात् न च तेजःपरमाणोरधोगमनेन व्यभिचारः तस्यापि बीजाङ्कुरवदनादिकर्मजवेगजनितत्वात्। रसवद्द्रव्यसमवेताधोगमनं वा पतनं(१) यदि वा गुरुत्वस्य क्वचिददृष्टापेक्षित्वमिन्द्रियव्यञ्जनीयत्वेनान्यत्रानुमानप्रवृत्तेः न चैवं गुरुत्वस्यातीन्द्रियत्वव्याघातः अतीन्द्रियेष्वपि परमाण्वादिवदात्मविशेषगुणापेक्षित्वेनेन्द्रियप्रवृत्तिदर्शनात् न चेदेवं पृष्ठाद्यारोपितपदार्थस्य गुरुत्वानुपलम्भप्रसङ्गः पतनाभावेनानुमानाभावात् न चेन्द्रियसन्निकर्षव्यङ्ग्यं गुरुत्वम् उर्ध्वस्पर्शेनानुपलम्भात् न चाधःस्पर्शवेद्यं तृणादिस्पर्शे गुरुत्वस्यानुपलब्धेः न चोद्भूतत्वे सतीन्द्रियसन्निकर्षवेद्यं गुरुत्वस्य वहिरिन्द्रियव्यवस्थाप्रत्यहेतुत्वेन संख्यादिवदुद्भूतत्वाभावात् अतो योगीन्द्रियवदिन्द्रियमदृष्टसहायमतीन्द्रियेऽपि गुरुत्वे प्रवर्तत इति न च लघुत्वं गुरुत्वापकर्षस्यैव लघुत्वप्रत्ययगोचरत्वात् दहने चोद्गमननियमस्य कारणवेगपूर्वकवेगादेवोपपत्तेः। एतच्च कारणगुणपूर्वकमेवावयविनि। नन्वेवं द्विपलिकरुचकाभ्यामारब्धस्य स्वस्तिकस्य कारणगुरुत्वापेक्षया न्यूनसमाधिकभावेन त्रिचतुःपञ्चपलिकत्वापत्तिरिति चेत् न खण्डावयविनां स्वस्तिकारम्भकत्वात् न च तत्तदवयवपरम्परायाः परमाण्ववसानायाः स्वतः पलरूपं गुरुत्वं कारणाकारणसमाहारस्य तत्र कारणगुरुत्वस्यापरिचयात् समन्यूनाधिक(२)भावेऽप्यविरोधात् तथाप्यवनतिभेदः स्यादिति चेत् न भूयसि गुरुत्वे ऽगुरुत्वोत्कर्षेऽप्यवनतिभेदभावात्। गुरुत्वम्॥

द्रवत्वं स्वाभाविकम् अन्यथा च पूर्वमप्स्वमन्यत्(३)क्षितितेजसोः। करकाद्रवत्वं न स्वाभाविकमिति चेत् न घृतादिवत् तस्य नैमित्तिकविलयनाभावात्। उत्तरं च कनके पार्थिवमेव किन्न स्यादिति चेत् न तेजोद्रवत्ववत् रूपित्वात् क्षितिवत् ततः

(१) कर्मभेदोत्पत्तिरप्यदृष्टेतरकारणविशेषजन्यापेक्षयैव—पा० २ पु०।

(२) प्राणादि—पा० २ पु०।

(१) गमनत्वं वा पतनत्वं—पा० २ पु०।

(२) समहीनाधिक—पा० २ पु०। (३) पूर्वमप्सु अन्यत—पा० २ पु०।

पक्षधर्मतया कनक एव सिध्यतीति न्यायात् कनकतैजसत्वे का प्रमिति चेत् विद्युदकान्यकत्वे सति रूपित्वात् दीपवत् कनकं न भौममत्यन्तानलसंयोगेप्यनुच्छिद्यमानद्रवत्वाधिकरणत्वात् जलपरमाणुवत् गुरुत्वमप्येवमभौमं स्यात् अत्यन्तानलसंयोगेऽप्यनुच्छिद्यमानत्वादिति चेत् न गुरुत्वस्याभौमस्य स्वाश्रयसमानजातीयव्यापकत्वनियमात् तेजोमात्रे गुरुत्वप्रसङ्गात् भौमस्यापि गुरुत्वस्य ध्यामादेरत्यन्तानलसंयोगेप्यनुच्छेदात्(१)। सुवर्णं वा द्रुततैजसमत्यन्तानलसंयोगेप्यनुच्छिद्यमानानित्यद्रवत्वाधिकरणत्वात् न यदेवं न तदेवं यथा घृतादिकं भौममपि द्रवत्वं स्नेहवदौपाधिकं किं न स्यादिति चेत् न काचादिषु द्रवत्वेपि संग्रहाभावात् आप्यत्वे तु संग्रहापत्तेः(२) द्रवत्वं विहाय स्नेह एव स्यन्दननिदानमस्त्विति चेत् न तदुत्कर्षेप्यनुत्कर्षात् न हि घनीभूतघृतादिकमपेक्ष्य चिरस्यन्दिजलं जलापेक्षया वा शीघ्रस्यन्दिघृतम्। द्रवत्वम्॥

स्नेहो माहिषगव्यादिषु दधित्वादिवत् जातिभेद एवास्तां इति चेत् न तस्यैकसम्बन्ध्यपेक्षया सम्बन्ध्यन्तरे सत्त्वात् उत्कर्षस्य च सामान्यार्थतया(३) सामान्येऽभावात् संग्रहस्तर्हि कतकजलविमलीकरणवज्जातिभेद एवास्तामिति चेत् न घृतत्वतोयत्वद्रवत्वादीनां व्यभिचारात् एतदुत्कर्षापकर्षाभ्यां च सोत्कर्षापकर्षत्वात् तथापि कथमम्भस्येव द्रुमादावप्युपलम्भादिति(४) चेत् न संयुक्तसमवायादुपलब्धेः(५) द्रवत्ववन्दीग्रहान्नैवमिति चेत् न तोयव्याख्यानावसर एव परास्तत्वात्(६)। स्नेहः॥

(१) अत्यन्तानलसंयोगादप्यनुच्छेदात्—पा० २ पु०। ध्याम इष्टकाविकारः।
(२) संग्रहप्रसक्तेः—पा० २ पु०। (३) सामान्यात्मतया—पा० २ पु०।
(४) उपलब्धेरिति—पा० २ पु०। (५) समवायादेवोपपत्तेः—पा० २ पु०।
(६) निरस्तत्वात्—पा० २ पु०।

ननु प्रोक्षणादिजन्यसंस्कारसम्भवे संस्कारस्त्रिविध एवेति न सिध्यति। यथाहि व्रीहीन् प्रोक्षतीति द्वितीया प्रोक्षणजन्यफलाश्रयत्वं प्रतिपादयति ग्रामं गच्छतीतिवत् तच्च दृश्यं नास्तीत्यतीन्द्रियः संस्कारः एवमभिमन्त्रिता मृदादयो विषायन्ते तत्राभिमन्त्रणजन्यः संस्कारः। तत्र देवतानामधिष्ठानं क्रियत(१) इति चेत् न देवतादिकल्पनापेक्षया संस्कारकल्पनाया लघुत्वात् आगमप्रसिद्धसत्त्वानां देवतानामवश्यं कल्पनमिति चेत् न लोकान्तरवर्तित्वेन देवतानां देहसन्निधानस्यावश्यकत्वात् सार्वज्ञ्ये चेतनासन्निधेः सर्वत्र सुलभत्वात्(२) असार्वज्ञ्ये तु व्यवहितगोचरचेतनार्जनस्याशक्यत्वात् विचित्रशक्तीनां विधानानां सामर्थ्येन च व्यवहितमपि साक्षात्कुर्वन्तीति चेत् न यागादावपि देवताप्रीतिरेवामुष्मिकं फलमुपकल्पयतीति अदृष्टकल्पनानुपपत्तिप्रसक्तेः तथा च महाव्रतः॥

मृदमपि विषं कश्चिन्मन्त्रः करोति नियोजितः।
सृजति तदसौ काञ्चित् शक्तिं मृदोतिविमोहिनीम्॥

लाक्षारसावसिक्तवीजपूरकुसुमारुणिमा च लाक्षारसावसेचनाहित(३)संस्कारप्रभवः लाक्षारसावसेकादेवारुणत्वं महारजनसम्पर्काद्वसन इव भविष्यतीति चेत् न चिरान्तरितत्वात् तथा च महाव्रतः॥

कुसुमे वीजपूरादेर्यल्लाक्षाद्युपसिच्यते।
शक्तिराधीयते तेन काचित्तां किं न पश्यति॥

यदि न पश्यसि।

किं वा सिञ्चसि वीजपूरकुसुमे लाक्षारसं तत्क्षणा-
देवासौ गलितो मिलिष्यति कथं पुष्पेषु दूरान्तरः।

(१) सन्निधिः क्रियते—पा० २ पु०। (२) सत्त्वात्—पा० २ पु०।
(३) रसावसेकाहित—पा० २ पु०।

किञ्चान्यत् कियतोपि चास्य किमसौ सम्भाव्यते विस्तरः
प्रत्यब्दं भवति भ्रमो यदरुणच्छत्रं वसन्तश्रियः ॥

उत्तरकालं तपनसम्पर्कमहिम्ना पाकजोयमरुणिमा कुसुमेष्विति चेत् न लाक्षारसानपेक्षपाकप्रभवत्वे लाक्षारससेकवैयर्थ्यात् तदपेक्षपाकजन्यत्वस्य लाक्षारसातीतत्वेनानुपपत्तेः परम्परया लाक्षारसप्रसूतेषु पाकजविशेष इति चेत् न विचारासहत्वात् लाक्षारसस्य वीजपूरतरुमात्रे जनकत्वं तद्विशेषे वा न तावदाद्यः तस्य तद्व्यतिरेकेप्युत्पादात् न द्वितीयः दृश्यस्य विशेषस्यानुपलम्भनिरस्तत्वात् न हि वीजावयवेषु(१) कश्चिज्जातिविशेषः(२) वीजपूरतरौ वावभासते अदृश्यत्वे चाऽतीन्द्रियशक्तिस्वीकारात् लाक्षारसावसिक्तावयवारब्धेषु तरुष्विति चेत् न तदवयवानां शोषात् परमाणूनां च पार्थिवानां सर्वत्र विशेषात् । क्षीरमिश्रितत्रिफलाजलावसिक्तसितापराजितालताशाखाभेदे सितासितकुसुमानुपपत्तेः साक्षाच्च स्वसंसर्गिणि वीजावयवभेदेऽरुणिमानमनर्पयतोऽसंसर्गिणि कुसुमे रक्तताधानमनुपपन्नं यदाह ।

न भिनत्ति कयापि मात्रया फलकाण्डाङ्कुरपल्लवानपि ।
यदयं निहितो रसस्तया तदनुपपन्नमिवावभासते ॥

अत्रोच्यते । संस्कारस्य हि द्वयी आधारता समवायः स्वभावप्रत्यासत्तिश्च तत्र व्रीह्याद्याधारता स्वभावप्रत्यासत्तिरेव स्यात् भावनावत् यथा तद्विषयप्रसूतत्वमेव तदीयत्वं भावनायाः तथा तद्विषयप्रोक्षणादिप्रसूतत्वमेव तदीयत्वं प्रत्यासत्तिश्च तदुपरक्तप्रतीतिगम्या सा च ज्ञान इतिवत् संस्कृत इति सम्भवति मुख्यसम्बन्धे किं बाधकमिति चेत् कल्पनागौरवमेव विजातीयकल्पनायामात्मविशेषगुणस्य तु भूतसमवेतत्वमसम्भावितमेव संयोगफलाश्रयत्वेन वा

(१) वीजपूरावयवेषु—पा० २ पु० । (२) जातिभेदो—पा० २ पु० ।

द्वितीयाश्रुतेरुपपत्तेः व्रीहीनितीप्सितकर्मणि द्वितीया व्रीहीणां विध्यपेक्षितफलाधिकरणत्वं प्रतिपादयति संयोगस्य तु विध्यनपेक्षितत्वमिति चेत् न तस्यापि विध्यपेक्षितादृष्टजननद्वारापेक्षितत्वात् । एतेनाभिमन्त्रणं व्याख्यातम् । कुसुमारुणिमा तु नोपादानत्वेन वा असमवायिकारणत्वेन वा शक्तिमाक्षिपति किन्नामातीतलाक्षारसावसेकापेक्षानियमान्यथानुपपत्तेः अतीन्द्रियं द्वारमपेक्ष्य निर्वाहकमुपपादयति स च तज्जनितरूपद्वारेणैवोपपद्यमानो नान्यत् कल्पयिष्यतीति । एतेनापराजितालताकुसुमवैचित्र्यं व्याख्यातम् । वेगासिद्धेस्तथापि त्रैविध्यमनुपपन्नं स हि नानुभवादेव(१) व्यवस्थाप्यते चिरेण गच्छतीतिवत् शीघ्रकर्मक्षणोत्पादभेदालम्बनत्वात् न च रयेण भ्रमत्यालातचक्रमित्यत्रैकप्रत्ययविषयभ्रमिणाभेदग्रहादाशूत्पादानाकलनात् वेगसिद्धिरिति वाच्यम् संयोगविभागप्रबन्धोत्पादादाशुभावस्य प्रतीतेः न च न कर्म कर्मसाध्यमिति तत्प्रतीतिरत्र नियमाभावात्(२) अन्यथा न शब्दः शब्दजनक इति ध्वनिसंयोगविभागकल्पनापत्तेः वेगशब्दस्य तु शिष्टैराशुपर्यायत्वेन स्वीकारात् तस्य च समयभेदवाचित्वात् न चोभयवाचित्वं कल्पनागौरवात् ततोऽभिलापभेदावभासिनी प्रतीतिः समयभेदमेवाश्रयत इति प्राप्तम् । मैवम् सन्तानाशूत्पादस्यानाकलने अन्तरासम्भविनां वेगबुद्धिविषयत्वात् सन्तानिनां क्रियासंयोगक्षणानामाशुभावस्य कालकलात्मनोऽध्यक्षाविषयत्वात् वेगेन भ्रमतीत्यादौ गुणारोपणात् संयोगविभागातिरिक्तकर्मणि चलतीति मतिविषयतावत् वेगस्य च शरादिधर्मत्वेन भासनात् शरीरादौ तु उत्तरोत्तरकर्मजननं प्रयत्नादेव भवतीति । संस्कारः ॥

(१) न तावदनुभवादेव—पा० २ पु० ।
(२) नियामकाभावात—पा० २ पु० ।

कथं पुरुषविशेषगुणभेदो धर्मः सिद्ध्यतीति यागाद्याराधितदेवतैव फलं फलिष्यतीति तथा च विवादाध्यासितं फलमाराध्य(१)चेतनपूर्वकमाराधनाप्रसूतसुखत्वात् भूपालाराधनाप्रसूतसुखवत् । तत्र देवदत्तदेहादिकं देवदत्तविशेषगुणप्रेरितभूतपूर्वकं देवदत्तप्रतिनियतभोगसाधनत्वात् स्रगादिवदिति पक्षधर्मतया तत्सिद्धिः तथाहि वर्तमानकायनिष्पादकानां भूतसूक्ष्माणां चैत्रस्य न प्राग्भवीयमिच्छादिकं प्रेरकं तस्यानागतदेहोपादानवेदनाभावात् अतोऽन्यद्विशेषगुणान्तरं वाच्यम् तच्च कार्यं भोक्तृविशेषगुणत्वात् सुखवत् तस्य च कारणं यागादिकमेव भोगसम्पादकं कारणान्तरकल्पनायां गौरवात् कल्पनागौरवं च तस्यापि विशेषगुणस्य यागाद्यतिरिक्त(२)निष्पाद्यत्वस्वीकारे तज्जनकस्य भोगजनकत्वं यागादेश्च एवं यदि देवताप्रीतिरपि तन्निदानं को विरोधः तदेतत् स्वर्गनरकसाधनम् ॥

कुतः(३)पुनस्तयोः सिद्धिः आगमादिति चेत् न यत् यत् सुखं तदभिलाषोपनीतत्वादिशून्यमेवेति तर्कसम्भवेन योग्यताविरहात् वाक्यस्याप्रतिपादकत्वात् न च प्रवृत्त्यनुपपत्तेस्तदुपपत्तिः सर्वस्वदक्षिणादावपि सप्तद्वीपाधिपत्यस्येव नानाजन्मानुगन्तृत्वकालभूयस्त्वादीनां सम्भवात् कुतो मर्त्यलोकभोग्यमेव सुखं न परलोकसिद्धिरिति चेत् मैवम् एषां तर्काणां विपर्ययापर्यवसानादाभासत्वात् स्वर्गसिद्ध्यसिद्धिभ्यां व्याघातात् एवम्भूतस्य चैतद्भुवनासम्भावितत्वेन लोकान्तरसिद्धिः एतद्वच्च नरकसिद्धिरपि तथैतदुपभोक्तृदेवशरीरवत् प्रेतादिशरीरसिद्धिरपीति । अदृष्टम् ॥

(१) विवादास्पदं सुखमाराध्य—पा० २ पु० ।

(२) यागादिव्यतिरिक्तव्य—पा० २ पु० । (३) कथं—पा० २ पु० ।

शब्दो द्रव्यं साक्षादिन्द्रियसम्बन्धवेद्यत्वात् घटवत् श्रोत्रं द्रव्यग्राहकं निरवयवेन्द्रियत्वात् मनोवत् नित्यश्चाद्रव्यत्वात् प्रत्यभिज्ञानाच्च गुणवत्त्वाच्च द्रव्यं संख्याविगादयोऽपि हि शब्दधर्मा अनुभूयन्ते न चारोपोऽयमशब्दधर्माणां श्रोत्रावेद्यत्वेनाग्रहणात् न चेन्द्रियान्तरेणोपनीतं तिक्तो गुड इतिवत् स्यात् तेनाप्रतीतावपि(१) संख्यादेः श्रोत्रेण प्रतीतेः न च स्मृत्युपनीतसंख्यादिसम्भेदग्रहः इन्द्रियस्य तद्ग्राहकत्वेनायोग्यत्वात् अन्यथा जम्बीरवीजपूरादौ रसाद्रूपानुमानभङ्गप्रसङ्गः तत् कथमम्बरगुणः शब्दः इति साक्षादिन्द्रियसम्बन्धवेद्यत्वं यावत्प्रसक्तपारिशेष्याद्वा निश्चीयते एकदेशपारिशेष्याद्वा नाद्यः तत एवाद्रव्यत्वनिरूपणेन लिङ्गाग्राहकमानबाधात् नेतरः कर्मत्वादेव प्रतिषेधे संयुक्तसमवायादिवेद्यत्वशङ्कायां हेतोरसिद्धतापत्तेः(२) श्रोत्रं च न नित्यद्रव्यग्राहकमयोगिबहिरिन्द्रियत्वात् चक्षुर्वदिति सत्प्रतिपक्षितं द्वितीयानुमानं यदि तु द्रव्यग्राहकं स्यात् न व्यापकद्रव्यग्राहकमजसंयोगाभावात् नाणुग्राहकमणूनामतीन्द्रियत्वात् नाणु विभुद्रव्यातिरिक्तद्रव्यग्राहकं निरवयवग्राहकतानुपपत्तिप्रसङ्गात् अबाधितानुभवसिद्धविरुद्धधर्मसंसर्गविषयत्वात् । प्रत्यभिज्ञाया बाधितत्वम् । अनुमानस्य च व्यतिरेकाप्रतीतौ व्यतिरेकासिद्धेः तत्प्रतीतौ तुल्ययोगक्षेमत्वेन(३) शब्देप्यनित्यतासिद्धेः(४) व्यतिरेकग्राहकमानबाधात् अतः शब्दोऽनित्य एव। आरोपोऽपि च गौरोऽहमितिवदुपपत्स्यते रसानुमानवन्दीयहस्तु इन्द्रियसम्बन्धविच्छेदेनापि तत्प्रतिसन्धानाद् धूमा-

(१) तेन तदानीमप्रतीतावपि—पा० २ पु० ।

(२) हेतावसिद्धितापत्तेः—पा० २ पु० ।

(३) क्षेमतयैव—पा० २ पु० ।

(४) शब्दस्याप्यनित्यतासिद्धेः—पा० २ पु० ।

नुमानसिद्धिन्यायेन निरसनीयः। स्फोटात्मा शब्दो नाम्बरगुण इति चेत् न तदसिद्धेः एकं पदमिति धीरनेकवर्णव्यावृत्तात्मानमेकपटबुद्धिवत् एकार्थक्रियाप्रतिसन्धानाद्युपाधिवैधुर्यात् रत्नत्वबुद्धिवन्नानाव्यक्तिदर्शनजसंस्कारगम्यं प्रसाधयतीति चेत् न एकसुप्तिङन्ततावच्छेदेन तदुपपत्तेः अन्यथा किन्निमित्तकः स्फोटेपि पदादिव्यवहार इति स्वयमेव परिभावय किं तर्हि प्रतिपादकं क्रमवद्वर्णसंहतिरिति ब्रूमः। ननु क्रमो न गुणात्मा तत्रापि वृत्तेः नापि जातिभेदः तद्भेदानाङ्गत्वादीनां परापरभावानुपपत्तेः नापि कालभेदः स्वतस्तस्यासिद्धेः उपाधीनां च शब्दात्मनां श्रोत्रेणाप्रतीतेः शब्दस्य च तस्यैव तद्वत्तां प्रत्यनङ्गत्वात् तत् कथं तत्प्रतिपादकमिति चेत् न पूर्वपूर्ववर्णध्वंससाहचर्यस्यैव प्रकृते क्रमार्थत्वात् अत एव शब्दाभावः श्रोत्रग्राह्यः प्रमाणान्तरवेद्यं वा पौर्वापर्यक्रम इति स्थितम्। स शब्दो गुणोऽनित्यश्चेति। शब्दः॥

तथापि कथं चतुर्विंशतित्वं रुचिवद्विरुचेरपि सम्भवात् यस्मिन् सति उपात्तमेव नियमेन हीयते। न चेयमिच्छाभावमात्रं विपरीतस्यापि सम्भवात् परत्वापरत्ववद्भेदसिद्धिरिति दुःखमेव च तीव्रं द्वेषोस्तु यथेच्छैवोत्कटा काम इति हानिसम्भवात् ज्वलितत्वबुद्धेर्भेदसिद्धिरिति चेत् न शीतलितबुद्धेरपि सम्भवात् तृप्तता सेति चेत् तुल्यं दुःखिततायामपि यत्नवदालस्यसम्भवाच्च। न च यत्नाभाव एवायं विधित्वेन भासमानत्वात् गुरुत्ववल्लघुत्वसम्भवाच्च न चैतदपकृष्टगुरुत्वमेव लघुत्वं तेजस्यपि सम्भवात् अन्यथा ज्वलतोद्गमनानुपपत्तेः तस्यादृष्टहेतुकत्वे पतनादावपि गुरुत्वानुमानभङ्गप्रसङ्गात् द्रवत्ववत्काठिन्यसम्भवाच्च न चैष स्पर्श-

भेदः(१) चक्षुषापि प्रतीतेः न च संयोगभेदो द्रवत्वेपि तुल्यत्वात्। स्नेहवद्रौक्ष्यसम्भवाच्च परापरभाववत् क्रमयौगपद्यचिरक्षिप्रवामदक्षिणाग्रपृष्ठादिसम्भवाच्च। असंख्यातोपमपरिमितोयमिति विरुद्धव्यवहारात् असंख्याऽपरिमाणसम्भवाच्च। इदमस्मादभिन्नमित्यपृथक्त्वसम्भवाच्च। न चायं पृथक्त्वाभावस्तदवधिनिरपेक्षनिरूपणत्वात् न च स्वरूपमात्रं पृथक्त्वविलयात् निद्रासम्भवाच्च मध्यत्वसम्भवाच्च। दयादयश्च यतो मृदुतरान्तरता(२) भवति न चैतददृष्टमात्रहेतुकं गुरुत्वसंस्कारविलयादित्यास्तां विस्तर इति चेत्। अत्रोच्यते नेच्छामीत्यरुचिनिरूपणात् आतुरस्योष्णद्वेषवर्तमानतानुभवेऽपि इच्छायां सुखीतिवदहं दुःखीत्यननुभवात् नाप्यालस्यम् अलसो निष्प्रयत्नो निरुत्साह इति परमकोषकारवचनात् प्रयत्नाभाव एव तच्छब्दव्यवहारात्(३) तमोवद्विधित्वेन भासमानत्वस्यान्यथा सिद्धत्वात्(४) नापि लघुत्वम् गुरुत्वापकर्ष एव तद्व्यवहारात् ज्वलनोद्गमनस्यादृष्टहेतुकत्वात् गुरुत्वप्रतिवन्दीग्रहस्तु पूर्वमेव निरस्तः। नापि काठिन्यमकठिनैरपि तन्तुभिरारब्धे पटे काठिन्योपलम्भात् संयोगभेद एवायं स्पर्शभेदो वा नापि रौक्ष्यमस्निग्धसामानाधिकरण्येनानुभवात् आर्द्रताहीने शुष्कत्ववत् नापि क्रमादिकमुपाधिद्वारैवान्यथासिद्धेः परापरादौ विशेषदर्शनात् वामत्वं च पूर्वदिगभिमुखावस्थितस्य उदीचिदिक्सम्बन्धित्वं दक्षिणदिक्सम्बन्धित्वं च दक्षिणत्वम् एवं दिगन्तराभिमुखेपि वाच्यम् देहदेशविशेष एव वामत्वं मुखापेक्षया ऋजुदेशव्यवस्थितालोका-

---

(१) न च तत् स्पर्शभेदः—पा० २ पु०।
(२) मृदुतरान्तरो—पा० २ पु०।
(३) तच्छब्दप्रयोगात्—पा० २ पु०।
(४) अन्यथासिद्धेः—पा० २ पु०।

दियोगित्व(१)मग्रत्वम् पृष्ठव्यवस्थितालोकमण्डलाव्यवच्छेदश्च पश्चात्वम् असंख्यात्वं त्वसंख्याज्ञानसंख्यायोगित्वम्(२) अशक्यज्ञानहस्तवितस्त्यादिपरिमाणयोगित्वं(३) चापरिमितत्वम् अपृथक्त्वं चैतदवधिनिरूप्यपृथक्त्वाभावसम्बन्धित्वं दयादयस्त्विच्छाभेदा एव। निरिन्द्रियदेशसम्बन्ध एव हि मनसो निद्रेति परत्वापरत्वसङ्कर एव च मध्यता गुरुत्वादिवन्दीग्रहस्तु तत्र तत्रोन्मूलित इत्यलम्। गुणनियमः॥

इति न्यायाचार्यश्रीवल्लभविरचितायां न्यायलीलावत्यां गुणपदार्थोपवर्णनं समाप्तम्॥

कथं पुनः कर्माणि पञ्चैव भ्रमणरेचनादेरपि सम्भवात् अत्रान्यथासिद्धयावुत्क्षेपणादेरतथात्वप्रसङ्गात् गमनं च न चलनातिरेकि ततो न्यूनातिरेकाभ्यां विभागोऽनुपपन्न इति चेत् न विशेषात् तथाहि नालिकायां पतति पत्त्रादौ कस्यचित् पततीति मतिः कस्यचित् प्रविशतीति कस्यचिद् भ्रमतीति स च जातिपक्षे प्रत्ययप्रबन्धो नोपपद्यते जातिसङ्करभयात् अपवरकादपवरकान्तरं व्रजतः निष्क्रामति प्रविशतीति प्रत्ययात् निष्क्रमणत्वाद्यपि न अत एव न रेचनत्वं तस्य निष्क्रमणात्मकत्वात् न च स्पन्दनं न चोर्ध्वज्वलनमुत्क्षेपणस्यैव तेजःसम्बन्धिनश्च तादृशत्वात् अत एव नोन्नमनं पतनं च तस्यावक्षेपत्वात्(४) अत एव नमनम् अनृजुसंयोगजनकत्वाच्च तिर्यग्गमनमप्याकुञ्चनमेवेत्याद्यूह्यम्॥

उत्क्षेपणादिकं चानुगतप्रत्ययनियतजातीयसंयोगजनकत्वात् सिद्धं कारणजातिनियमं विना कार्यानुपपत्तेः(५) न च रेचनेऽप्ययमदोषः तत्र बाधकबलेन जातेरपास्तत्वात्। अविलक्षणसंयोगभेदमात्रजनकं च गमनं भ्रमणनिष्क्रमणादीनां च परसामान्यवतामवश्यमपरसामान्यवत्त्वात् उत्क्षेपणावक्षेपणवत् तदेव च गमनशब्दवाच्यम् यद्वोत्क्षेपणादिरूपचतुष्कं तावत् कर्मणि चतुर्विधानुगतप्रत्ययसिद्धं तच्चोपाधिसामान्यं वा अस्तु मुख्यसामान्यं वा न नः काचित् क्षतिः चातुर्विध्यमात्रस्य विवक्षितत्वात् एतद्रूपचतुष्कविवर्जितं कर्मजातीयमेव गमनं तच्च भ्रमणादिकं न चैतद्रूपचतुष्कशालितातद्विरहाभ्यामन्यः प्रकारः सम्भवतीति पञ्चैव कर्माणि॥

(१) ऋजुदेशावस्थितालोकादिसंयोगित्व—पा० २ पु०।
(२) असंख्यात्वं चाशक्यज्ञानसंख्यावच्छिन्नत्वं—पा० २ पु०।
(३) वितस्त्याद्यपरिमाणयोगित्वं—पा० २ पु०।
(४) अवक्षेपणात्मकत्वात्—पा० २ पु०।
(५) कार्ये तदनुपपत्तेः—पा० २ पु०।

इति न्यायलीलावत्यां कर्मपदार्थः समाप्तः॥

किं पुनः सामान्यसिद्धौ मानं गौरित्यनुगताकारो(१)ऽनुभव इति चेत् न विकल्पानुपपत्तेः तथाहि कोयमभेदावसायः किमेकव्यक्तिवद्व्यक्त्यन्तरे गौरित्यवभासः उत व्यक्तीनामेकगोस्वभावेनावभासः एकधर्मवत्तयाऽवभासो वा नाद्यः एकव्यक्तेर्गोस्वभावव(२)द्व्यक्त्यन्तरस्यापि गोस्वभावत्वादेवोपपत्तेः व्यक्तिमात्रस्य वा गौरितिमतिगोचरत्वं गोव्यक्तेर्वा आद्ये ऽतिप्रसक्तिः अन्यत्र जातिस्वीकार इति चेत् न व्यक्तिविशेषस्य तत्त्वात् अन्यथा व्यक्तिमात्रस्य चागोत्वव्यञ्जकत्वं गोव्यक्तेर्वेति प्रत्यवस्थानस्य सम्भवात् न द्वितीयतृतीयौ न ह्येका व्यक्ति(३)रेकधर्मवती वेति प्रतीतिः किन्तु यथैकस्यां गवि गौरित्यवभासः तथा व्यक्त्यन्तरेपीत्येकानेकव्यक्तिविमतिगोचर एवाकारोऽवभासते। असत्यभेदप्रतिभासे शाब्दव्यवहारानुपपत्तिरिति चेत् न अतद्व्यावृत्त्या आकारसाधारण्येनैव वा तदुपपत्तेः यदर्थक्रियायां नोपयुज्यते न तत् सद्व्यवहारयोग्यं यथा गगनकमलं

(१) गौरित्यभिन्नाकारो—पा० २ पु०।
(२) एकव्यक्तेरेकगोस्वभाववद्—पा० २ पु०।
(३) एकागौ—पा० २ पु०।

नोपयुज्यते च सामान्यमर्थक्रियायाम् अतो न सामान्यं वस्तु सदिति(१) अत्रोच्यते । अतद्व्यावृत्तौ कस्तदर्थः एकं स्वलक्षणमेकजातीयं वा आद्ये ऽसाधारण्यम् अन्यत्र जातिस्वीकारः आकारस्य च साधारण्यं किं साधारणस्वभावत्वं वा साधारणसंसर्गित्वं वा(२) आद्ये ज्ञानस्थैर्यप्रसङ्गात् नेतरो जातिस्वीकारापत्तेः अविपर्यस्तप्रतीतिविषयत्वेन वस्तुसत्त्वसिद्धौ अर्थक्रियाविरहस्याहेतुत्वात् स्वप्रतीतिलक्षणायां चाऽर्थक्रियायां व्यक्त्यन्तरे ऽसंसर्गमाश्रित्य व्यतिरेकव्यवस्थितौ हेतोरसिद्धेः व्यापकस्य कोऽसंसर्गार्थः असंसर्गिणो वा को व्यापकार्थः इति चेत् न वैशेषिकनये तस्य पिण्डमात्रगतत्वात् प्रलयेपि सर्वपिण्डानां समुच्छेदे सामान्यमप्युच्छिद्येतेति चेत् न सर्वसम्बन्धिविगमेपि स्वसत्ताव्यवस्थितेरियमेव तर्हि सर्वगततेति चेत् न तस्याः सम्बन्धमाश्रित्य(३) प्रवृत्तेः अन्यथा नित्यतैव सर्वगततेत्यपि महत् पाण्डित्यं सर्वगतत्वं तु सर्वत्र समवायो वा सम्बन्धान्तरं वा तदितरोपलम्भकहानिप्रयुक्तोपलब्धिव्यतिरेकित्वं वा नाद्यः सर्वत्राप्रतीतेः तद्व्यञ्जकसहकारिविरहादप्रतीतिरिति चेत् न सम्बन्धिद्वययोग्यताया एव तत्प्रयोजकत्वात् अन्यथा पवनादावपि रूपसम्भेदापत्तेः नाश्वे गोत्वमिति प्रतीतेः न द्वितीयः षट्पदार्थातिरेकिपदार्थास्वीकारात् असत्येव सम्बन्धे आनुमानिकसम्बन्धबुद्धिजनकं रूपमेवैवमिति चेत् न तथा सति सर्वत्रानुमाने ऽनाश्वासापत्तेः न तृतीयः तद्व्यतिरेकेणैव घटादावपि तद्बुद्ध्यभावात् । स्वव्यतिरेकेणापि घटस्यानुपलम्भो न तु सामान्यस्य

(१) वस्तुभूतमिति—पा० २ पु० ।

(२) साधारणसन्दिग्धं वा—पा० १ पु० ।

(३) सम्बन्धिसत्तामाश्रित्य—पा० २ पु० ।

कस्यचित्कदाचिदिति चेत् न नित्यतैव न सर्वगतता ततो गोव्यक्तिभिन्नपिण्डेष्वसत्त्वेनासर्वगतत्वमिति सर्वमनाकुलमेवैतदिति ॥

तत् द्विविधं(१) परमपरं च तत्र परं सत्ता । नन्विदमसिद्धं प्रमाणग्रहणयोग्यतैव सत्ता प्रमाणग्रहणयोग्यता वस्तूनां स्वरूपं तद्व्यावृत्तं चेदनुगतव्यवहारानुपपत्तिः अनुवृत्तं चेत्(२) सैव सत्तेति चेत् न व्यावृत्तमेव स्वरूपं सत्ता अनुगतव्यवहारस्तु प्रमितत्वोपाध्यालम्बनः सच्छब्दप्रवृत्तिरपि तत्रैव यद्वा सामान्यविशेषसमवायवद्व्यावृत्तेष्वेव रूपेषु सदित्यनुगतव्यवहारोऽस्तु । अत्रोच्यते । प्रमतत्वेन तुल्येषु पदार्थेषु भावाभावव्यवहारवैचित्र्यानुपपत्तिः भावव्यवहारगोचरस्य भावस्यैव सत्तास्वभावत्वात् प्रमितत्वं भावव्यवहारगोचरोऽभावविरोधित्वं चाभावव्यवहारगोचर इति चेत् न अभावव्यवहाराविषयस्य प्रमितत्वेन विरुद्धभावाभावव्यवहारगोचरत्वप्रसङ्गात् भवत्येवेति चेत् न घटाघटादिव्यवहारमर्यादया निषेध्यनिषेधव्यवहारयोः परस्परविरुद्धत्वप्रतिबन्धस्थितौ भावाभावव्यवहारयोरपि परस्परविरुद्धनिमित्तत्वस्थितेः तस्माद्विमतिविषयाणि(३) द्रव्यगुणकर्माण्येकसामान्यवन्ति अनित्यत्वात्(४) गोवत् न चेदेवं गोत्वमपि न स्यात् सास्नादिमत्त्वेनैव गोव्यवहारोपपत्तेः न च भिन्नानां सामान्यविशेषसमवायवदभिन्नव्यवहारगोचरत्वं सर्वत्र सामान्योच्छेदप्रसङ्गात् सामान्यादौ चारोपितसत्ताबलेनैव तदुपपत्तेः । ननु परापरव्यतिरिक्तमपि सामान्यान्तरमस्तु रजतत्वकलशत्ववत् न परस्परपरीहारवतोः सामान्ययोः समावेशे तदतज्जातीयविरोधोच्छेदापत्तेः । कलशजातीयं

(१) सामान्यं द्विविधं—पा० २ पु० ।

(२) अनुगतं चेत्—पा० २ पु० ।

(३) विमतिगोचराणि—पा० २ पु० ।

(४) सामान्यवत्त्वात्—पा० २ पु० ।

च रजतसामग्ग्र्यपेक्षकारणजन्यं तन्निरपेक्षकारणजन्यं वा आद्ये रजतसामग्रीविरहिणि कनककलशे नास्त्येव रजतकलशत्वमिति परापरभाव एव द्वितीये तु स्वतन्त्रसामग्रीप्रसूतयोरजतकलशयोर्वैजात्यमेव तन्तुपटवत् उभयथापि न नियमविरोधः अस्तु वा परापरव्यतिरिक्तमपि तृतीयं तथापि न काचित् क्षतिः तथा च समुच्चये चकारः परमपरं चेति ॥

इति न्यायलीलावत्यां सामान्यपदार्थः समाप्तः ॥

समानजातिगुणकर्मकार्याः परमाणवोऽन्योन्यव्यावर्तकधर्मसम्बन्धिनः व्यावृत्तज्ञानविषयत्वात् द्रव्यत्वाद्वा गवादिवत् व्यावृत्तज्ञानविषयाश्च द्रव्यत्वात् घटादिवत् अणवश्च संशयविषयाः द्रव्यत्वात् स च सन्देहो विशेषदर्शनान्निवर्तते सन्देहत्वात् स्थाणुपुरुषसन्देहवत्(१) ते च निश्चयविषया द्रव्यत्वात् स च निश्चयो विशेषनिश्चयाधीनः(२) निश्चयत्वात् न पृथक्त्वेन सिद्धसाधनात् व्यावृत्तबुद्धिश्च किमन्योन्याभावविशिष्टबुद्धिः व्यावर्तकधर्मविशिष्टबुद्धिर्वा नाद्यः अन्योन्याभावेनैव गतार्थत्वात्(३) न द्वितीयः स्वगतसंख्यापरिमाणादिभिरेवोपपत्तेः संशयविषयाश्च योगिनोऽयोगिनो वा नाद्यः सर्वज्ञत्वेन तस्य संशयाभावात् न द्वितीयः अयोगिनां परमाणुदर्शनाभावात् प्रमेयत्वेन समवायस्यापि संशयविषयत्वेन विशेषवत्त्वप्रसङ्गाच्च निश्चयत्वं च विशेषनिश्चयेनैव व्यभिचारीति न विशेषसिद्धिः । मैवम् । समानजातिगुणकर्मकार्याणामणूनां द्रव्यत्वेनान्योन्यव्यावर्तकसमवायिधर्मविशिष्टबुद्धिविषयत्वस्य साधनात् न च पृथक्त्वादिकमपि परमाण्वन्तरात् परमा-

(१) संशयवत्—पा० २ पु० ।

(२) विशेषदर्शनाधीनः—पा० २ पु० ।

(३) भावेनैवोपपत्तेः—पा० २ पु० ।